# PROCEEDINGS OF
# THE NATIONAL CONFERENCE ON VEDAS AND SASTRAS

## TIRUMALA, JANUARY 29 - FEBRUARY 3, 1992


*Hon'ble Editor*
Sri Ajeyakallam, I.A.S.,
Executive Officer
T. T. Devasthanams

Editor
*Late Professor* S.B. Raghunathacharya
*Convener,* N.C.V.S.
Formerly Vice-Chancellor
Rastriya Sanskrit Vidyapeetha
TIRUPATI



**Tirumala Tirupati Devasthanams, Tirupati**

**Proceedings of the National Conference on Vedas and Sastras held at Tirumala, January 29 - February 3, 1992.**

*Hon'ble Editor & Publisher*
**Sri Ajeyakallam,** I.A.S.,
Executive Officer
T.T. Devasthanams
TIRUPATI

First Edition : 2004
Copies : 500

Editor
**Late Professor S.B. Raghunathacharya**
**Convener, N.C.V.S.**
Formerly Vice-Chancellor
Rastriya Sanskrit Vidyapeetha
TIRUPATI

*Printed at*
Tirumala Tirupati Devasthanams Press
Tirupati

# PREFACE

The Veda is a term applied to a group of Literature that forms the earliest record of the Indian civilization. Whether the civilization represented by the Vedas is the earliest or whether there were other still earlier civilizations in the country is a disputed fact. Even if such civilizations existed in the country prior to the appearance of the Vedic people and their civilization, the records of those civilizations are not available. We can under present conditions of our knowledge of ancient India, safely assert that the Vedas are the earliest literary records of the civilization of ancient India.

As the Vedas contain eternal thoughts, a deep knowledge of the contemporary world is also absolutely necessary. The question in what way the Vedas and the allied Sastras are going to help the modern man is answered in this volume of 'Proceedings of National Conference on Vedas and Sastras".

It is the aim of T.T. Devasthanams to preserve and propagate the study of the Vedas and their allied Sastras. As the Vedas are vast and inexhaustable in content a humble attempt was made by the T.T. Devasthanams by conducting a National Conference on the Vedas and Sastras in ten sessions from January 29th to February 3rd 1992 at Tirumala in order to unearth the Vedic treasure.

Several eminent traditional and modern scholars attended the Conference and presented their valuable and scholarly papers on different subjects. The summaries of the papers presented during the National Conference were printed and published by the T.T. Devasthanams on the occassion of the inauguration of the Conference.

After receiving the fullfledged papers from the authors the TTDs, have deemed it a great pleasure to print and publish these papers for the benefit of the readers, who are interested in gaining an insight into the Vedas and the Sastras. This will also be helpful for those who are persuing research on the Vedas and the Sastras. Late Prof. S.B. Raghunathacharya, the Convener of the Conference edited these papers and prepared this volume.

The T.T. Devasthanams will feel highly honoured if the aim of this publication would be fulfilled when the general readers and scholars are benifitted by this volume.

TIRUPATI
Dt. 16-6-2004.

**EXECUTIVE OFFICER**
Tirumala Tirupati Devasthanams

# CONTENTS


| | | | Page |
|---|---|---|---|
| | **VEDIC SESSION - I ( VS-I )** | | 1 |
| | अध्यक्षभाषणम् | प्रो.एन्.एस्. रामानुजताताचार्यः | 3 |
| | प्रमुखभाषणम् | प्रो.सि.जि. काशीकर | 6 |
| 1. | कृष्णयजुर्वेदस्य वैशिष्ट्यम् | प्रो.वि. कुटुम्बशास्त्री | 10 |
| | **VEDIC SESSION - II ( VS-II )** | | 15 |
| | अध्यक्षभाषणम् | प्रो. मण्डनमिश्रः | 17 |
| | Keynote Address | Prof. Agnihotram Ramanuja Tatacharya | 24 |
| 1. | The Significance of Samaveda | Dr.(Mrs.) Usha Choudhuri | 27 |
| 2. | Position of Samavedadhyayana in our Nation | Prof. Panchapagesa Sastri | 30 |
| 3. | The significance of Atharvaveda | Dr. Hukamchand Patyal | 32 |
| 4. | Relevance of Atharvaveda in Modern society | Dr. R.N. Aralikatti | 36 |
| | **VEDIC SESSION - III ( VS-III )** | | 41 |
| | Presidential Address | Prof. Ramamurthy Sharma | 43 |
| | Keynote Address | Prof. B.B Choubey | 46 |
| 1. | Vedadhyayana in India - Some Suggestions | Dr. A.S. Ramanathan | 52 |
| 2. | वैदिकवाङ्मयसंरक्षणोपायाः | प्रो. श्रीनारायणमिश्रः | 56 |
| 3. | Ways and Means for the propagation of Vedic Culture | Dr. M.R. Veerabhadra Swamy | 58 |
| 4. | Computerisation of Vedic Texts | Sri P. Ramanujan | 61 |
| 5. | Position of Vedas Tape Recording by T.T. Devasthanams | Dr. K.S.R. Datta | 65 |
| 6. | वेदपाठस्वरूपम् | डा. विष्णुभट्ल सुब्रह्मण्यघनपाठी | 68 |
| 7. | How to support Publication Activity of Vedic Literature | Dr. Ghanashyamala Prasada Rao | 71 |
| 8. | भारतदेशे वैदकिग्रन्थप्रकाशनस्य स्थितिः | प्रो. डि. प्रह्लादाचार्यः | 76 |
| | **VEDANGA SESSION - I ( VAS-I )** | | 79 |
| | अध्यक्षभाषणम् | प्रो. पेरि सूर्यनारायणशास्त्री | 81 |
| 1. | The Significance of Siksha Literature | Dr. V. Subrahmanyam | 86 |
| 2. | व्याकरणशास्त्रप्रयोजनानि | श्री के.ए. कृष्णमाचार्यः | 91 |
| 3. | व्याकरणशास्त्रवैशिष्ट्यम् | श्री एस्. लक्ष्मीनारयणशास्त्री | 94 |
| 4. | ज्योतिश्शास्त्रस्य वेदाङ्गत्वम् | श्री मधुर कृष्णमूर्तिशास्त्री | 97 |

| | | | Page |
|---|---|---|---|
| 5. | Vedic Astronomy | Prof. B.R. Modak | 100 |
| 6. | कल्पसूत्रविचारः | श्री. इ.एस्. वरदाचार्यः | 103 |
| 7. | वेदाङ्गत्वेन छन्दोनिरुक्तयोः प्राधान्यम् | डा. वि.वि. सीतारामाचार | 106 |
| 8. | व्यासशिक्षाविमर्शः | श्री मंगिपूडि वेंकटशास्त्री | 110 |
| | **VEDANGA SESSION - II ( VAS-II )** | | 115 |
| | प्रमुखभाषणम् | प्रो. सरोजा भाटे | 117 |
| 1. | Preservation of Siksha Chandas and Nirukta studies | Dr. G.N. Bhat | 120 |
| 2. | Position of Grammatical Studies in India | Dr. M. Srimannarayana Murthy | 122 |
| 3. | व्याकरणशास्त्रस्य कम्प्यूटर - यन्त्रारोपणम् | डा. के.वि. रामकृष्णमाचार्यः | 127 |
| 4. | Position of Jyotissastra in our Nation | Prof. K.V. Sarma | 130 |
| 5. | ज्यौतिषशास्त्रसंरक्षणस्य प्रसारस्य चोपायाः | प्रो. रामचन्द्र पाण्डेयः | 133 |
| | **SASTRA SESSION - I ( SS-I )** | | 137 |
| | अध्यक्षभाषणम् | श्री रेमिल्ल सूर्यप्रकाशशास्त्री | 139 |
| | Keynote Address | Prof. K.T. Pandurangi | 143 |
| 1. | भारतदेशे न्यायशास्त्रस्य साम्प्रदायिकाधुनिकाध्ययनयोः परिस्थितिः | श्री. गोडा सुब्रह्मण्यशास्त्री | 146 |
| 2. | Studies in Samkhya Philosophy | Dr. Gangadhar Panda | 149 |
| 3. | वेदानां शास्त्राणाञ्च परस्परं सम्बन्धः | श्री विश्वनाथ गोपालकृष्णशास्त्री | 152 |
| 4. | भारतदेशे प्रकाशितं न्यायशास्त्रवाङ्मयम् | डा. श्रीपाद सुब्रह्मण्यम् | 155 |
| 5. | भारतदेशे मुद्रितं साङ्ख्ययोगसाहित्यम् | डा. दोर्बल प्रभाकरशर्मा | 158 |
| 6. | Position of Modern Research on Nyaya and Mimamsa Systems | Prof. D.N. Shanbhag | 161 |
| | **SASTRA SESSION - II ( SS-II )** | | 165 |
| | Presidential Address | Prof. P. Sri Rama Murti | 167 |
| | Keynote Address | Prof. V.N. Jha | 169 |
| 1. | भारतदेशे शास्त्रसम्प्रदायपरिरक्षणोपायः | श्री आर्. कोटेश्वरशर्मा | 172 |
| 2. | न्यायमीमांसयोः प्राचीनाधुनिकाध्ययनप्रोत्साहनाय उपायाः | डा.चि. श्रीरामशर्मा | 174 |
| 3. | How to support Publication Activity of Sastras | Dr. S. Sankaranarayanan | 177 |
| 4. | Preservation and propagation of Yoga System - Some Suggestions | Sri M. Venkata Reddy | 181 |
| 5. | ध्वनियन्त्रारोपणद्वारा शास्त्रसंप्रदायसंरक्षणम् | डा. टि.वि. राघवाचार्यः | 185 |
| 6. | मस्तिष्कयन्त्रे शाब्दबोधप्रतिरूपणम् | डा. प. रामानुजः | 190 |

| | | | Page |
|---|---|---|---|
| | **AGAMA SESSION - I ( AS-I )** | | 197 |
| | Presidential Address | Prof. V. Varadachary | 199 |
| | Keynote Address | Prof. N.R. Bhatt | 202 |
| 1. | Agamic Hinduism | Prof. M.D. Balasubrahmanyam | 217 |
| 2. | भारतदेशे आगमाध्ययनपरिस्थितिः | डा. वाडपल्लि श्रीनिवासदीक्षित | 221 |
| 3. | पाञ्चरात्रवैखानसागमयोः आधुनिकं परिशोधनम् | डा. एस्.बि.एस्. भट्टाचार्य· | 223 |
| 4. | पाञ्चरात्रागमे मूलग्रन्थानां प्रकाशनस्थितिः | श्री लक्ष्मीनरसिंहभट्ट | 226 |
| 5. | वैखानसागमे मूलग्रन्थमुद्रणस्थितिः | श्री आर्. श्रीनिवासाचार्य. | 229 |
| 6. | Position of Publication of Original texts in Saivagama | Dr. M. Sivakumara Swami | 231 |
| | **AGAMA SESSION - II ( AS-II )** | | 235 |
| | Presidential Address | Prof. M. Narasimhachary | 237 |
| | Keynote Address | Prof. M.A. Lakshmi Tatacharya | 239 |
| 1. | आगमसम्प्रदायस्य संरक्षणोपायाः | श्री. च. वें. शेषाचार्य. | 243 |
| 2. | Preservation of Agamic Culture | Dr. S.V.R. Ramanujacharyulu | 246 |
| 3. | पाञ्चरात्र - वैखानस - शैवागमानां अध्ययनस्य | डा. वङ्गीपुरं रामानुजाचार्यः | 249 |
| 4. | How to encourage Modern Research on Agamas | Prof. K.K.A. Venkatachari | 252 |
| 5. | Publication of Agama Manuscripts - Some suggestions | Dr. Prabhakar Apte | 255 |
| 6. | Important Temple festivals - A Review | Dr. K.V. Raghavacharya | 258 |
| 7. | देवालयीयक्रियाकलापस्य प्रचारोपायाः | श्री वेदान्तं विष्णुभट्टाचार्यः | 261 |
| | **SROUTA AND SMARTA SESSION ( SSS )** | | 263 |
| | अध्यक्षभाषणम् | प्रो. एम्.डि. बालसुब्रह्मण्यम् | 265 |
| | प्रमुखभाषणम् | प्रो. आर्.सि. द्विवेदी | 268 |
| 1. | Sacrifices and Environmental Harmony | Dr A.S. Ramanathan | 273 |
| 2. | Pakayajnas | Dr. Indu Deshpande | 275 |
| 3. | हविर्यागसमीक्षणम् | श्री डि.वि.जि.ए. सोमयाजी | 278 |
| 4. | स्मार्तकर्मणां वैशिष्ट्यम् | डा. सन्निधानं सुदर्शनशर्मा | 281 |
| 5. | संस्काराणां प्रामुख्यम् | श्री मरिङ्गण्टि श्रीरङ्गाचार्यः | 285 |
| 6. | स्मार्तकर्मणां प्राशस्त्यं - तत्प्रचारोपयाश्च | डा. कोम्पेल्ल रामसूर्यनारायणः | 290 |
| 7. | वैदिकयज्ञसंस्थाया आध्यात्मिकं स्वरूपम् | डा. युगल किशोर मिश्रः | 295 |

| | | | Page |
|---|---|---|---|
| | **GUEST LECTURES (GL)** | | 301 |
| 1 | पाठपरिशुद्धि | ना श्री देवनाथाचार्य | 303 |
| 2 | वेदसम्बद्धानि शास्त्राणि | श्री सूरि रामकोटिशास्त्री | 307 |
| 3 | न्यायवैशेषिकदर्शनसमीक्षणम् | श्री राणि नरसिंहशास्त्री | 309 |
| 4 | अक्षपाददर्शनम् | श्री राणि नरसिंहशास्त्री | 311 |
| 5 | Contributions of Madhusudan Ojha to the interpretation of Vedic Thought | Dr A S Ramanathan | 314 |
| 6 | Vedic Culture | Prof Indranath Choudhuri | 320 |
| 7 | The Concept of Truth | Justice P Kodandaramayya | 312 |
| 8 | Vedic Culture spread over most parts of the world in the distant past | Sri A Kuppu Swamy | 326 |
| 9 | Concept of Vivrtti in the Pratisakhyas and Sikshas | Prof Bhavani Prasad Bhattacharya | 330 |
| | Resolutions adopted at the National Conference on Vedas and Sastras | | 332 |

* * *

# VEDIC SESSION - I

VS - I

# अध्यक्षभाषणम्


## प्रोफेसर् एन्.एस्. रामानुजताताचार्यः

तिरुपति


स भगवान् सर्वेश्वर जगत्स्रष्टा सृज्यमानप्रजाना हिताहितप्राप्तिपरिहारोपायप्रतिपादक तद्विषयकाज्ञानान्धकार-निवर्तक शास्त्राख्य प्रदीपमपि प्रायच्छत् । शास्ति इष्टानिष्टप्राप्तिपरिहारोपायमिति शास्त्रम् । तच्च वेदाख्यम् । तस्य बहुशाखस्यानन्तस्य वेदस्य स्वरूपतोऽर्थतश्च रक्षणार्थमेवाङ्गान्युपाङ्गानि च प्रावीवृतन् महर्षय तथा चाङ्गोपाङ्गसहिता वेदा शास्त्रपदेन व्यपदेश्या । त इमे वेदा आचार्यकर्तृकोच्चारणमनु शिष्यकर्तृकोच्चारणरूप यत् अध्ययन तेन गृह्यमाणा स्वरमात्राद्य परित्यागेनानादिकालात् रक्ष्यमाणा भारतदेशस्यासाधारणो निधि । अयमनादिर्निधिरेव भारतदेशस्येतरदेशापेक्षया विशेष । अय यद्यपनीयते तदा भारतस्य स्वरूप नेतरविलक्षण भवेत् । वेदा उपदेशपरपरयानुवर्तन्त इत्येतत्-

> **"यो ब्रह्माण विदधाति पूर्व**
> **यो वै वेदांश्च प्रहिणोति तस्मै"**

इत्यादिश्रुतिसिद्धम् । वेद नित्य न पुरुषकर्तृक इति-

> **"तस्मै नूनमभिद्यवे वाचा विरूप नित्यया ।**
> **वृष्णे चोदस्व सुष्टुतिम् ॥"** (ऋग्वेद ८ ७५ ६)

इति ऋग्वेद वदति । अस्यायमर्थ - हे विरूप ! नानारूप एतन्नामकमहर्षे ! त्व तस्मै प्रसिद्धाय, अभिद्यवे - अभिगतदीप्तये, वृष्णे वर्षकाय अग्नये, नित्यया उत्पत्तिरहितया, वाचा मन्त्ररूपया, सुष्टुति नूनम् इदानी चोदस्व स्तुहीत्येवमृषि स्वात्मान ब्रवीति यजमानो वा होतार विरूपम् ।

> **"अजान् ह वै पृश्नीस्तपस्यमानान्**
> **ब्रह्म स्वयम्भ्वभ्यानर्षत्"** (तै आ २ ९)

इति तैत्तिरीयकारण्यकवाक्यमपि वेदनित्यत्व स्पष्टमाह । अस्यायमर्थ -

> **अस्मदादिवत् उत्पत्तिरहितान् परिशुद्धान् तप कुर्वत अनादिर्वेद स्वयमेवाभिमुखतया आगच्छत् अत एव त ऋषय उच्यन्त इति ।**

सर्वेषामपि विद्यास्थानाना वेदाख्य शब्दराशिरेव मूलभूत । अवैदिकम त प्रवृत्ते प्राग् वेदा अनितरसाधारण प्रामाण्य बिभ्रत प्रजाना प्रशासका सन्त प्रचकाशिरे । वेद यद्वदति तत्सर्व सत्य श्रेयस्कर चेति अविचाल्यो विश्वास मानवाना बभूव । यथेदानी वय न जानीम कुत्र को वेदभाग प्रादुरभूदिति तथैव प्राक्तना अपि न जानन्ति स्म । यथेदानीमाचार्यमुखादधीत्यैव अस्खलितस्वरमात्रादि-मत्तया वेदमधिगच्छन्ति तथैव प्रागपि । वेदमनुसृत्य प्रवृत्तेष्वनल्पेषु प्रबन्धेषु न किमपि तादृश वचनमुपलभ्यते अयममु वेदभाग चकारेति प्रतिपादयत् । वेदस्यानित्यत्व साधयितु सरभमाणा अपि नैयायिकादय पुरुषकर्तृकत्व साधयितुमसमर्था ईश्वरकर्तृकत्वमेवान्ततो गत्वा प्रतिपद्यन्ते। पौरुषेयत्वे प्रमाणाभाव एवापौरुषेयत्वे प्रमाणम् । अनुमान

त्वप्रमाणमिति प्राक्तनैर्बहु पराक्रान्तम् । इदं तु सुनिश्चितम् अनादिकालात् आरभ्याद्यावधि गुरुमुखाद्वेदाध्ययन-संप्रदायोऽविच्छेदेनानुवर्तत इति । यथा वेदः उपदेशपरम्परया संरक्ष्यमाणोऽनुवर्तते, तथा वेदप्रामाण्यनिश्चयोऽपि आचार्योपदेशपरम्परयानुवर्तते । किं बहुना ! क्रिस्तुविरचितं बैबिल्ग्रन्थं क्रिस्तुवेद इति व्यवहरन्तः वेदस्य प्रामाण्यं सुदृढमूलं प्रतिष्ठापयन्ति। अस्मत्प्राक्तनाः श्रद्धाजडा इति वचनमतिसाहसम् । तेऽपि विद्वदपश्चिमा बहुधा विचारं कृत्वैवान्ततो निर्णीयैव वेदे समुपजाताधिकगौरवाः हस्तमुद्धृत्य प्रतिज्ञामकार्षुः वेद एव परमप्रमाणमिति ।

**"सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ।**
**वेदाच्छास्त्रं परं नास्ति न दैवं केशवात् परम् ।।"**

इति । गीतं च भगवता वासुदेवेन -

**यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।**
**न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ।।**

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।**
**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ।।**

मनुना च -

**सेनापत्यं च राज्यं च दण्डनेतृत्वमेव च ।**
**सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ।।**

**भूतं भव्यं भविष्यञ्च सर्वं वेदात् प्रसिध्यति ।**
**बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम् ।**
**तस्मादेतत् परं मन्ये यज्जन्तोरस्य साधनम् ।।**

**पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम् ।**
**अशक्यमप्रमेयं च वेदशास्त्रमिति स्थितिः ।**

याज्ञवल्क्येन च -

**न वेदशास्त्रादन्यत्तु किं चिच्छास्त्रं हि विद्यते ।**
**निःसृतं सर्वशास्त्रं तु वेदशास्त्रात् सनातनात् ।।**

यथावदधीत्य सभक्तिश्रद्धं प्रयुज्यमाना मन्त्राः अभिलषितानि प्रयच्छन्ति स्म । तद्विषये न कोऽपि संशेते स्म । केचिद्वदन्ति मनुष्यशक्त्यतीतं वर्षविद्युदादिकं दृष्ट्वा दृष्ट्वा विवृद्धविस्मयानां प्राचां चित्तवृत्तिपरिवाहपरिणाम एवायं वेदाख्यः शब्दराशिरिति । कालयापनाय वा विनोदनाय वा अन्यथा वा विरचितं शब्दं कथमिव महता श्रमेण साध्ये यजनयाजनादिधर्मे बुद्धिमन्तः प्रमाणीकुर्युः ? कथं वा स्वस्य श्रेयस्साधनमनवबोधयन्तं शब्दराशिं सुबहु परिश्रम्य अधीतवन्तः स्युः ?

**विफला विश्ववृत्तिर्नो न दुःखैकफलापि वा ।**
**दृष्टलाभफला नापि विप्रलम्भोऽपि नेदृशः ।।**

इति कुसुमाञ्जलिकारैरुदयनाचार्यैरुक्तमत्रं भावनीयम् । एवं वेदस्य प्रामाण्ये सति स यत्र विषये यं पन्थानमादिशति तमेवार्याः अनुसरन्ति । आत्मानं वेदपरतन्त्रं मन्यन्ते स्म ते। कल्पादौ जगत् स्रष्टुं प्रवृत्तस्य विरिञ्चेरपि मातृकाभूतोऽयं वेद इति 'स भूरिति व्याहरत् स भूमिमसृजत । स भुव इति व्याहरत् सोऽन्तरिक्षमसृजत' इति वेदवाक्यमेव वदति । मनुरप्याह -

**सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ।**
**वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ।।**

इति । वेदोक्तं सर्वं सत्यमेव नासत्यं किंचिदित्यपि -

**य आतृणत्त्यवितथेन कर्णावदुःखं कुर्वन्नमृतं संप्रयच्छन् ।**
**तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत् कतमच्च नाह ।।**

इति मन्त्रः प्रतिपादयति । अस्यायमर्थः - वितथमनृतमपुरुषार्थभूतं लौकिकं वाक्यं तद्विपरीतं सत्यं वेदवाक्यमवितथम् । तेन वाक्येन य आचार्यः शिष्यस्य कर्णावातृणत्ति पूरयति । सर्वदा वेद यः श्रावयतीत्यर्थः । किं कुर्वन् अदुःखं कुर्वन् । शिष्यस्य यथा दुःखं न भवति तथा पादं पादैकदेशं वा ग्राहयन् । किं चामृतं संप्रयच्छन् अमृतत्वप्रापकत्वादमृत वेदार्थः तस्य प्रदानं कुर्वन् । तादृशमाचार्यं शिष्यः पितरं मातर च मन्येत । तस्मै एकमपि द्रोहं न कुर्यादिति ।

अवश्यानुष्ठेयेषु कर्मसु वेदाध्ययनं प्रथमकर्तव्यममन्यन्त प्राञ्चः । यो वेदं नाध्यैष्ट स व्रात्योऽमन्यत । अनधीतवेदस्य वाचि ग्राह्यांशो नास्तीति निरणैषुः । न केवलमक्षर-राशिग्रहणरूपाध्ययनमात्रं फलाय । अर्थोऽपि वेदस्य सम्यग्ज्ञातव्यः इति श्रुतिरेवाह । अर्थस्य प्राधान्यं शब्दस्य तदुपसर्जनतेति लोके । वेदे तु शब्दार्थयोरुभयोरपि समप्राधान्यम् । यस्य शब्दस्य यः स्वरः यथा चानुपूर्वी तस्य तथोच्चारणे एव मन्त्रः फलाय कल्पते । सत्स्वपि पर्यायशब्देषु तदुच्चारणे न फलं भवतीति शब्दस्यापि प्राधान्यम् ।

वेदास्तावत् परमात्मनः निःश्वसितमिति -

**'तस्य ह वा एतस्य महतो भूतस्य**
**निःश्वसितमेतत् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः'**

इति वेद एव कथयति । यथा उच्छ्वासनिश्वासयोरभावे शरीरस्य सत्ता न भवति तथा वेदानामभावे परमात्मनः

सत्तापि न भवतीति तेन ध्वन्यते । स चायं वेदः -

**''एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यम्, नवधा आथर्वणो वेदः''**

इति महाभाष्योक्तरीत्या चतुर्विधः प्रत्येकं बहुशाखश्चासीत् अध्ययनपरंपरायामित्यवगम्यते । परं तु -

**''पूर्वं सहस्रशाखो वेदोऽध्यगायि, ततो व्यस्तः, ततः षडङ्ग एकः, इदानीं तु क्वचिदेका शाखेति । तस्मादायुरारोग्यबलवीर्यश्रद्धाशमदमग्रहण-धारणादिशक्तेरहरहरपचीयमानत्वात् स्वाध्यायानुष्ठाने शीर्यमाणे कथंचिदनुवर्तते''** (न्या.कु.द्वि. स्तबक)

इति उदयनाचार्योक्तरीत्या कतिपयशाखा एवाध्ययनपरंपरायां वर्तन्ते। इतरा बह्व्यः शाखा अध्ययनपरंपरातो विच्छिन्ना नोपलभ्यन्त इति महदिदमस्माकं दौर्भाग्यम् ।

यद्धि वेदाख्यं शास्त्रं पुरातनैर्महर्षिभिरत्यादरेण परिगृहीतम्, शंकराचार्यप्रभृतिभिराचार्यैश्च -

**''महत ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य''**

**''अनेकशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्य-वर्णाश्रमादिप्रविभागहेतोः ऋग्वेदाद्याख्यस्य सर्वज्ञानाकरस्य''** (ब्र.सू. शांकरभाष्य 1-1-3)

इति सर्वज्ञाननिधितया,

**''मातापितृसहस्रेभ्योऽपि वत्सलतरं शास्त्रम्''** (रा.भा.)

इति सकलप्रजाहितंकरतया च जोघुष्यमाणस्य,

**''न हीदमतिगम्भीरं भावयाथात्म्यं मुक्तिनिबन्धनम् आगममन्तरेणोत्प्रेक्षितुमपि शक्यम्''** (शां.भा. 2-1-11)

इति मोक्षबीजभूतातिगम्भीरब्रह्मतत्त्वावबोधकत्वेन प्रशस्यमानस्य अस्य शास्त्रस्य सर्वैः प्रकारैः संरक्षणं भारतीयत्वाभिमानिनां सर्वेषां परमो धर्मः ।

पूर्वस्मिन् काले अङ्गैः उपाङ्गैश्च सह वेदा गुरुमुखात् अधीयमाना आसन् । अत एव वेदाख्याक्षरराशिग्रहणं तदर्थविज्ञानसंपादनं तदर्थानुष्ठानं चेति त्रितयं कृतमासीत् इति,

**श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि ।**
**युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान् ॥**

**अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत् ।**
**वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु संपठेत् ॥**

**यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम् ।**
**तावुभौ पुरुषौ लोके पङ्क्तिपावनपावनौ ॥**

इत्यादिप्रमाणसिद्धम् ।

परं तु स्वरमात्राक्षरादिभ्रंशं विना वेदः रक्षणीयश्चेत् तदर्थं पदक्रमजटाघनादिपाठेनाहोरात्रमभ्यासः कर्तव्यो भवति ।

**'आम्नायानामयोगेन विद्यां प्रशिथिलामिव'**

इति अभ्यासाभावे वेदविद्या प्रशिथिला स्यादिति वाल्मीकिराह । तस्मात् अध्ययनं घनान्तं क्रमान्तं वा कृत्वा गृहीतस्य वेदस्य अविस्मरणेन स्वरादिस्खालित्याभावेन धारणार्थं च प्रतिदिनमभ्यासोऽवर्जनीय इति गृहीताक्षरराशि-संरक्षणार्थमेव प्रवृत्ताः बहवः व्याकरणादीन्यङ्गानि न्यायमीमांसादीन्युपाङ्गानि च पठितुमवकाशं न लभन्ते । अपरे बहवः अनधीत्यैव वेदं न्यायमीमांसादिशास्त्राणि पठन्तः तत्र कुशला विराजन्ते । वेदाध्ययनशास्त्रविज्ञानोभयसंपन्ना अधिकारिणस्तु विरलाः । तादृशेष्वप्यन्यतरत्र अपूर्णता च दृश्यत इतीयमिदानींतनी वस्तुस्थितिः । तां च स्थितिमनुसृत्य वेदानां तदर्थविज्ञानानां च संरक्षणाय स्रोतोद्वयमस्माभिः परिकल्पनीयम् ।

ये तावत् वेदाध्ययने उत्सुका भवन्ति ते यथा घनान्तं क्रमान्तं वा वेदमधीत्य अनन्तरं पारायणादिना वेदाक्षरराशिसंरक्षणं कुर्युः तथा काचन वृत्तिस्तेषां कल्पनीया। तदर्थम् अध्ययनं कुर्वतामध्यापनं कुर्वतां च आजीवं वृत्तिः कल्पनीया । ये अध्यापनस्थानं न लभन्ते तेऽपि अध्यापनसमवेतन प्रदाप्य देवालयेषु वेदपारायणे नियोक्तव्याः। भारतदेशे सहस्राधिका देवालया विलसन्ति । प्रतिदेवालय-मवरतो द्वौ वेदपण्डितौ पारायणार्थं नियोक्तव्यौ ।

ये तावत् न्यायव्याकरणादीनि शास्त्राण्यधीयते तेषु ये कलाशालादिषु वृत्तिं न लभन्ते तेऽपि प्रतिमासं वेतनेन पोषणीयाः, ते च धर्मप्रचारकर्मणि इतिहासपुराणादि प्रवचनकर्मणि च निरताः करणीयाः । प्रतिदेवालयमेकः शास्त्रपण्डितः एतदर्थं नियुक्तो भवतु।

एतादृशो रक्षणमार्गो यदि नोपकल्प्यते तदा भाग्यवशात् अध्ययनप्रणालिकायां वर्तमानाः स्वल्पतरा अपि वेदशाखाः कालक्रमेण विच्छिन्नाः स्युः । एतदर्थम् अधिकारिभिः विद्वद्भिश्च महान् प्रयत्नः कार्यइत्येतावन्मात्रमुक्त्वा कृतज्ञतानिवेदनपुरस्सरं मदीयमध्यक्षभाषणमुपसंहरामि । ☆

VS - I

# प्रमुखभाषणम्

**प्रोफेसर् सि.जि. काशीकर्**
पुणे

**अहं दूरतस्ते पदाम्भोजयुग्म-**
**प्रणामेच्छयागत्य सेवां करोमि ।**
**सकृत्सेवया नित्यसेवाफलं त्वं**
**प्रयच्छ प्रयच्छ प्रभो वेङ्कटेश ॥**

अयि वेदशास्त्ररक्षाबद्धपरिकरा भारतीया विद्वास ,

महान् किल प्रमोदस्यावसर यत् तिरुमलै तिरुपति देवस्थानविश्वस्तमहोदयै श्रीवेङ्कटस्यावस्थानेन अलकृतेऽस्मिन् तिरुमलैगिरौ अद्य आकारितेय परिषत् । भारतवर्षस्य तेषु तेषु प्रदेशेषु कृतवसतय वैदिकोत्तमा शास्त्रविशारदा तपस्विनोऽत्र समिलिता । बहो कालादारभ्य ह्रसमानाया वेदशाखाध्ययनपरपराया भारते तस्या परिरक्षण कथ भवेदिति सर्वेषा वेदशास्त्राभिमानिना चिन्ताया विषय । तस्या परपराया परिरक्षणार्थं के उपाया अनुष्ठेया इत्यस्मिन् विषये निपुण विचार्य सर्वै कार्यव्यापृतैर्भाव्यमित्यस्या सङ्गोष्ठ्या उद्दिष्टम् । अत्र प्रथमतो वेदविषय उपस्थापनीय । अधिवेशनस्यास्य उपक्रमो मया कर्तव्य इति परिषत्सचालकैरादिष्टमिति तेभ्यो धन्यवादान् वितरामि।

वेदास्तावत् समेषा वैदिकधर्मीयाणा धर्मग्रन्था । ते च नित्या अपौरुषेयाश्चेति पूर्वमीमासादर्शनस्यादौ आचार्येण जैमिनिना साधितम् । बादरायणाचार्येण ब्रह्मसूत्रे 'शास्त्रयोनित्वात्' इति सूत्रे वेदस्य ब्रह्मकार्यत्व सूत्रितम् । कितु एतावता वेदस्य पौरुषेयत्व न सिध्यति मनुष्यनिर्मितत्वाभावात् । ईदृशमपौरुषेयत्वमभिप्रेत्य व्यवहारदशायामाकाशादिवन्नित्य तेनैवाचार्येण देवताधिकरणे सूत्रितम् - 'अत एव च नित्यत्वम्' इति श्रुतिस्मृती चात्र भवत । 'वाचा विरूपनित्यया' इति बह्वृचा । 'अनादिनिधना नित्या वागुत्सृष्टा स्वयभुवा' इति च महाभारते स्मृति । एवप्रकारेण सायणाचार्यै ऋग्भाष्यभूमिकाया वेदस्यापौरुषेयत्व नित्यत्व च प्रतिपादित शास्त्रानुरोधेन ।

सोऽय वेद एक सन् अध्ययनसौकर्यार्थं महर्षिव्यासै चतुर्धा विभक्त इति महाभारतादिग्रन्थेषूक्तम् । तत्र पुन ऋग्वेदादय अध्ययनपरपराभेदेन तासु तासु शाखासु अशत पाठभेदेन उपलभ्यन्ते । काश्चन शाखा अध्ययनपरपराया अभावाल्लुप्ता । तासु कासाचन नामानि यत्र तत्र प्रकरणानुसार निर्दिष्टान्युपलभ्यन्ते । यासामध्ययनपरपरा इयता कालेनापि जागर्ति ता वर्णाक्षरस्वरभेदरहिता शुद्धस्वरूपेणावतीर्णा । गुरो शिष्य प्रति पितुश्च पुत्र प्रति एव मुखपरपरामात्रेण

अलिखितस्वरूपा वेदाः याथातथ्येन सुदीर्घं कालं यावत् कथं संप्राप्ता इति विषये भारतीयेतराः महदाश्चर्यं कुर्वन्ति । गच्छति काले वेदा लेखरूपेण निबद्धाः । एवं काश्चन लिखितमात्ररूपा वेदशाखा अध्ययनपरंपराया अभावात् अशुद्धरूपेण संप्राप्ताः । तादृशानि लिखितपुस्तकानि संपाद्य पाठविषयकशास्त्रानुरोधेन एतादृश्यो वेदशाखा मुद्रिता उपलभ्यन्ते । एवं काश्चन वेदशाखा मुद्रितग्रन्थरूपेण प्रकटीभूता इत्यपि बहु मन्तव्यम् । 'एकविंशतिधा बाह्वृच्यम्' इति पतञ्जलिः व्याकरणमहाभाष्ये उक्तवान् । तासु एकविंशतिशाखासु केवलं पञ्चानामेव शाखानां नामानि पुराणादिग्रन्थेषूपलभ्यन्ते । तत्र शाकलशाखा सर्वत्र ख्याता। बाष्कलानामृग्वेदे ये केचन विशेषा आसन् तेषां परिचयः बृहद्देवतादिग्रन्थेभ्यो भवति । आश्वलायनशाङ्खायनशाखयोः लिखितपुस्तकानि उपलब्धानीति श्रूयते । पर मुद्रितरूपेण नाद्यापि ते प्रकटीभूते । वेदाभ्यासकैः तयोः प्रकाशनं सोत्कण्ठं प्रतीक्ष्यते । माण्डूकेयेति पञ्चम्याः शाखाया नाम पुराणेषूपलभ्यते । किन्तु तस्याः स्वरूपं सर्वथा अज्ञातम् । नापि तस्या लिखितपुस्तकं यत्र कुत्रापि उपलब्धं श्रूयते । येयं स्थितिः ऋक्शाखानाम् सैव अन्यवेदशाखानामप्यवगन्तव्या ।

वेदस्य स्वरूपमुभयविधम् - शब्दरूपम् अर्थरूपं चेति। तत्र शब्दरूपमादौ विचारयामः । वेदस्य शाब्दज्ञानं प्राचीनकालादारभ्य गुरुशिष्यपरंपरया सुरक्षितम् । वेदाध्ययने वेदोक्तकर्मानुष्ठाने च आदौ ब्राह्मणक्षत्रियविशामधिकार आसीत् । गच्छता कालेन क्षत्रियवैश्ययोः अध्ययनपरंपरा अनुष्ठानपरंपरा च क्रमेण लुप्ता । अध्ययनाध्यापन-यजनयाजनदानप्रतिग्रहा इति प्रथमवर्णस्य कर्तव्यानि । परिस्थितिपरिवर्तनात् प्रथमवर्णीयेषु बहूनामेतत्कर्माधिकारो नष्टः । अन्यान्यवृत्तिमाश्रित्य बहुभिः जीवनयात्रा प्रचालिता। स्वल्पैरेव पुरुषैः अध्ययनाध्यापनादिकार्याधिकारो रक्षितः। वैदिकप्रवरैः स्वकीयेषु गेहेषु विशिष्य धर्मक्षेत्रेषु वेदपाठशालाः स्थापिताः प्रचालिताश्च । काश्चन पाठशाला राजाश्रयमप्यलभन्त । एतावता वेदाध्ययनपरंपरा भारतवर्षे जीवन्ती आसीत् । तत्र केचन साङ्गवेदं विकृतिसहितमधीतवन्तः । दक्षिणभारते सलक्षणवेदाध्ययनस्यापि परंपरा क्वचित् जीवति । यदाप्रभृति अखिले भारतवर्षे आंग्लानां राज्यमभवत् तत आरभ्य वेदाध्ययनपरंपरा समधिकं ह्रासं गता । तत्पूर्वं वेदाध्ययनं वा शास्त्राध्ययनं वेति द्वे एव गती जिज्ञासूनामास्ताम् । वृत्तिनिरपेक्षा ज्ञानलालसा विरला एव । प्रायः सर्वत्र ज्ञानसंबन्धस्य वृत्त्यैव संबन्धो वर्तते । आंग्लानामागमनोत्तरम् आंग्लविद्या अत्र महान्तमुत्कर्षं प्राप्ता । प्रायः सर्वेषां प्रवृत्तिः आंग्लविद्यार्जनेऽभवत् । अत्रत्यजीवनरीतावपि आंग्लपद्धतेः महान् प्रभावो जातः । समाजजीवने महती क्रान्तिरभवत् । धर्मस्य प्रभावो न्यूनभावमापन्नः । परिणामतः स्वल्पा एव विद्यार्थिनः वेदाध्ययने प्रवर्तन्ते । नैतावत्, प्राचीनपरंपरारक्षाविषये धर्माचरणविषये च जनाः शिथिलवृत्तयो जाताः । भारतीयानां सांप्रतिकं यत् साधारणं जीवनं दृश्यते तत्र वेदस्य, श्रौतस्मार्तसंस्काराणां च कियानवसरो भवतीति जटिलः प्रश्नः । वेदस्य धर्माचरणस्य च पुनः स्थापने क्रियमाणाः प्रयासाः कियता प्रमाणेन सफला भवेयुरिति वक्तुं दुःशकम् । एवं प्रतिकूलस्थितावपि वेदस्य प्राचीनपरंपरायाश्च यथा पर्याप्ता रक्षा भवेत् तथा अवश्यं प्रयतनीयम् । इदं सर्वं नश्येत् चेत् न केवलं भारतस्य, अखिलसंसारस्यापि हानिर्भविता ।

गतशताब्द्यां मुद्रणकला भारते विकसिता ततःप्रभृति वेदग्रन्थानामपि मुद्रणं प्रारब्धम् । येषां ग्रन्थानां परंपरयाध्ययनं प्रचलति तेषां निर्दोषमुद्रणे तावत् काठिन्यं नासीत् । परं ये ग्रन्थाः लिखितमात्ररूपेणोपलब्धाः तेषां शुद्धरूपेण मुद्रणं न तथा सुकरं भवति । यत् किंचित् लिखितपुस्तकं स्वीकृत्य तदनुसारि मुद्रणं कृतं चेत् तत्र बहवो दोषाः संभवन्ति । बहूनि लिखितपुस्तकानि सम्यक् परीक्ष्य तेषां तारतम्येन उपयोगं कृत्वा ग्रन्थः संपादितश्चेत् स शुद्ध उपयोगार्हश्च भवति । अनया रीत्या केचन वेदग्रन्था भारते अन्यदेशेषु च प्रकाशिता वर्तन्ते । परं केषांचन मुद्रितग्रन्थानां निपुणमन्वेषणमावश्यकं भवति । इदानीं ये ग्रन्थाः प्रकाश्यन्ते तेषु प्रायः इयं शास्त्रीया रीतिरवलम्ब्यते। तां रीतिमवलम्ब्य केषांचन प्रकाशनं कर्तव्यं भवति । अस्मिन् विषयेऽस्माकं सुहृद्वर्यैः राधेश्यामशास्त्रिभिः शोभनीयाः प्रयासाः अनुष्ठिता अनुष्ठीयन्ते च । ते अभिनन्दनार्हाः ।

वेदार्थज्ञानपूर्वकश्रौतस्मार्तकर्मानुष्ठानमिदानी विमर्शनीयम्। श्रुतिमन्त्राणा श्रुत्युक्तकर्मभि साक्षात् सबन्धो भवति । 'वेदा हि यज्ञार्थमभिप्रवृत्ता ' इति वेदाङ्गज्योतिषे उक्ति । 'अग्निहोत्र जुहुयात् स्वर्गकाम ', 'दर्शपूर्णमासाभ्या स्वर्गकामो यजेत', 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादय श्रुतय तदेवाभिप्रयन्ति। सोऽय श्रौतधर्म प्राचीनतमे काले परमोत्कर्षावस्था गत आसीत्। आहिताग्निना कर्तव्याना विधीना निरूपणावसरे अनाहिताग्निनापि अनुष्ठेया विधय शैथिल्यमवगमयन्ति । तत उत्तर पुराणेषु कलिवर्ज्यप्रकरणे 'अग्निहोत्र गवालम्भ ' इत्यादिवचनेषु केषाचन श्रौतकर्मणामेव निषेध प्रदर्शित । एव क्रमेण श्रौतधर्माचरणे अधिकाधिक शैथिल्यमागतमिति स्पष्ट प्रतीयते । अधुनोत्तरभारते आहिताग्नय क्वचिदिव दृष्टिपथमायान्ति । दक्षिणभारते केचन श्रौतधर्माभिमानिन परिस्थिते प्रातिकूल्येऽपि श्रौतकर्मानुष्ठान यावच्छक्य विधिपूर्वक निर्वर्तयन्ति । गता शताब्दीमारभ्य भारते तेषु तेषु स्थानेषु कै कै आहिताग्निभि का का वेदशाखा अनुसृत्य के के सोमयागा अनुष्ठिता इत्यस्य विषयस्य विस्तृत प्रपञ्च कस्यचन पाश्चात्यविदुष सहकारेण एकस्मिन् निबन्धे दश-पञ्चदशवर्षेभ्य प्राक् मया कृत । एफ् स्टाल्महोदयेन प्रकाशिते केरळदेशीयसाग्निचित्यातिरात्रयागानुष्ठानस्य इतिवृत्ते अग्नि' इत्याख्ये ग्रन्थे स प्रकाशितोऽस्ति ।

ब्राह्मणमात्रोक्तविधिमनुसृत्य यागस्यानुष्ठान न तावत्सुकरम्। श्रौतसूत्राणि स्वशाखीय यागविधि क्रमेण विस्तरेण च प्रतिपादयन्ति। तत्रापि सूत्रभेदेन क्वचिद् वैमत्य भवत्यवान्तरकर्मसु । ब्राह्मणेषु यानि विध्यपराधप्रायश्चित्तानि विहितानि ततोऽधिकानि सूत्रेषूपलभ्यन्ते । ततोऽप्यधिकानि प्रयोगनिबन्धेषु । तदेतन्निपुणं द्योतयति यत् कालभेदेन स्थलभेदेन च यागविधिषु अपरिहार्यत्वेन किचित् परिवर्तन जातम् । यागे या पशुहिसा सा अहिसेति यद्यपि जैमिन्यादिभिराचार्यैरुद्घोषित तथापि आधुनिका साधारणजना , परमार्थविद , अन्यधर्मानुयायिनश्च नेद समन्यन्ते । पुराणादिग्रन्थेषु महाक्रतूनामनुष्ठानापेक्षया तीर्थविशेषस्नानेन अधिक पुण्य लभ्यत इति वारवार मण्डितम्। आचरणसपन्नाना विदुषा यजमानाना दौर्लभ्यात् कुशलानामृत्विजा दुरधिगम्यत्वात् च श्रौतधर्माचरण क्रमेण ह्रास गच्छति । इद समवलोक्य इत उत्तर श्रौतधर्मस्य रक्षा कथ कर्तव्येति प्रश्न समुद्भवति । ये तावत् स्मार्ता सस्कारा तेषामपि स्थितिरेतादृश्येव दृश्यते। गृह्यसूत्रेषु स्मृतिषु च प्रतिपादिता ये षोडश सस्कारा तेषु कियतामनुष्ठानमिदानी प्रचलतीति विमृशन्त्वत्रभवन्त । उपनयन विवाह अन्त्येष्टिरित्येत एव सस्कारा यथाकथचित् स्थलभेदेन परिस्थितिभेदेन चानुष्ठीयन्ते । विवाहोत्तरमौपासनोऽग्नि कियद्भि धार्यते कियन्तश्च सायप्रातर्होम कुर्वन्ति पाकसस्थाश्चानुतिष्ठन्तीति विचारणीयम्। एव गृहस्थधर्म पौरोहित्यज्ञान च ह्रास गच्छत इत्यनुभूयते । स्मार्तधर्मस्येद दैन्य निरस्य तस्य पुन स्थापन सपादयितु शक्य भवेन्न वा इति गभीरविचारस्याय विषय ।

वेदार्थज्ञानावस्था तावत् समीक्षामहे । यथा वेदस्य शाब्दज्ञानसम्पादनमावश्यक तद्वत् अर्थज्ञानग्रहणमप्या-वश्यकम्। 'योऽर्थज्ञ इत् सकल भद्रमश्नुते' इति श्रुति यास्काचार्यै निरुक्ते उदाहृता । श्रौतकर्मण अनुष्ठानेन यत् फल प्राप्यते तत् तस्य कर्मणो ज्ञानेनापि लभ्यते इति ब्राह्मणेषु 'य एव वेद' इति शब्दै वार वार स्पष्टीकृतम्। वेदस्य वेदोक्तकर्मणश्च सम्यग्ज्ञानार्थं वेदाङ्गानि रचितानि । तथा च मुण्डकोपनिषच्छ्रुति "द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेद सामवेदोऽथर्ववेद शिक्षा कल्पो व्याकरण निरुक्त छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते" इति । शिक्षादिवेदाङ्गानि वेदार्थज्ञानसपादने श्रौतकर्मविषयकज्ञानसपादने च तैस्तै प्रकारै साहाय्य कुर्वन्ति । तत्र शब्दार्थसबन्धनिश्चितौ निघटुसहित निरुक्त बहूपकारकम् । नामान्याख्यातजानि इति सिद्धान्तमनुसृत्य यास्काचार्यै बह्व्यो निरुक्तय उपपादिता । तासु काश्चन वैकल्पिक्योऽपि भवन्ति । रूपसिद्धौ व्याकरणशास्त्र प्रमाणम्। एव शब्दार्थज्ञाने निरुक्तव्याकरणे महदुपकुरुत । ता दिशमनुसृत्य अर्वाचीनकाले विकसितयो निरुक्तव्याक-रणशास्त्रयोरुपयोगेन वेदार्थज्ञानसपादने प्रत्यवायो मा भवतु। तैत्तिरीयारण्यके ब्रह्मयज्ञप्रकरणे स्वाध्यायब्राह्मणे श्रुतम् -

'यद् ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशंसीः' इति । ब्राह्मणानां मन्त्रार्थज्ञानसाहाय्यं स्पष्टमेव । इतिहासपुराणशब्दयोर्व्याख्याने सायणाचार्यैरुक्तं 'इतिहासा महाभारतादयः । पुराणानि ब्रह्माण्डादीनि ।' विकल्परूपेण तैरेवमपि व्याख्यातम् - 'यद्वा इतिहासा देवासुराः संयत्ता' इत्यादयः । 'आत्मा वा इदमेक एवाग्र आसीत्' इति पुराणानि ।

ऋक्संहिताभाष्यस्योपोद्घातेऽपि सायणाचार्यैरयं विषय उपन्यस्तः - "षडङ्गवत् पुराणादीनामपि वेदार्थज्ञानोपयोगो याज्ञवल्क्येन स्मर्यते -

**पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥इति ।**
**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।**
**बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरेदिति ॥**

इत्यत्रापि स्मर्यते । ऐतरेयतैत्तिरीयकाठकादिशाखासूक्तानि हरिश्चन्द्रनाचिकताद्युपाख्यानानि धर्मब्रह्मावबाधापयुक्तानि तेषु तेष्वितिहासग्रन्थेषु स्पष्टीकृतानि । उपनिषदुक्ताः सृष्टिस्थितिलयादयो ब्राह्मपाद्मवैष्णवादिपुराणेषु स्पष्टीकृताः ।

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।**
**वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥**

इति सृष्ट्यादेः पुराणप्रतिपाद्यत्वावगमात् ।"

एवं वेदेषु ये इतिहासपुराणानामंशाः तेषामेव विस्तारो महाभारतपुराणादिषु कृतोऽस्ति इति तेऽपि ग्रन्था वेदार्थज्ञानोपकारका इति सायणाचार्याणामाशयः । न्यायशास्त्रं पूर्वोत्तरमीमांसे कर्मशास्त्रं चेत्येतेषामपि वेदाङ्गैः वेदैश्च सह विद्यास्थानेषु अन्तर्भावः कृतोऽस्ति याज्ञवल्क्येन । एतानि सर्वाणि साधनानि संदर्भानुसारेणोपयुज्य वेदार्थज्ञाने प्रयासः कर्तव्यः इति प्राचीनानामाचार्याणामाशयः । निरुक्तं व्याकरणम् इतिहासाः पुराणानि इत्येते घटका एतादृशाः सन्ति येषु इदानींतने कालेऽपि उपलभ्यमानं प्रामाणिक ज्ञानं वेदार्थज्ञाने उपयोजनीयम् । वेदार्थज्ञानविषये आधिभौतिकम् आधिदैविकम् आध्यात्मिकम् इति पक्षाः तथा च ऐतिहासिकाः, नैरुक्ताः, वैयाकरणाः याज्ञिका इति बहवः पक्षा मन्त्रार्थज्ञानार्थं तेषु तेषु स्थलेषु व्याख्यातृभिराश्रीयन्ते। तत्र मन्त्रद्रष्टुः रचयितुर्वा क आशय इति वक्तुं दुष्करम् । एवं सति निरुक्तव्याकरणादिविषयेषु यत् प्रामाणिकं ज्ञानं तत्तेषा विदुषा परिश्रमेण उपलब्ध, तस्य साहाय्य वेदार्थाविष्काराय स्वीकृतं चेत्, न दोषाय, अपि तु उपकारायैव भवेत् ।

वेदस्य शाब्दज्ञानम् अर्थज्ञानम् अर्थज्ञान-पूर्वकानुष्ठानज्ञानं च कथं रक्षणीयं वर्धनीयं चेति तत्र बद्धादराणां चिन्ताया विषयः । भारते तत्र तत्र ये वैदिका पण्डिताश्च निवसन्ति तेषां साहाय्यमस्मिन् कार्ये उचितया रीत्या सपादनीयम् । पर तावन्नालम् । भारते-विशिष्य दक्षिणभारते वेदशास्त्रकेन्द्रमेकं निर्मेयम् यत्र तासु तासु वेदशाखासु निष्णाता वैदिकाः स्वकीयपुत्रादीन् शिष्यांश्च वेद पाठयेयु. । तेषु केचन आहिताग्नय. श्रौतकर्मानुष्ठानविशारदाश्च स्युः । तेषा सकुटुम्बं निवसता समुचिता आवासादिव्यवस्था कार्या । प्रतिवत्सरं कानिचन श्रौतकर्मानुष्ठानानि भवेयु । तदर्थं यागशाला निर्मेया । कृषिक्षेत्र उद्यान ग्रन्थालयः सभास्थानम् इत्यादीनि उपाङ्गानि संपादनीयानि । वेदाध्ययनं श्रौतस्मार्तकर्मानुष्ठानं च तत्र अविरतं प्रचलेदेतदर्थं सर्वा व्यवस्था करणीया । केन्द्रस्यास्य आर्थिकभारः राज्यशासनेन केन्द्रशासनेन विश्वस्तनिधिभिश्च सोढव्यः । वेदविषये श्रौतस्मार्तविषये च येषां जिज्ञासा भवेत् एतद्देशीयानां परदेशीयानां वा तेऽत्र आगत्य समाधानं लभेरन् । मल्लादिप्रतिष्ठानम् आंध्रप्रदेशे कृष्णातीरे वेदशास्त्रगुरुकुलं स्थापयितुं प्रयतते । तस्य प्रयासा अचिरेण सफला भवन्त्विति सर्वे वयं कामयामहे । अन्येऽपि ये केचन एतादृशकार्यरताः तेषामपि यशःप्राप्तिमाशास्महे।

परिषदोऽस्याः कार्यकलापः वेदशास्त्ररक्षाकार्यं प्रगतिपन्थानं नयत्विति श्रीलक्ष्मीवेङ्कटेशं साञ्जलिबन्धं प्रार्थये ।

VS - I-1

# कृष्णयजुर्वेदस्य वैशिष्ट्यम्

प्रोफेसर् वि. कुटुम्बशास्त्री
पाण्डिच्चेरी

**"गजत्रातेति वृद्धाभिः श्रीकान्त इति यौवतैः ।
यथास्थितश्च बालाभिः दृष्टः शौरिः
सकौतुकम् ॥"** [1]

इत्यय श्लोकः ज्ञातचर एव उल्लेखालङ्कारस्य उदाहरणतया प्रतिपाद्यमान। अय श्लोक व्यावहारिक उल्लेखालङ्कार स्पष्टयन्नपि शाश्वतिक किञ्चित् तत्त्वान्तरमपि सूचयति इति विभावयामि । वस्तुतः अभिन्नस्यापि तत्त्वस्य द्रष्टृपुरुषगतशक्तिवयोवस्थाभेदेन भिन्नभिन्नरूपै. आविष्कारो जायते इति अनिराकरणीयमेतत्। न हि दशवर्षदेशीयः बालक· स्वेन सगतायामपि रूपवयोलावण्यै· पराजितदेवकन्यायामपि कन्याया रतिभावकरणे रतिभावप्राप्तौ वा समर्थो भवति । एवमेव अनभिधेयानाम् अनुभवमात्रैकगम्याना सूक्ष्माणा गहनानाम् अलौकिकाना विचाराणामवगमने आत्मसात्करणे च सस्कारविशेषस्य कारणता न केनापि प्रतिक्षेप्तु शक्या ।

ये विचाराः अर्थविशेषाश्च वेदेषु प्रतिपादिताः ते वशीकृतसमाधिस्थितिभि सत्त्वोद्रेकसप्लावितान्तःकरणैः प्रत्यङ्मुखैः महर्षिभिः निर्जितद्वन्द्वत्वात् लोककल्याणैकहेतुकतया अभ्युदयनिःश्रेयससाधनानि विचिन्वानैः साक्षाद्दृष्टाः, अनुभवानुरूपया वाचा व्यञ्जिताश्च वर्तन्ते। नैषा वाक् तैः विरचिता· किन्तु तथैव दृष्टा ।

महर्षीणा वेदद्रष्टृत्वकथने नास्ति अश्रद्धेय किञ्चिदपि। य एव सर्वशक्त परमेश्वर स्वसङ्कल्पमात्रेण आधिदैविकाध्यात्मिकाधिभौतिक जगत् प्रतिनियत–देशकालनिमित्तक्रियाफलाश्रय मनसाप्यचिन्त्यरचनारूप सर्वजनप्रत्यक्षत्वात् अनपलपनीय स्रष्टु प्रभवति स कथ न प्रभवति आत्मन स्वरूपक्रियाशक्तिप्रभावैश्वर्यज्ञानौपयिक, स्वप्राप्त्यौपयिक च ज्ञान तदधिकारिषु जनयितुम् । अत एव बृहदारण्यके श्रूयते– "अस्य महतो भूतस्य निःश्वसित यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः"[2] इति ।

अतः नास्त्यत्र विस्मयः, न चाश्रद्धेय किञ्चित् यत् तपस्समाधिसम्पन्नै. महर्षिभिः दृष्टाः एव वेदा·– न रचिता. इति । तथाहि;

**"यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन्नृषिषु प्रविष्टाम्।**

**तामाभृत्या व्यदधुः पुरुत्रा ता सप्तरेभा अभि स नवन्ते॥"** [3]

इत्येषा ऋक् तपस्यता महर्षीणा मन्त्रदर्शनप्रकार वर्णयति । ये ये वेदान् पश्यन्ति तेषा सर्वेषा दर्शनविषयो न भवति वेद, ये ये शृण्वन्ति वेदान् तेषा सर्वेषा श्रवणविषयो न भवति वेद, अपि तु कस्मैचिदधिकारिणे ते वेदा स्वयमात्मनो रूप प्रकाशयन्ति इति कथयति एषा ऋक् –

**"उत त्व पश्यन् न ददर्श वाचमुत त्वः शृण्वन् न शृणोत्येनाम् ।**

**उतो त्वस्मै तन्वा विसस्रे जायेव पत्य उशती सुवासाः ॥"[4]**

यथैव हि एकस्य सत कृष्णस्य द्रष्टृभेदात् भिन्नतया अवगम तथैव तत्तदधिकार तत्तदिच्छा तथा तत्तत्स्वीकृतार्थावगमनपद्धतीना वैविध्य च निमित्तीकृत्य वेदार्थोऽपि बहुभि बहुधा प्रपञ्चित । अनेकविद्यास्थानोपबृंहितस्य प्रदीपवत् सर्वार्थविद्योतिन सर्वज्ञानाकरस्य ऋग्वेदादे वेदसमुदायस्य प्रतिपाद्यार्थोन्नयने सर्वाण्यपि व्याख्याप्रस्थानानि स्व स्व महत्त्व यथोचित प्राप्य विराजन्ते । आदेयानि चैतानि सर्वाणि यथायोग्य यथावसरञ्च ।

वेदार्थावगमप्रस्तावे वय ब्राह्मणग्रन्थाना निरतिशय महत्त्व तथा प्रामाण्य च उत्पश्याम । तथाहि, वेद इति शब्द 'विद ज्ञाने' इति धातो निष्पन्न । तस्य च निर्वचन सायणाचार्यै एवमकारि – "इष्टप्राप्त्यनिष्टपरिहारयो अलौकिकमुपाय यो ग्रन्थो वेदयति स वेद "[5] इति । स च द्वेधा विभक्त मन्त्रभाग ब्राह्मणभागश्च इति । "मन्त्रब्राह्मणयो वेदनामधेयम्"[6] इति कथनात् । " याज्ञिकाना समाख्यान लक्षण दोषवर्जितम् तेऽनुष्ठानस्मारकादौ मन्त्रशब्द प्रयुञ्जते ॥"[7] इति जैमिनिसिद्धान्तमनुसृत्य अनुष्ठानस्मारका मन्त्रा, तद्भिन्नो भागः ब्राह्मणमित्येव सिध्यति । मन्त्रब्राह्मणयोरेव वेदनामधेयमिति स्वीकारे "यद् ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशसीः"[8] इत्यादिना तैत्तिरीयारण्यके मन्त्रब्राह्मणव्यतिरिक्ततया पठिताना इतिहास–पुराण–कल्प–गाथा–नाराशसीना वेदभागाना वेदत्व कथ सिध्यति ? इत्याशङ्क्य श्रीसायणाचार्य इतिहासादीनामपि विप्रपरिव्राजकन्यायेन ब्राह्मणाद्यवान्तरभेदतामेव दृढयति । तथाहि, "भागद्वयाङ्गीकारेण मन्त्रव्यतिरिक्तो भागो ब्राह्मणमिति लक्षणस्य निर्दोषत्वात् । ननु ब्रह्मयज्ञप्रकरणे मन्त्रब्राह्मणव्यतिरिक्ता इतिहासादयोऽपि भागा आम्नायन्ते । "यद् ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशसी" इति मैवम् । विप्रपरिव्राजकन्यायेन ब्राह्मणाद्यवान्तरभेदानामेव इतिहासादीना पृथगभिधानात् । "देवासुरा सयत्ता आसन्" इत्यादय इतिहासा । "इद वा अग्र नैव किञ्चनासीत्", "न द्यौरासीत्" इत्यादिक जगत प्रागवस्थामुपक्रम्य सर्गप्रतिपादक वाक्यजात पुराणम् । कल्पस्तु आरुणकतुकचयनप्रकरणे समाम्नाते इति मन्त्रा कल्पोऽत ऊर्ध्वं यदि बलिहरेत्" इति । अग्निचयने "यमगाथाभि परिगायति" इति विहिता मन्त्रविशेषा गाथा । मनुष्यवृत्तान्तप्रतिपादका ऋचा नाराशस्य ।"[9] इति ।

अत्रेदमवधेयम् । इतिहासादीनामुदाहरणरूपेण एकक वाक्यमुदाहरन्नपि सायणाचार्य नाराशसीनाम् उदाहरणमपि न ददाति । एतत्सूचयति वेदर्षीणा तथा साम्प्रदायिकतद्व्याख्यातॄणा च वेदस्वरूपावगतौ विलक्षणा दृष्टि । प्रमाणान्तरसिद्धार्थबाधने वेदवाङ्मयस्य तात्पर्य नास्ति । नास्ति च साम्प्रदायिकाना लौकिकार्थावबोधने वेदमुखप्रेक्षिता । वेदस्थान् अलौकिकान् सुखप्राप्तिदुःख–परिहारोपायान् अन्वेतु व्याख्यातुमेव ब्राह्मणग्रन्थानारभ्य साम्प्रदायिकाना व्याख्यानानि प्रवर्तन्ते ।

"पराञ्चि खानि व्यतृणत् स्वयभू तस्मात् पराङ् पश्यति नान्तरात्मन्" इति न्यायेन पराग्दृष्टीना, दृष्टानुभूतचराणामपि तत्त्वानामुपायाना भूयो भूय दर्शने कृतमनस्काना, परात्तत्त्वग्रहणे अन्यत्रोपयुक्ताना गवेषणविधीना आश्रयणेन वेदार्थानुसन्धाने प्रवृत्तानाम्, अत एव तद्गतेतिहासपुराणगाथानाराशसीना ऋचा यत्किञ्चिदर्थप्रतिपादन कथमपि यथायोग्य कृतकृत्याना, असाम्प्रदायिकव्याख्यातॄणा व्याख्यानानि तेष्वेव विषयेषु श्रद्धेयानि भवन्ति ।

वेदगतानाम् अलौकिकार्थतदुपायाना व्याख्यानविषये परम्पराया अनादरणे तत्त्वाधिगमो न भवत्येव । स्वभावत

अस्पष्टाना पारिभाषिकपदघटिताना लोकसिद्धपद-पदार्थव्याख्यानशक्त्या दुरुन्नेयतत्त्वार्थविचारसम्भरिताना ऋचा मन्त्राणा च व्याख्या अलौकिकेनेव वाक्यसमूहेन तैरेव मन्त्रद्रष्टृभि करणीया, कर्तु शक्या च अभवत् । अत एव ब्राह्मणग्रन्थानामाविर्भाव समजायत । एव ऋग्यजुस्सामसु पठिताना मन्त्राणा कुत्र कीदृश किफलश्च विनियोग इत्यपि अलौकिकार्थत्वात् वेदेनेव प्रतिपाद्य मन्त्रद्रष्टृभि एव बोधयितव्यश्च वर्तते । अत एव ब्राह्मणग्रन्था मन्त्रविनियोग प्रदर्शयितु प्रवृत्ता वर्तन्ते । एव ब्राह्मणग्रन्थाना प्राधान्येन प्रयोजनद्वय सिद्धम् ।

अत एव "इत्याह" "इत्याहु" "ब्रह्मवादिनो वदन्ति" इत्यादीनि वाक्यानि वय भूयो भूय शृणुम । वेदाध्येतॄणा वेदाना कण्ठस्थीकरणे कण्टकायमानानि इमानि वाक्यानि अत्यन्तसरलया सुन्दरया स्वासाधारणपद्धत्या वेदार्थ प्रपञ्चयन्ति। तथाहि; "श्रेष्ठतमाय कर्मणे"[10] इत्यत्र कि तत् श्रेष्ठतम कर्म इति जिज्ञासाया किमस्ति प्रमाणान्तर येन वय निश्चय प्राप्नुम ? नास्ति किञ्चिदपि ऋते ब्राह्मणवाक्यम् - "श्रेष्ठतमाय कर्मण इत्याह । यज्ञो हि श्रेष्ठतम कर्म । तस्मादेवमाह"[11] इति । सायणाचार्या एव लिखन्ति - "तस्य मन्त्रस्य पूर्वभाग स्थितस्य सवितृपदस्य तात्पर्य व्याचष्टे 'देवो व सविता प्रार्पयत्वित्याह-प्रसूत्य' इति । प्रेरणाय इत्यर्थ । . अस्य मन्त्रस्य प्रथमभागे देवभागमिति पदस्य तात्पर्य व्याचष्टे- 'आप्यायध्वमध्नि या देवभागमित्याह-वत्सेभ्यश्च वा एता पुरा मनुष्येभ्यश्चाप्यायन्त । देवेभ्य एवैना इन्द्रायाप्याययति'।.. वेदेऽपि तत्र तत्र तत्त्वविचारपूर्वक सन्देहापनयनमुपलभामहे । 'उपस्थेयोऽग्निर्नोपस्थेय इत्याहु । मनुष्यायेन्न्वै योऽहरहरावृत्याथैन याचति स इन्न्वै तमुपार्छति, अथ को देवानहरहर्याचिष्यतीति, तस्मान्नोपस्थेय , अथो खल्वाहुराशिषा वै क यजमानो यजते, इत्येषा खलु वा आहिताग्ने राशीर्यदग्निमुपतिष्ठते, तस्मात् उपस्थेय ।' तत्रैव नवमानुवाके क्रेतव्ये सोमे पतित तृणादिकम् अपनेय न वेति विचारितम् - ब्रह्मवादिनो वदन्ति, विचित्या सोमा न विचित्या इति ।"[12]

एतेन सुनिश्चितमिद यत् ब्राह्मणानि वेदाना प्रथमव्याख्यानभूतानि । तानीमानि वेदार्थावगतौ अपरिहार्याणि। केचन असाम्प्रदायिका ब्राह्मणाना संहिताभ्य अर्वाचीनत्व भिन्नकर्तृकत्व च सिद्धवत्कृत्य वेदार्थविचारे तेषामनपेक्षितत्व कदाचित् प्रतिबन्धकत्वमपि आचक्षते । परन्तु अङ्गीकृतेऽपि तेषा संहिताभ्या ब्राह्मणानामर्वाचीनत्वपक्षे निर्विवादमिद तु सिध्यति यत् उपलभ्यमानग्रन्थजात वेदार्थविषयक प्रथम व्यवसाय ब्राह्मणेष्वेव कृतो वर्तते इति । किञ्च संहिताकालात् अनतिचिरमेव काल ते ब्राह्मणाना स्वयमङ्गीकुर्वन्ति । एवञ्च पूर्वोक्तक्रमेण पारिभाषिकालौकिकोपायबहुलाया वेदसंहताया अर्थस्मृति ब्राह्मणकाले अविच्छिन्ना, स्थिरा, यथार्थरूपा चासीदिति प्रत्येतु शक्नुम यत कालव्यवधान न्यूनमस्ति । यानि तु असाम्प्रदायिकानि व्याख्यानानि ह्य परह्य प्रवृत्तानि तेषा कालस्य संहिताकालस्य च अत्यन्तव्यवहितत्वात् अर्थस्मृते प्रसङ्ग एव नास्ति । एवञ्च स्वकपोलकल्पितोहापोहरूप प्रमाणे ते वेदार्थमुपवर्णयितु प्रवर्तन्ते । अत वेदार्थविचारे ब्राह्मणान्यारभ्य तद्व्याख्यानरूपा या साम्प्रदायिकपारम्परिकव्याख्यानपद्धति सैव श्रद्धेया, न तु असाम्प्रदायिकार्वाचीनव्याख्यानपद्धति इति प्रतीम । वेदाना अतात्पर्यविषयभूतेषु इतिहासादिषु विषयेषु प्रमाणान्तररपि शक्यग्रहेषु यथासम्भव द्वयोरपि व्याख्यानपद्धत्यो युक्तता इति व्यवस्था प्रामाणिकी मन्यामहे ।

अथ ब्राह्मणेषु कृतमपि वेदव्याख्यानम् असङ्गतमेव, वेदहृदयमज्ञात्वैवापरिपक्वबुद्धिभि कृत च इति वदेयु तर्हि अनुवर्तमानायामपि वेदाध्ययनपरम्परायाम् अर्थस्मृति ब्राह्मणकाले एव नष्टा इत्यकामनाप्यभ्युपगन्तव्यम् । कृते चास्मिन् अभ्युपगमे ब्राह्मणकालत अनतिपूर्वे एव स्थिरीकृतो य वेदसंहिताकाल तेषामत्यन्ताभिमत सिद्धान्त स सिकताकूपायेत । यतो हि अनुवर्तमानायाम् अध्ययना-ध्यापनपरम्पराया अर्थस्मृते विच्छेद महान्तमेव मध्यवर्तिन कालमपेक्षेत ॥

कृतेनैतेन विचारेण इद सिध्यति यत् ब्राह्मणग्रन्थाभावे तदध्ययनाभावे वा अपूर्णतैव संहिताध्ययनस्य । न केवलमपूर्णता अपि तु प्रयोगस्य अर्थस्य च परिज्ञानाभावात् निष्फलतापि भवेत् । एव सति अद्यत्वे उपलभ्यमानेषु

वेदेषु यजुर्वेदस्यैव ब्राह्मणानि ग्रन्थप्रमाणेन, वेदत्रयान्तर्गतमन्त्राणां तत्तत्कर्मसु विनियोगप्रदर्शने, तथा क्वचित् तदर्थबोधनेन च महत्त्वमावहन्ति। किञ्च यजुर्वेदे एव ब्राह्मणभागानामपि नियमेनाध्ययनाङ्गत्वेनाध्ययनम् अद्यत्वे पश्यामः ।

यजुर्वेदीयब्राह्मणानाम् अस्त्यन्यदपि वैशिष्ट्यम् । यजुर्वेदस्यास्ति समाख्या अध्वर्युवेद इति । तथाहि, सायणाचार्यो वदति – "अध्वर्युवेदत्वं चास्य अनादिसिद्धयाज्ञिकसमाख्याबलात् अवगन्तव्यम्"[13] इति । यज्ञकर्मणि अध्वर्युरेव प्रधानऋत्विक् । अध्वरं यज्ञं युनक्ति इति व्युत्पत्त्या अपि तस्य प्राधान्यमवगम्यते । आनुपूर्व्या कर्मणां स्वरूपं सर्वमपि साकल्येन जानीयात् अध्वर्युरेव । होत्रादीनां तु याज्यापुरोनुवाक्यानां पठनसामर्थ्यमात्रापेक्षं आर्त्विज्यम् । वेदेषु यजुर्वेद एव कर्मकाण्डविषये प्रधानः । अत एव यजुर्वेदस्य भित्तिस्थानीयता ऋक्साम्नोः चित्रस्थानीयता च प्रतिपादयति सायणाचार्यः –"कर्मकाण्डविषये यजुर्वेदस्यैव प्राधान्यात् । आनुपूर्व्या कर्मणां स्वरूपं यजुर्वेदे समाम्नातम् । तत्र विशेषापेक्षायाम् अपेक्षिता याज्यापुरोनुवाक्यादयः ऋग्वेदे समाम्नायन्ते, स्तोत्रादीनि तु सामवेदे । तथा सति भित्तिस्थानीयो यजुर्वेदः, चित्रस्थानीयावितरौ ।"[14]

यत एवम् अत एव यजुर्वेदीयब्राह्मणानि परिमाणेन महान्ति, नियमेनाध्येतव्यानि च भवन्ति । अन्यथा कर्मस्वरूपेतिकर्तव्यताज्ञानाभावात् यजुर्वेदसाध्यम् आध्वर्यवं फलं न सिध्येत् । तत्र शुक्लयजुर्वेदमन्त्राणां ब्राह्मणानां च पृथक् पृथक् विनिवेशनात् बुद्धेः नैर्मल्यस्य हेतुत्वात् शुक्लयजुर्वेद इति, कृष्णयजुर्वेदे च मन्त्रब्राह्मणयोः होत्राध्वर्यवयोः व्यामिश्रणेन ग्रथनात् बुद्धिमालिन्यहेतुर्भवतीत्यतः कृष्णयजुर्वेद इति च व्यवहारः अजायत।

> **"शुक्लं कृष्णमिति द्वेधा यजुश्च समुदाहृतम् ।**
> **शुक्लं वाजसनं ज्ञेयं कृष्णं तु तैत्तिरीयकम् ॥**
> **आध्वर्यवं क्वचित् हौत्रं क्वचिदित्यव्यवस्थया ।**
> **बुद्धिमालिन्यहेतुत्वात् यजुः कृष्णमितीर्यते ॥**
> **व्यवस्थितप्रकरणं तद्यजुः शुक्लमीर्यते ॥"**[15]

अत्र यद्यपि बुद्धिमालिन्यहेतुत्वं कृष्णयजुर्वेदस्य कथितं तत्र संहिताब्राह्मणभागानां व्यवस्थाभावमात्रप्रतिपादनपरं ज्ञेयम् । यतो हि पूर्वं सुविस्तरं प्रतिपादितं यत् ब्राह्मणानि मन्त्राणां व्याख्यानानि तथा विनियोजकानि चेति । तेषामभावे असम्पूर्णता, निष्फलता च वेदाध्ययनस्य इति । तादृशानि ब्राह्मणानि बुद्धिमालिन्यं न संपादयन्ति । प्रत्युत अत्यन्तापेक्षितकर्मस्वरूपेतिकर्तव्यताज्ञापनद्वारा तत्तन्मन्त्राणां सार्थकतां प्रतिपादयन्तीति बुद्धेः वैमल्यहेतव एव भवन्ति । अतो नास्ति मन्त्रब्राह्मणयोः मेलने दोषः । अपि चास्ति अतिशयः, तादृशस्य मेलनस्य अत्यन्तापेक्षितत्वात् । इदमेकं वैशिष्ट्यं कृष्णयजुर्वेदस्य ।

'यज देवपूजासंगतिकरणदानेषु' इति धातोः उत्पन्नः यजुःशब्दोऽपि वेदस्यास्य कर्मकाण्डसम्बन्धितां स्पष्टयति । "शेषे यजुःशब्दः"[16] इति जैमिनिसूत्रव्याख्याने शबरस्वामी एव व्याख्याति यत् "या न गीतिः, न च पादबद्धं, तत् प्रश्लिष्टपठितं यजुः" इति । अत्र पादबन्धादिगतिप्रतिबन्धकानां अभावात् सहजा, ललिता च मन्त्राणां गतिर्दृश्यते तैत्तिरीये । अत एव श्रवणसुखस्याधिक्यं तैत्तिरीयपाठे अनुभवामः । किञ्च मध्ये मध्ये व्याख्यानात्मकग्रन्थभागानां सन्निधानात् लौकिकसंस्कृते कृतव्युत्पत्तेः पठितुः इतरशाखापेक्षया पठनसमसमये ईषत्स्पष्टास्पष्टरूपोऽर्थबोधोऽपि तैत्तिरीये अनुभूयते । इदमन्यद्वैशिष्ट्यं कृष्णयजुर्वेदस्य ।

अस्य च यजुर्वेदस्यादौ ब्रह्मसम्प्रदायनाम्ना, आदित्यसम्प्रदायनाम्ना च सम्प्रदायद्वयमासीत् । तत्र कृष्णयजुर्वेदः ब्रह्मसम्प्रदाये शुक्लयजुर्वेदश्च आदित्यसम्प्रदाये अन्तर्भवतीति शतपथब्राह्मणतः जानीमः । अस्य यजुर्वेदस्य एकोत्तरशतं शाखाः आसन्निति "एकशतमध्वर्युशाखाः" "यजुरेकशताध्वकम्" इत्यादिवचनैः ज्ञायते । कुरुक्षेत्रस्य यमुनाशुतुद्रीनद्योश्च मध्यदेशे कृताविष्कारोऽयं वेदः क्रमेण उत्तरभारते शुक्लयजुर्वेदप्राचुर्येण, दक्षिणदेशे कृष्णयजुर्वेदप्राचुर्येण च अद्यत्वे प्रवर्तमानो दृश्यते । कृष्णयजुर्वेदस्य षडशीतिशाखा आसन्निति विविधप्रमाणेभ्यः अवगच्छामः । तत्र द्व्यशीतिशाखानां लोपे जाते अद्यत्वे चतस्रः एव शाखाः अध्ययनाध्यापन–

परम्परायामनुवर्तन्ते । ताश्च- ा, मत्रायणीयशाखा, कठशाखा, कपिष्ठलशाखा चेति । विशिष्य च आन्ध्रदेशे कृष्णयजुर्वेदस्य तैत्तिरीयशाखा बहुलप्रचारे वर्तते । अस्या क्रमादयो विकृतिपाठा अपि प्रसिद्धा । आन्ध्रेषु घनपाठस्य सर्वातिशायिसम्प्रदाय अद्यापि अकुण्ठितया गत्या प्रवर्तते । न खलु कस्यापि वेदस्य कस्याश्चिदपि शाखाया ईदृश घनपाठ कुत्रापि भारते प्रसिद्ध । आन्ध्राणा वेदपाठसम्प्रदायसर्वस्वभूतोऽयमश कृष्णयजुर्वेद आश्रित्यैव प्रवर्तते । कृष्णयजुर्वेदे वर्णक्रमपाठोऽपि अत्यन्तविशेष। एतत् भवति वैशिष्ट्यमन्यत् कृष्णयजुर्वेदस्य ।

टिप्पणी -

1. अप्पय्यदीक्षित., कुवलयानन्द । स. भोलाशकरव्यास., चौखम्बा विद्याभवन, वाराणसी 1989, पृ 25.
2. बृहदारण्यकोपनिषत् - 2.4.10
3. ऋग्वेदसहिता - 10.71.3
4. तत्रैव - 10.71.4
5. सायणाचार्य तैत्तिरीयसहिताभाष्यम् । स. एन्. एस्. मान्तक्के, टि. एन्. धर्माधिकारी, वेदिकसशोधनमण्डलम्, पूना 1970, पृ. 2.
6. आपस्तम्बश्रौतसूत्रम्, 24 1.31
7. माधवाचार्य., जैमिनीयन्यायमाला, 2.1.23
8. तैत्तिरीयारण्यकम्, 2.9
9. सायणाचार्य., उदाहृतपूर्वम्, पृ. 26
10. तत्रैव, पृ. 15
11. तत्रैव, पृ. 15
12. तत्रैव, पृ 15-20
13. तत्रैव, पृ. 9
14. तत्रैव, पृ 9
15. सत्यश्रवा . वैदिक वाड् मय का इतिहास, प्रणव प्रकाशन, नई दिल्ली, 1978, पृ. 201
16. मीमासादर्शनम्, 2.1.37

•

# VEDIC SESSION - II

VS - II

# अध्यक्षभाषणम्

प्रोफेसर् मण्डनमिश्र
नवदेहली

परमाराध्यस्य भगवतो वेङ्कटेश्वरस्य सन्निधो तिरुमल तिरुपति देवस्थाने पूज्यचरणाना दिव्यात्मना काञ्चीशङ्कराचार्याणा तत्त्वावधाने समायोजितेऽस्मिन् राष्ट्रियवेदशास्त्रमहासम्मेलने देवस्थानेन वेदिक-सम्मेलनस्याध्यक्षतायै समामन्त्रित इत्यह केवल श्री-श्रीनिवासस्यानुग्रहप्रसाद मन्ये ।

अस्मिन् विशालतमे राष्ट्रे एकत्र भगवान् वेङ्कटेशोऽस्माक सर्वेषा श्रद्धाया आस्थायाश्च केन्द्रत्वेन विराजते, अपरत्र च तिरुमल तिरुपति देवस्थान स्वकीयेन प्रबन्धकौशलेन आध्यात्मिक-सास्कृतिक-शेक्षणिक-सामाजिक-सेवाविधानैश्च सर्वस्यापि विश्वस्य कृते प्रतिष्ठास्थानत्वेन भारतीयसस्कृते सनातनधर्मस्य च कीर्तिस्तम्भत्वेन राराजते । इदमस्य महासम्मेलनस्य समायोजन तस्यामेवशृङ्खलायामेकस्य सुमहत सङ्कल्पस्य सत्फल, तच्च गोविन्दस्यानुग्रहेण वेदशास्त्राणा सरक्षणाय सवर्धनाय च कल्पयिष्यत इत्यत्र नास्ति कश्चन सशीतिलेश ।

अस्मै सत्प्रयासाय तिरुमल तिरुपति देवस्थान तदधिकारिणश्च हृदयेन समभिनन्द्यन्ते । अस्मिन् महासम्मेलने वैदिकचर्चाया प्राथम्येनोपस्थान नूनमस्माक परम्परायै सम्मान । वेदा हि निधान ज्ञानविज्ञानयोरुद्गमस्थान सर्वेषामपि शास्त्राणा, सर्वोत्कृष्ट साधनमक्षय्यपुण्यावाप्तये, अनुपमा औषधयो भवरोगविनाशाय, मार्गदर्शिन समाजस्य, कुपथगामिना मानवाना सच्चारित्रिकशिक्षक इव सन्मार्गप्रवर्तका, वस्तुत सर्वस्यापि पृथ्वीमण्डलस्य कल्पतरवो विशेषतो भारतमातुश्च आत्मत्वेन सुप्रतिष्ठिता वर्त्तन्ते । वस्तुत इदमेव महासूत्र नेकरूपानपि भारतीयानेकरूपत्वेनाबध्नाति । अनेनेव महासूत्रेण मिथो विरुद्धान्यपि दर्शनानि पुराणानि साम्प्रदायिकाश्च सिद्धान्ता सर्वथा समाबद्धा । यथा ऋग्वेदे उक्तम् -

"एक सद् विप्रा बहुधा वदन्ति"

इत्येकमेव ब्रह्म अनेकधा व्याख्यायते । एक एव चात्मा सर्वभूतात्मत्वन एक एव देव इन्द्राग्निमित्रवरुणा- दिनानारूपेषु दरीदृश्यते । यथाक्त निरुक्ते यास्काचार्येण-

माहाभाग्याद् देवताया एक आत्मा बहुधा स्तूयते।
एकस्यात्मनोऽन्ये देवा प्रत्यङ्गानि भवन्ति ॥ इति
(नि देवतकाण्ड 7 1 4)

तथैवाय शब्दराशि विद्यास्थानानामात्मस्थाने स्थितो विविधानि रूपाण्याधत्ते । अत एव वेदा न केवल

भारतवर्षस्यापि तु समस्तस्यापि विश्वस्य महानिधित्वेन सम्मानिता । "विद्" सत्ताया, "विद्" ज्ञाने, "विद्" विचारणे, "विद्लृ" लाभे इति चतुर्भि धातुभि वेदशब्दनिष्पत्तिर्भवति । लोक प्रथममस्तीत्यङ्गीकृत्य तत्स्वरूप ज्ञातव्य, तदनन्तर विचार कर्त्तव्य, विचारानन्तर यल्लब्धव्य, तल्लाभार्थ व्यापारो विधेय । जानाति इच्छति अथ करोतीति ज्ञानेच्छाक्रियाक्रमोऽप्यत्रोदाहरणीय । ज्ञानमेव सर्वत सर्वाधारत्वेन ससारे सर्वत्र विलसति।

वेदा एव वस्तुत सर्वानुमत स्रोत तत्त्वज्ञानस्य । मीमासाशास्त्रे वेदस्यापारुषेयत्व नित्यत्व स्वत प्रामाण्य च निरूपितम् । ऋग्वेदे–

तस्मै नूनमभिद्यवे वाचा विरूप नित्यया
वृष्णे चोदस्व सुष्ठुतिम् ॥ (ऋ वेद 8 75 6)

एतस्मिन् मन्त्रे वचा यन्नित्यत्व प्रतिपादित तद् वस्तुत वदशास्त्राणा विषय एव । श्वताश्वतरोपनिषदि –

**यो ब्रह्माण विदधाति पूर्व यो वै वेदाश्च प्रहिणोति तस्मै।**
**त ह देवात्मबुद्धिप्रकाश मुमुक्षुर्वै शरणमह प्रपद्ये॥ (6 18)**

इत्यस्मिन् मन्त्रे स्पष्टमुद्घोषित यद् – ब्रह्मणोऽपि विधात्रा परमेश्वरेण ब्रह्मा विधीयत पर न वेदा विधीयन्ते । ते तु सर्वथा नित्यसिद्धा। ते परमेश्वरेण ब्रह्मणो निधि प्रहीयन्ते अर्थात् प्रेष्यन्ते । विद्यमानानामेव तेषा प्रेषण भवति । अत एव मत्स्यपुराणेऽपि कथितमस्य वेदस्य सर्वज्ञ कल्पादा परमेश्वरो व्यञ्जक केवल विप्रा, नैव कर्त्ता न सशय । पराशरोऽपि कथयति –

**न कश्चिद् वेदकर्त्ता स्याद्वेद स्मृत्वा चतुर्मुख ।**
**तथैव धर्मान् स्मरति मनु कल्पान्तरान्तरे ॥**
**"वेदो नारायण साक्षात्स्वयम्भूरिति शुश्रुम ।"**
**(श्रीमद्भाग 6 स्क)**
**"वेदस्य चेश्वरात्मत्वात् तत्र मुह्यन्ति सूरय ।"**

इत्यादिषु वेदस्य नारायणात्मकत्वमपि स्वीक्रियते। मनुरपि स्पष्ट प्रमाणयति –

**"धर्म जिज्ञासमानाना प्रमाण परम स्मृति"**
**"वेदाद् धर्मो हि निर्बभौ" "सर्व वेदात् प्रसिद्ध्यति"।**

वस्तुत सर्वोऽपि भारतीयवाङ्मय वेदस्य माहात्म्यविषय सर्वथा परिपूर्ण, विशषतो भवादृशा विदुषा समक्ष तन्महत्त्वविषये किमपि प्रकाशन सूर्याय दीपकदर्शनमिवाह मन्ये ।

व्याकरणशास्त्रमुद्दिश्य किञ्चित्प्रस्तूयते । व्याकरणञ्च शास्त्रमिदं वेदाङ्गेषु आस्तिकदर्शनेषु च अन्तर्गतमेव । शिक्षा व्याकरणं छन्दः निरुक्तं ज्योतिषं कल्पः इत्येतानि वेदाङ्गानि । पाणिनीयं जैमिनीयं व्यासीयं कापिलं काणादमक्षपादीयम् इत्येतानि आस्तिकदर्शनानि । शिक्षायाः वेदस्य पदवर्णाद्युच्चारणनियमप्रकाशकतया वेदाङ्गत्वम्। व्याकरणस्य प्रकृतिप्रत्ययादिविभागप्रतिपादनपूर्वकं यथास्थितस्वरूपस्थापकतया वेदाङ्गत्वम् । छन्दश्शास्त्रस्य वेदस्य मन्त्राणां वर्णन्यूनत्वाधिक्यदोषपरिहारेण स्वरूपसंरक्षकतया वेदाङ्गत्वम् । निरुक्तशास्त्रस्य वेदवाक्यगततत्तत्पदार्थनिर्णायकतया वेदाङ्गत्वम् । ज्योतिश्शास्त्रस्य कालस्वरूपादिनिर्णायकतया कर्मोपयोगित्वेन वेदाङ्गत्वम्। कल्पशास्त्रस्य तत्तन्मन्त्रैः कर्तव्यतत्तदर्थप्रतिपादकतया वेदाङ्गत्वम् । व्याकरणं पूर्वमीमांसा उत्तरमीमांसा सांख्यं द्विविधतर्कशास्त्रम् इत्येतानि दर्शनानि । व्याकरणस्य लौकिकशब्दविभागप्रतिपादनेन वर्णव्यत्ययवर्णलोपादिदोषपरिहारकतया दर्शनाङ्गत्वम् । मीमांसाशास्त्रस्य सहस्राधिकरणात्मकतया अनेकन्यायप्रतिपादकत्वेन दर्शनाङ्गत्वम् । वेदान्तशास्त्रस्य उपनिषदर्थप्रतिपादकत्वेन जीवब्रह्मादिस्वरूपबोधकत्वेन दर्शनाङ्गत्वम् । सांख्यशास्त्रस्य प्रकृतिपुरुषतत्त्वप्रतिपादनेन दर्शनरूपत्वम् । तर्कशास्त्रस्य पदार्थतत्त्वपरिशोधकतया दर्शनरूपत्वम् ।

> "शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा ।
> कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः ॥
> "पाणिनेर्जैमिनेश्चैव व्यासस्य कपिलस्य च ।
> कणादस्याक्षपादस्य दर्शनानि षडेव हि ॥"

इति च अभियुक्तोक्तिः । तथा च व्याकरणस्य वेदाङ्गत्वं दर्शनरूपत्वञ्च निर्णीतमेव । तथा व्याकरणमूलभूतस्य अक्षरसमाम्नायस्य तन्मूलकस्य व्याकरणस्य च स्वरूपसम्यग्ज्ञाने सर्ववेदपारायणजं पुण्यं फलम्' इति, व्याकरणमेव उपक्रम्य "वेदानां वेदः" इति छन्दोगश्रुतिरपि व्याकरणस्य अभ्यर्हिततरत्वं प्रतिपादयति।

## व्याकरणावश्यकता

व्याकरणञ्च शास्त्रमिदं व्याक्रियन्ते शब्दाः अनेनेति व्युत्पत्त्या सर्वेषां वैदिकलौकिकशब्दानां प्रकृतिप्रत्ययादिविभागेन साधुत्वानुशासकम् । यथा 'रामः" इति शब्दे प्रयोक्तव्ये रम्धातुः, घञ्प्रत्ययः, उपधावृद्धिः, सुप्रत्ययस्थानिकरुत्वविसर्गौ इति स्वरूपपरिज्ञातुः रामः

इति शब्दस्यैव तत्रार्थे साधुत्वम् । न रम, रिम, रमा इत्यादीना तत्रार्थे साधुत्वमिति ज्ञान नान्तरीयकतया सम्पद्यते एव । एवविधप्रकृतिप्रत्ययादिविभागज्ञानेन शब्दप्रयोक्तु "एकश्शब्द सम्यग्ज्ञात सुष्ठु प्रयुक्त स्वर्गे लोके कामधुग्भवति" इति श्रुत्या सर्वकामदोग्धृत्व प्रतिपादितमेव।

तथा 'उत त्व पश्यन्न ददर्श वाचमुतत्व शृण्वन्न शृणोत्येनाम् । उतो त्वस्मै तन्व विसस्रे जायेव पत्य उशती सुवासा' इति निरुक्तमपि वाग्वेदी वैयाकरणाय असवृत स्वाङ्गानि प्रकृतिप्रत्ययादीनि सम्यक् प्रदर्शयति इति प्रतिपादनेन वैयाकरणस्य प्रकृतिप्रत्ययादिसम्यक्ज्ञानेन प्रशस्ततरत्व प्रतिपादयति ।

लोके बुद्धिस्थविषयपरिज्ञापनाय चित्रलेखनादीना प्रयासभूयिष्ठत्वेन तत्तच्छब्दप्रयोगद्वारा बुद्धिस्थविषय-परिज्ञापन क्रियते । तत्र च असाधुशब्दप्रयोगापेक्षया साधुशब्दप्रयोगाद् अर्थावगते, धर्मविशेषोत्पत्तश्च साधुशब्दप्रयोगोऽपेक्ष्यते । श्रौतस्मार्तादिकर्मस्वपि सर्वत्र साधुसस्कृतशब्दप्रयोगेण कर्मसाद्गुण्य तत्तद्देवताप्रीतिश्च अवश्य जायते एव । वैदिककर्मसु प्रमादादिना असाधुशब्द-प्रयोगे कर्मणो वैगुण्य, तत्परिहाराय सारस्वतीयादिप्रायश्चित्ती-येष्टिविधानञ्च श्रूयते एव । तथा नित्यनैमित्तिककाम्य-कर्मस्वपि साधुसस्कृतशब्दप्रयोगद्वारा तत्तद्देवताप्रीतिश्च यथाभिमत सम्पद्यते एव । यथा लोके मानवा बहुभाषा-भिज्ञा अपि स्वगृहे स्वेच्छया सम्भाषणे स्वीयदेशभाषापदान्येव उपयुञ्जते, विदेशस्था अपि माणवका नित्यकाम्यकर्म-व्यवहाराय तत्तद्देशभाषाव्यवहारेऽपि स्वीयाभिजनदेशभाषा-व्यवहारिपुरुषदर्शनेन प्रीत्या आत्मीयत्वञ्च प्रत्यभिजानन्त्येव, तथा देवताप्रीत्यर्थ क्रियमाणनित्यनैमित्तिककाम्यकर्मसु देवाना सर्वभाषाभिज्ञत्वेऽपि सस्कृतभाषाप्रियत्वेन सस्कृतेन नित्यनैमित्तिककाम्यकर्म निर्वोढु आप्तप्रियतमा देवा स्वाभीष्ट फलमनायासेन सम्पादयन्ति । ततश्च माणवकान्तरापेक्षया सस्कृतसाधुशब्दप्रयोक्तु फलविशेषोत्पत्तिश्च सम्पद्यते एव । ततश्च साधुशब्दप्रयोगपूर्वकधर्मविशेषोत्पत्तये साधुसस्कृतशब्दप्रयोगपूर्वकतत्तद्देवताप्रीतये च साधुशब्दपरिज्ञानाय व्याकरणमत्यन्तादरणीयमेव । अपि च वेदरक्षा व्याकरणशास्त्रमात्रायत्तेव । वेदे **'गृभ्णामि ते'** इत्यादिमन्त्रेषु गृभ्णामि इति पद दृष्ट्वा **अवैयाकरण** लौकिकभाषासस्कारानुरोधेन गृह्णामि इत्यस्यैव **साधुत्व,** न तु गृभ्णामि इत्यस्य इति धिया गृभ्णामि इति **वेदपाठ** गृह्णामि इति रूपेण सस्कुर्यात् । **वैयाकरणस्तु** "हृग्रहोर्भश्छन्दसि" इति सूत्रेण वेदे गृभ्णामि इत्यस्य साधुत्व जानीते । न तु पाठ विपरिवर्तयति । तथा च वेदरक्षापि व्याकरणशास्त्रमात्रायत्तेव। एवविधबहुप्रयोजनापेक्षया च व्याकरण शास्त्रमत्यन्तादर्तव्यमेव।

## शास्त्रोद्धारः

शास्त्राणामुद्धरण नाम अध्ययनाध्यापनक्रमेण वर्धनमेव । तच्च आस्तिकमहाशयै देवतानुग्रहेण अवश्यमादर्तव्यमेव । 'ब्राह्मणेन निष्कारणो धर्म षडङ्गो वेदोऽध्ययो ज्ञयश्च' इति श्रुत्या फलविशेषानपेक्षयैव षडङ्गपरिपुष्टवेदस्य अध्ययनमध्यापन, वेदार्थस्य सम्यग्ज्ञान च अवश्यसम्पाद्यत्वेन प्रतिपाद्यते । वेदार्थस्य सम्यग्ज्ञानञ्च वेदाङ्गतदितरदर्शनसहकारेणैव भवतीति वेदस्य तदङ्गाना दर्शनानाञ्च अध्ययनमध्यापनञ्च अवश्यकर्तव्यत्वेन प्रतिपाद्यते। पूर्वकाले एकशताब्द्या पूर्व फलविशेषानपेक्षयैव स्वत एव वेदतदङ्गदर्शनाध्ययनाध्यापनेषु लोक प्रवृत्त आसीत् । अद्यत्वे तु 'वेदमधीत्य त्वरिता वक्तारो भवन्ति, वदान्नो वैदिकाश्शब्दास्सिद्धा लोकाच्च लौकिका, अनर्थक व्याकरणम्' इति । तेभ्य एव विप्रतिपन्नबुद्धिभ्य अध्येतृभ्यस्सुहृद्भूत्वा आचार्य उपदिशति - "इमानि प्रयोजनानि । अध्येय व्याकरण" मिति । महाभाष्य-कारोक्तदिशा लौकिकजीविकानिर्वहणाय या काचिल्लौकिकविद्या अभ्यस्ता चेल्लौकिकजीविकानिर्वाहो भविष्यत्येव । किमर्थ वेद, तदङ्गदर्शनाद्यध्ययनमिति विप्रतिपन्नबुद्धिकलोके वेदतदङ्गदर्शनानामध्ययनाध्यापनक्रमेण वेदतदङ्गदर्शनानामध्ययनाध्यापनक्रम प्रयत्नपूर्वकसाध्यत्वदशा मापन्न । तत्साधनञ्च न केवलपौरुषमात्रसाध्यम् । अपि तु देवतानुग्रहपूर्वकपौरुषसाध्यमेव । पूर्वम् र्लाम, पीठिकापुरम्, विजयवाटिका प्रभृत्यास्तिकमहाशयाधिष्ठितस्थानै वेदानामभिवृद्धि प्रासाध्यत । अद्यत्वे तु तादृशपोषक-

महाशयानामभावेन अतिक्षैण्यमापादितानि शास्त्राणि । अध्ययनकाले यत्किञ्चित्पारितोषिकप्रदानस्य वदान्यशेखरे प्रतिज्ञातत्वेऽपि तावन्मात्रेण भविष्यत्काले जीविकानिर्वाहो नेव कर्तु शक्यत इति धिया शास्त्राध्ययने प्रवृत्तिर्नैव सम्पद्यते । ततश्च शास्त्राध्ययनाध्यापनपरिपाटीस्थापन केवल भगवदनुग्रह, तदालम्बिमहाशयपुरुषप्रयत्नसाध्यमेव। तद्यथा केचिद्बालका एव मन्यन्ते । लाकिकविद्यासस्थासु वा सस्कृतविद्यासस्थासु वा प्रविश्य, 'विद्याप्रवीण', 'भाषाप्रवीण', 'शिरोमणि', 'विद्वान्' 'आचार्य' प्रभृतिपरीक्षासु उत्तीर्णता यदि सम्पाद्यते, तदा (उन्नतपाठशाला) कलाशालादिषु अध्यापकपदवीलाभेन जीविका निर्वोढु शक्यते इति धिया तत्राध्येतुमेव प्रयतन्ते । तेश्च न सम्पूर्णशास्त्रमधीयते । पाठ्यप्रणालिकानिवेशितभागा एव यथाकथञ्चित् अधीयन्ते। अधीताश्च अध्यापनोपयोगितया नाधीयन्ते । अतिक्लेशन योग्यतापत्राणि सम्पाद्यन्ते । तादृशावकाशस्य च सर्वेषामभावेन केषाञ्चिदेव सत्त्वेन शास्त्राध्ययने सर्वे न प्रवर्तन्ते । अतश्च समग्रशास्त्राध्येतृणा समग्रसुस्थिरजीविकाप्रदानप्रतिज्ञा, तन्निर्वाहश्च अवन्ध्य आचर्यते यदि तदा समग्रशास्त्राध्ययने प्रवृत्तिरवश्य जायेतैव । अद्यत्वे तिरुपतितिरुमलाधीश्वर श्रीवेकटश्वरस्वामिप्रेरणानुग्रहभाजने आस्तिकमहाशयै वेदनिष्णातेभ्य प्रतिमास एकसहस्ररूप्यकान्यूनतया पारितोषिकप्रदानेन वेदस्याभिवृद्धि सरक्ष्यते, तथा आवश्यकतानुसारेण शास्त्रपरीक्षा सस्थाप्य निर्णीत-शास्त्रपरीक्षासु उत्तीर्णेभ्य शास्त्रपण्डितेभ्योऽपि तत्तद्देवस्थानेषु सहस्रान्यूनतया पारितोषिकप्रदान यदि प्रतिज्ञायेत तदा शास्त्राणामध्यय ापनञ्च सुस्थापित भविष्यत्येव । ते च शास्त्रपण्डिता शास्त्राध्येतृणा सद्भावे शास्त्राध्यापन कुर्यु शास्त्राध्येत्रभावेऽपि शास्त्राध्ययनोपयोगिकाव्यनाटकादि-सस्कृतग्रन्थान् अध्यापयेयु । यदि तादृशाध्येतारोऽपि न लभ्यन्ते, तदा रामायण, भागवत, भगवद्गीताप्रभृतिलोक-योगक्षेमविधायकग्रन्थाना पारायण कुर्यु । वेदाध्ययनाध्यापनवत् रामायणप्रभृतिग्रन्थपारायणमपि भगवत्प्रीतिसम्पादकतया लोकयोगक्षेमनिर्वहणाय अकुण्ठित प्रभवत्येव ।

अताऽवश्य देवस्थानेषु निर्णीतशास्त्रपरीक्षायामुत्तीर्णाना शास्त्रपण्डितानामपि वेदविद्वत्साम्यन मासकपारितोषिकप्रदानन श्रीवेङ्कटश्वरस्वामिप्रेरणाप्रसादावलम्बिभिरास्तिक-महात्मभिरनुगृह्य शास्त्राणाम् अध्ययनाध्यापनरीति यथापूर्व साधनीया इति मदीया विभावना ॥

श्रीपादवशसम्भूतो लक्ष्मीनारायणाभिध ।
स्वाशय विवृणोत्यत्र श्रीमद्भि परिशील्यताम् ॥

VAS - I-4

# ज्योतिश्शास्त्रस्य वेदाङ्ग.त्वम्

**श्री मधुर कृष्णामूर्तिशास्त्री**
राजमहन्द्रवरम्

**ज्योतिश्शास्त्रमिद पुण्य प्रत्यक्षमपि गोपितम् ।
चन्द्रार्कौ साक्षिणौ तत्र श्रौतस्मार्तादिसाधनम् ॥**

वेदास्तावद्यज्ञकर्मप्रवृत्ता
**यज्ञा प्रोक्तास्ते तु कालाश्रयेण ।
शास्त्रादस्मात् कालबोधो यतस्स्यात्
वेदाङ्ग त्व ज्यौतिषस्योक्तमस्मात् ॥**

**शब्दशास्त्र मुख ज्यौतिष चक्षुषी
श्रोत्रमुक्त निरुक्त च कल्प करौ ।
या तु शिक्षास्य वेदस्य सा नासिका
पादपद्मद्वय छन्द आद्यैर्बुधै ॥**

**वेदचक्षु किलेद स्मृत ज्यौतिष
मुख्यता चाङ्गमध्येऽस्य तेनोच्यते ।
सयुतोऽपीतरै कर्णनासादिभि
चक्षुषाङ्गेन हीनो न किञ्चित्कर ॥**

एवमादिप्राचीनाचार्यवर्यवचनपर्यालोचनया ज्योतिश्शास्त्र वेदपुरुषस्य चक्षुरङ्ग तया निरूपितम् ॥

''वेदास्तावद्यज्ञकर्मप्रवृत्ता '' इत्यादिशास्त्रप्रबन्धकथनेन ''ज्ञानोपासनाकर्मप्रभेदात् श्रुतिस्त्रैकाण्डिकी'' ति लोकप्रसिद्ध ज्ञानापासनयारुत्तमात्तमाधिकारिवर्ग वाधिगतत्वात् सामान्यतस्तत्र तावत्कमप्रतिपादका वद एवात्र वेदशब्दन सङ्गृह्यत ॥

न चेतावता ज्ञानापासनकाण्डप्रतिपादका वेदा निरस्यत इति भ्रमितव्य कमणा ज्ञानप्रतिपादकत्वात ज्ञानकमणा कार्यकारणाभावेऽपि तण्डुलस्य पलालमिव ज्ञानस्य कर्म दूरान्वयी स्यादव ॥

अर्थादेतदुक्त भवति – भगवदुक्तफलेच्छारहितवेध-कर्मानुष्ठानादन्त करणशुद्धि । तत शुद्धसात्त्विकप्रकृति ततोऽनन्तर ज्ञानादय इति ॥

अन्यच्च 'न कर्मणामनारम्भात नेष्कर्म्य पुरुषाऽश्नुत'' ''कर्मणव हि ससिद्धिमास्थिता जनकादय इत्याद्यनेक-भगवद्वाक्याना तत्त्वावलाकनन कर्मणा जगद्बीजत्वात तत्कर्मानुष्ठानाद्युपायेन तदुच्छद एव निश्श्रेयसप्राप्ति । अस्मात्कारणादव ज्ञानापासनया कर्मकाण्डान्तर्भूतत्वकथ्पन न कश्चित् प्रतिबन्ध ॥ अत एव ''वदास्तावत यज्ञकमप्रवृत्ता'' इत्यत्र वदा इति बहुवचनप्रयागेण कर्मोपासनाज्ञानप्रतिपादका एव वेदा व्यपदिश्यन्त । ''यज्ञकर्मप्रवृत्ता'' इत्यनेन सहतुकयज्ञकर्मानुष्ठाने स्वर्गादिफलप्राप्ति। निर्हेतुक तु ज्ञानावाप्तिरिति प्राचामाशय ॥

श्रुत्यावेदिताना सहेतुकाना कर्मणामनुष्ठाने अर्हकालनिरूपणादेवास्य ज्योतिश्शास्त्रस्य वेदाङ्गत्वमङ्गीकृतम् ॥ तत्रापि मुख्याङ्गभूतचक्षुरिन्द्रियतया प्रामुख्यमुक्तम् ॥

एतादृश ज्योतिश्शास्त्र स्कन्धत्रयात्मक भवति । तदुक्तम् -

**त्रिस्कन्ध ज्यौतिष शास्त्र आद्य सिद्धान्तसज्ञितम् ।**
**द्वितीय जातकस्कन्ध तृतीय सहिताह्वयम् ॥** इति

त्रिस्कन्धात्मकेऽस्मिन् प्रथमो भागस्सिद्धान्तभाग । द्वितीयो जातकस्कन्ध । तृतीयस्सहिताभाग । तत्र स्कन्धत्रयमध्ये सिद्धान्तभाग गणितविषयक । अवशिष्टभागद्वय फलितविषयकम् ॥ गणितस्कन्धानुसारेण कालसाधनप्रक्रिया साधयितु शक्यते । अवशिष्टभागद्वय ग्रहगत्यनुसारि शुभाशुभफलपरिज्ञानायोपयुज्यते ।

1) मध्यमाधिकार (ग्रहभगणादिनिरूपणम् मध्यग्रहादिसाधनम्, कालस्वरूपनिरूपणम)
2) स्पष्टाधिकार (सूर्यादिसर्वग्रहाणा स्फुटीकरण, तिथ्यादिसाधनादिकम्)
3) त्रिप्रश्नाधिकार (दिग्देशकालपरिज्ञानाय, विविधगणितप्रसङ्ग )
4) चन्द्रग्रहणाधिकार (चन्द्रग्रहणादिसाधनम्)
5) सूर्यग्रहणाधिकार (सूर्यग्रहणादिसाधनम्)
6) छेद्यकाधिकार (ग्रहणसम्बन्धिमडलपरिलेखनादि-विषयबोधक )
7) ग्रहयुत्यधिकार (ग्रहाणा युतिसाधन ग्रहयुद्धादिनिरूपण तत्साधन च)
8) भग्रहयुत्यधिकार (नक्षत्रग्रहयुतिसाधनोपाया )
9) उदयास्ताधिकार (सूर्यादिग्रहाणा उदयास्तादिलक्षणम्, तद्दिक्परिज्ञानम्, तत्साधनम्)
10) शृङ्गोन्नत्यधिकार (चन्द्रशृङ्गोन्नतिसाधन चन्द्रोदयास्तकालसाधनम्)
11) पाताधिकार (महापातलक्षण तत्साधनम्)
12) भूगोलाध्याय (भूगोलवर्णनम्)
13) ज्योतिषोपनिषदध्याय (गोलरचना, यन्त्रादिरचना)
14) मानाध्याय (सार, चान्द्र, सावनादि नवमानकथनम्, तत्तन्मानाना विनियोग इत्यादिसमस्तखगोलगणितविषय प्रपञ्चित ॥

श्रुतिस्मृतिपुराणेतिहासादिषु यानि यानि श्रेयोजनककर्माणि विविधरूपतया प्रोक्तानि तत्तत्कर्मणामाचरणोपयोगि-कालनिरूपणमनेनव स्कन्धेन साधयितु शक्यते॥

तत्र कर्मणा तिथिनक्षत्रयागकरणवारसम्बन्धेन, पक्ष, मास, ऋतु, अयन, सवत्सरभदन कालनिरूपण कृतम् । तत्तत्कर्मणा विहितकालसाधनमननेव ज्ञातु साधयितु शक्यते॥

मानप्रकरण नवमानानि प्रोक्तानि । नवमानाना मध्ये मानचतुष्टयस्य नित्यापयागिता । अवशिष्टाना कदाचिदुपयाग क्वाचित्क इति ।

**चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनै ।**
**बार्हस्पत्येन षष्टयब्द ज्ञेय नान्यैस्तु नित्यश ॥**
(सूर्यसिद्धान्ते मानाध्याय )

इत्युक्तसूर्यसिद्धान्तमानाधिकारोक्तप्रकारेण नित्यश सोर-चान्द्र-सावन-नाक्षत्रमानेश्चतुर्भिर्व्यवहार कर्तव्य । षष्टयब्दग्रहणे बार्हस्पत्यमान स्वीकर्तव्यमिति । चतुर्णा मानाना मध्ये-

**सौरेण द्युनिशोर्मान षडशीतिमुखानि च ।**
**अयन विषुवच्चैव सक्रान्ते पुण्यकालता ॥**

सारमानेन अहोरात्रप्रमाण, षडशीतिमुखानि, दक्षिणोत्तरायनज्ञान, मेषतुलाविषुवद्दिनपरिज्ञान मेषादिद्वादशराशीना सड्क्रमणकालपुण्यकालग्रहण च । चाद्रमानेन -

**अर्काद्विनिस्सृत प्राची यद्यात्यहरह शशी ।**
**तच्चान्द्रमानमशैस्तु ज्ञेया द्वादशभिस्तिथि ॥**

**तिथि करणमुद्वाह क्षौर सर्वक्रियास्तथा ।**
**व्रतोपवासयात्राणा क्रिया चान्द्रेण गृह्यते ॥**

तिथि (प्रतिपदादि) करण (बवादि) विवाह चाल सर्वक्रिया (उपनयनादिसर्वक्रिया) तथा व्रतोपवासयात्राणा च क्रिया चान्द्रेण गृह्यते । अर्थादुक्तसकलकर्मसु तिथे प्राधान्य स्वीक्रियते ।

**भचक्रभ्रमण नित्य नाक्षत्र दिनमुच्यते ।**
**नक्षत्रनाम्ना मासास्तु ज्ञेया पर्वान्तयोगत ॥**

भचक्रस्यक परिभ्रमण नाक्षत्र दिनमुच्यत । मासा (त्रिशता तिथिभिर्मास चान्द्र पित्र्यमह स्मृतम) इति पूर्वोक्तद्वादशराशिसम्बन्धिना दर्शान्तावधिकाश्चान्द्रा मासास्तु नक्षत्रनाम्रा पवान्तयागता ज्ञया । पूर्णिमान्तकाल यन्नक्षत्र वर्तत तन्नक्षत्रनाम्ना तन्मासनाम इति व्यवहार । चित्रा-नक्षत्रयुक्ता पाणमासी चत्र । विशाखानक्षत्रयुक्ता पाणमासी वशाख । ज्यप्ठानक्षत्रयुता पार्णमासी ज्येष्ठमास इति द्वादश चाद्रमासनामानि सन्ति । तेस्तैर्नामभि चान्द्रमासस्य व्यवहार । सावनमानन-

उदयादुदय भानास्सावन तत् प्रकीर्तितम ।
सावनानि स्युरतन यज्ञकालविधिस्तु त ॥

सूतकादिपरिच्छद दिनमासाब्दपास्तथा
मध्यमा ग्रहभुक्तिस्तु सावननव गृह्यत ॥

सूर्यस्य उदयादुदय (एकादयमारभ्य द्वितीयादयपर्यन्त यत कालप्रमाण तत सावनमिति निगदितम ।

अनेनेव मानन सावनानि दिनानि ग्राह्यणि । तषामुपयाग यज्ञकालविधि सूतकादीनामित्यनन जननमरणाद्याशाच-दिन-सख्या कृछव्रतचिकित्सितदिनसख्या च निर्णायत । तथा दिनमासाब्दपास्सावनरव ग्राह्या । किच मध्यमा ग्रहभुक्ति ग्रहाणा गतिरपि सावननन गृह्यत । एव मानचतुष्टयस्य क्रियाभदन परिगणना व्यवस्थापिता । दिव्यादीनामवशिष्टाना पञ्चानामपि मानाना नित्यापयागा नास्तीति तत्तद्विवरणमत्र नोक्तम ।

एवमाकाश दृश्यमानसूर्यचन्द्रनक्षत्राणा नियतगतिकाना गमनविशषण नियतकालसाधनम्य ज्यातिश्शास्त्रमव प्रयाजकम । वदाक्तकमाण्यपि नियतकालाधीनानि । अत नियतकालाधीनकमणा नियतकाल ''धनभूर्तमिद ज्यातिश्शास्त्र वदाङ्गतया प्रचीनाचार्यरङ्गीकृतम ॥

VAS - I-5

# VEDIC ASTRONOMY

**Prof. B.R. Modak**
Dharwad.

The stars which lie on the path of the Sun and the Moon are called constellations (Nakshatras). We come across the word Nakshatra in the Rgveda quite a number of times. (I.50.2; III.54.19; VII.81.2, 86.1, X.22.10, 68.11, 85.2, 88. 13, 111.7, 156.4). At Rgveda VI. 67.6 the Sun is called Nakshatra. Rgveda I. 164.48 metaphorically refers to the twelve months and 360 days contained in a year[1]. The intercalary month is referred to[2] (Rgveda I.25.8) and seasons also are mentioned[3] (Rgveda X.90.6, 161.4)

In the Atharva-veda there is a hymn (XIX.7) which gives serially the names of all the Nakshatras. It contains a prayer to the constellations. The Taittiriya Samhita (IV. 4.10) mentions the names of the Nakshatras along with their presiding deities. Nakshatra kalpa, the first *parisista* of the Atharva-veda, mentions the names of the Nakshatras and the number of stars contained in each of them.

The Atharva-veda and its *Parisishta* mention twenty-eight Nakshatras, whereas the Taittiriya Samhita mentions twenty-seven only. Abhijit is left out possibly because it is far away from the ecliptic (60° North). Moreover, it is easier to divide the twenty-seven Nakshatras into twelve Rasis (12 × 2 1/4 = 27).

All these lists begin from the Krttikas. This indicates that the Vernal equinox coincided with the Krttikas in the Vedic times. At present the Vernal equinox occurs in the second quarter of Uttara-Bhadrapada. This is due to the precession of the equinoxes and solstices.

The earth has three types of motion.

1. Rotation around its own axis, due to which days and nights are caused.
2. Revolution around the Sun, due to which seasons are caused.
3. Mutation due to which the precession of equinoxes and solstices takes place.

The axis of the earth is inclined at an angle of 66 1/2 degrees to the plane of its orbit. The earth is, like an orange, slightly flat at its north pole and south pole. As its axis is inclined, its mass is more on one side and less on the other. The scientists have found that the gravitational force of the Sun tries to make the axis vertical. But the earth does not change the angle of its axis. The total result is that the angle of the axis remains the same, but its direction changes. This goes on continuously and it requires about 26000 years to complete one circle. The Nakshatras are 27. Hence about one thousand years are

necessary for the equinoxes and solstices to shift from one Nakshatra to the preceding Nakshatra. The distance from the second quarter of Uttara-Bhadrapada to Krttika is four and half Nakshatras. This would indicate that the Atharvaveda is four and half thousand years old, i.e. it belongs to about 2500 B.C., as we live in the twentieth century.

Lokamanya B.G.Tilak has referred to many researches relating to the antiquity of the Vedas in his well-known book 'Orion'. He points out that there are a number of *mantras* in the Vedas which indicate that the Vernal equinox once coincided with the constellation Mrgasiras (pp 61-156). One of the mantras in Rgveda is I-161-13 which states- "O Rbhus, desirous of sleep, you asked, 'O unconcealable (Sun), Who is it that awakened us?' The Sun replied that the Dog awakened you. At the beginning of the year you have seen this (world)." The Rbhus are the deities of seasons. They are said to take rest in the house of Agohya (unconcealable) for twelve (intercalary) days, which is the difference between a lunar year and a solar year. The dog alluded to here is Canis Major related to the constellation Mrgasiras. 'In short, the whole story of the Rbhus, as we find it recorded in the Rgveda, directly establishes the fact that at the time when this legend was formed, the year commenced with the Vernal equinox in Canis Major or Dog-star (p.170). After interpreting the Vrshakapi hymn in the Rgveda X.86) B.G. Tilak remarks- 'All these incidents are plainly and intelligibly explained by taking Vrshakapi to represent the Sun at the automnal equinox, when the Dog-star or Orion commenced the equinoctial year' (p.197)

The distance from Krittika to Mrgasiras (Orion) is two Nakshatras. This takes us back to two thousand years more, i.e. to about 4500 B.C.

We are told in the Taittiriya - Samhita (VI.1.5.1) and the Aitareya Brahmana (I.7) that goddess Aditi has been blessed by a boon that all sacrifices must commence and end with her. The story begins with the statement that the sacrifice (the mystical sacrificial personage) went away from the gods. The gods were then unable to perform any ceremonies, and did not know where the sacrifice had gone. It was Aditi that helped them to find out the proper commencement of the sacrifice. In the Vajasaneya-Samhita (IV. 19) Aditi is said to be *ubhayatah sirshni* 'double-headed', and the commentators interpret it to mean that the two termini of the sacrifices, which began and ended with Aditi, are the two heads here alluded to. Aditi is the presiding deity of the constellation Punarvasu.

On the strength of this and other evidences B.G. Tilak remarks, "It appears to me therefore that the oldest Vedic calender, like the oldest hymn, was sacrificial; and that the sacrifice or the year commenced with Aditi at the Vernal equinox in or near Punarvasu" (p.205)

The distance from Mrgasiras (Orion) to Punarvasu is two Nakshatras. This again takes us farther back by two thousand years i.e. to about 6500 B.C. This may be said to be the oldest Vedic period.

The most ancient available work on Indian Astronomy is Vedanga Jyotisha. It states- 'The Sun and the Moon move northward, when they are at the beginning of Sravistha. The Sun moves southward when he is in the middle of Aslesha. These events happen always in the months of Magha and Sravana."[5]

At present the Sun starts moving northward when he is in the third quarter of the constellation Mula. He starts moving southward when he is in the first quarter of the constellation Ardra. The distance of three and quarter Nakshatras indicates that the Vedanga Jyotisha was written 3250 years ago, i.e. about 1250 B.C. It states that Jyotisha stands at the top of the Vedanga-sastras[6].

## References


1. द्वादश प्रधयश्चक्रमेक

   त्रीणि नभ्यानि क उ तच्चिकेत।

   तस्मिन्त्साक त्रिशता न शङ्कवो

   ऽर्पिता षष्टिर्न चलाचलासः।।

   –ऋग्वेद १.१६४.४८

2. वेद मासो धृतव्रतो द्वादश प्रजावतः

   वेदा य उपजायते।।

   –ऋग्वेद १.२५.८

3 यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तो अस्यासीदाज्य ग्रीष्म इध्म शरद्धवि ।।
–ऋग्वेद १० ९० ६

शत जीव शरदा वर्धमान
शत हेमन्ताञ्छतमु वसन्तान्।
शतमिन्द्राग्नी सविता बृहस्पति
शतायुषा हविषेम पुनर्दु ।।
–ऋग्वेद १० १६१ ४

4 षट् कृत्तिका, एका रोहिणी, तिस्रो मृगशिर, एकाऽऽर्द्रा, द्व पुनर्वसू, एक पुष्य, षडाश्लेषा, षण्मघा, चतस्र फल्गुन्य, पञ्च हस्त, एका चित्रा, एका स्वाति, द्वे विशाखे, चतस्रोऽनुराधा, एका ज्येष्ठा सप्त मूलम अष्टावषाढा, एकोऽभिजित्, तिस्र श्रवण, पञ्च श्रविष्ठा, एका शतभिषा, चतस्र प्रोष्ठपदो, एका रेवती, द्वेऽश्वयुजौ, तिस्रो भरण्य ।।
इति सख्यापरिमित ब्रह्म।
–नक्षत्रकल्प १ २

5 प्रपद्येते श्रविष्ठादो सूर्याचन्द्रमसावुदक्।
सार्पार्धे दक्षिणार्कस्तु माघश्रावणयो सदा।।
– यजु ज्योतिष ७

6 यथा शिखा मयूराणा नागाना मणयो यथा।
तद्वद् वेदाङ्गशास्त्राणा ज्योतिष मूर्धनि स्थितम्।।
–यजु ज्योतिष –४

VAS - I-6

# कल्पसूत्रविचारः

श्री इएस् वरदाचार्यः
मेसूर

**सर्वकर्मसमाराध्य सर्वाभीष्टफलप्रदम्।**
**सर्वावास वासुदेव वन्दे श्रीवेङ्कटेश्वरम् ।।**

कल्पसूत्राणीति शब्दे कल्पश्च सूत्राणि चेति विग्रह । कल्पो नाम प्रयोग कल्पयन्तीति व्युत्पत्त्या सिद्धरूप-प्रयोगप्रतिपादका ग्रन्था (बोध्यन्ते) । ते च बाधायन, वाराह, मशक, आपस्तम्बादिमहर्षिप्रणीता। सूत्राणि तु सूचयन्तीति व्युत्पत्त्या 'पादग्रहण एतत् तीर्थमित्या चक्षते' इत्यादिस्वपरिभाषास्वसज्ञाभि युतानि । प्रयोगविशेषोन्नायकलक्षणप्रतिपादका आश्वलायन, वेजापक, कात्यायनादिकृता ग्रन्था इति वैलक्षण्यम्। तदुक्त वार्तिके-

**सिद्धरूपप्रयोगो यै कर्मणामनुगम्यते।**
**तत्कल्पा लक्षणार्थानि सूत्राणीति प्रचक्षते।।**

इति । अन्यत्रापि-

**लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।**
**सर्वत सारभूतानि सूत्राण्याहु र्मनीषिण ।।** ।इति।

एतेषा च श्रुत्यादिमूलकत्वकल्पने गोरवात् वेदत्वेन वेदतुल्यत्वेन प्रामाण्य भवति। प्रयोगश्च-कल्पादिग्रन्था वेदा , धर्ममूलत्वात्, विधिवत् इति वेदत्वमनुमानेन साध्यते। यदि तु ते अवेदा वेदमुद्रारहितत्वात्, वेदत्वेन अभियुक्त-प्रसिद्धिरहितत्वाद्वा, काव्यवत् इति सत्प्रतिपक्षानुमान-पराहतत्वम् उपन्यस्येत तदा वेदतुल्यत्वम् इत्यर्थ ।

किञ्च मन्वादिस्मृतीना तिरोहितप्रायवेदार्थ निबन्धन त्वात् यथाकथञ्चिदर्थवत्त्वेऽपि कल्पसूत्राणा विस्पष्ट सकलजनप्रत्यक्षवेदार्थोपनिबन्धनत्वात् प्रणयनानर्थक्यापत्ति इति शाखान्तर वदेव वेदत्वमेव युक्तमाश्रयितुम् अपोरुषेयत्वाच्च।न हि सकलजनप्रत्यक्षवेदवाक्यार्थविषयमर्थं वदतामेषा पुरुषै प्रणयन सम्भवति। तथात्वे अमीषा विधायकोपस्थापनमात्रेण चरितार्थत्वात् धर्मप्रमाजनकत्वानुपपत्ते धर्ममूलस्मरणानुपपत्ति ।

किञ्च 'अहरह स्वाध्यायमधीयीते' त्युपक्रम्य "यत् ऋचो अधीते, यद्यजूषि यत् ब्राह्मणानि इतिहासपुराणानि कल्पानी"ति नित्य अनादिसिद्ध ब्रह्मयज्ञविधि , न हि कल्पादीनाम् आधुनिकत्वे स उपपद्यते। न चापोरुषेयत्वे बोधायनमशकादिसमाख्यानुपपत्ति इति वाच्यम्। काठ-कादिसमाख्यावत् तस्या अपि प्रवचननिमित्तकत्वेन उपपत्ति सम्भवात् । एतादृशसमाख्यामूलिकव एषु लोकिकाना

पारुषेयत्वभ्रम। अत एतेषा वेदत्व वेदतुल्यत्व वा आश्रयितव्यम् इति केषाचिदुद्घोष। मन्त्रब्राह्मणयो वेदनामधेय, षडङ्गमेके" इति च स्पष्टम्।

पर तु दृश्याभावसाधकस्य दृश्यादर्शनस्येव इह कर्त्रभावसाधकस्य स्मर्तव्यास्मरणस्याभावेन वेदवदकर्तृकत्वानुपपत्ते पोरुषेयत्वमेव कल्पसूत्राणा स्पष्टमभ्युपगन्तव्य भवति। एव सत्यपि प्रामाण्यस्य लाघवमात्रेण तत्साधने कालिदासादिवाक्येष्वपि तदापत्ति। लाघवस्य प्रामाण्यापष्टम्भ कत्वेन स्वत प्रमाणत्वाभावात्न अपारुषेयत्वासिद्धया वेदत्व वेदतुल्यत्व वा कल्पसूत्राणाम्। काठकादिस्थले तु स्मर्तव्यास्मरणहेतुना वेदापारुषेयत्वे, न्यायत स्वरवाक्यशेषादिमुद्रादिभिश्च सिद्धे काठकादि-समाख्याया तदनुरोधेन प्रवचनादिनिमित्तकत्वाङ्गीकारऽपि इह कर्त्रस्मरणसाधकप्रमाणाभावात्, प्रत्युत तत्साधक-प्रमाणसत्त्वात्, न तत्समाख्या अन्यथा नेतु शक्या भवेत्। एव सत्यपि यदि त्रैवर्णिकाना धर्ममूलत्वस्मरण अपारुषेयत्व विना नापपद्येत तत कल्प्येतापि तत्। तत् वेदमूलत्वेनाप्युपपन्नतरमिति न सङ्कट मनागपि।

या तु नित्यब्रह्मयज्ञविषयत्वानुपपत्ति सापि एव हि पारहाया यथव व्रीहित्वजातिमादाय अनित्यसयागपरिहार 'व्रीहिभि यजेत' इत्यादा क्रियते तथा सर्वग्रन्थेषु वाक्यत्ववत् कल्प्यत्वजात्यनङ्गीकारेऽपि क्लृपिधात्वर्थानुसारेण वेदार्थ प्रकल्पकत्वोपाधिना एवजातीयकाना ग्रन्थाना सर्वकाल केषाञ्चित् सम्भवेन प्रवाहनित्यतया अनित्यसयोग-विरोधपरिहारोपपत्त न दोष।

न चाप्येतषा वैयर्थ्य प्रणयने। नानाशाखागताना एकादशकपालत्वादीना समुच्चिताना च प्रयाजा-धनुमन्त्रणमन्त्रादीना शाखान्तरायवाक्याधीनबाधाप सहारपार-सख्यापदार्थलक्षणा पूर्वतादिज्ञानार्थत्वात् सार्थक्यमिति। विस्तरस्त्वन्यत्र।

कल्पशब्दश्च प्रयोगपर। प्रयोगश्च बहुश्रुत प्रयोक्तृ-स्थले धर्मैकनिरतजनभूयिष्ठे काले दोषलवविदूरे अवसरे साङ्गरहस्यनानाशाखाध्येतृषु महर्षिषु नानाशाखास्ततद्विशेषोप-सहारेणानुष्ठान प्रवाह प्रचारयत्सु विनैव प्रयास समाकलनीय आसीत्। ततस्ततोऽनृषिषु श्रुतर्षिषु च प्रचरत्सु अनुष्ठानवैगुण्य दोषान् सभावयद्भि महर्षिभि आधिकारिकै यथायथ सक्षेपविस्तरप्रक्रियया श्रद्धाल्वनुष्ठातृजनानुजिघृक्षया नानाशाखास्थतत्तद्विशेषसग्रहेण सुगमा इति प्राणायिषत सूत्रनिबन्धा। ये किल प्रथन्ते बोधायन, आश्वलायन, आपस्तम्ब, हिरण्यकेशि, खादिर, द्राह्यायण, लाट्यायन, साख्यायन, मानव, वाराह, कौशिक, वैखानस, भारद्वाजादितत्तत्सुगृहीतनामधेयभूषितैरेव सूत्रपदै परमर्षि प्रणीतानि कल्पसूत्राणि ऋषिभिरेव प्रचारमासेदिवासि इति भगवत पाणिने वचसा प्रतीम। यत तेनोक्त प्रवचनार्थकपदेन प्रक्रम्य तित्तिरिप्रभृतीन् वेदप्रवक्तॄनिव कल्पप्रवक्तॄनपि पुराणप्रोक्तेषु ब्राह्मणकल्पेषु स्मरन्ति।

यद्यपि पुराणानि कल्पान् इत्याम्नायमान इव कल्प-शब्द सूत्रेऽपि प्रयोगदर्शकवेदभागपर इति तस्य प्रवचनम् आम्नाय इव स्वारसिक इति वक्तु शक्यते तथापि 'पाराशर्यशिलालिभ्या भिक्षुनटसूत्रयो' इति सूत्रे कल्पसूत्र-निबन्धानुवादिन मीमासादर्शनप्रवर्तकस्य जैमिने आचार्य बादरायण प्रदर्शयन् (निर्दिशन्) कल्पसूत्रप्रवचनपरम्पराया स्वप्राचीनता बाढमेव अनुमन्यते पाणिनि।

एव वार्तिककारश्च कात्यायन कण्ठत एव तत्प्राचीनता 'काश्यपकौशिकग्रहण कल्प नियमार्थम्' इति वदन् सूचयति।

कल्पसूत्रेषु आपस्तम्बीयम् अतिप्रथितम्। आपस्तम्बीयनिबन्ध पाणिनेरपि प्राचीन इति ज्ञायते यत महाभाष्यकार पतञ्जलि एव प्रदर्शयति- 'तदस्त्यस्मिन् इति मतुप्' इति सूत्रे 'सन्मात्रे च ऋषिदर्शनात्' इति वार्तिकम्। तत्र च भाष्यम्- सन्मात्रे च ऋषि 'प्रदर्शयति मतुपम्।'

'यवमतीभि यूप प्रोक्षति' इति । इद च वाक्यम् (आ श्रौ सू (7) प्र) 9 (ख) 9 (स्) 'अग्रेण प्राञ्च यूप निधाय' इत्यारभ्य प्रक्षाल्य अथैन यवमतीभि प्रोक्षति' इति दृश्यते। एवमित्यस्य विवरणाय यूपशब्द प्रयुज्यते पतञ्जलिना। अत कल्प सूत्राणि अतिप्राचीनानि इति सिद्धम्।

गृह्यसूत्राणि च एकाग्निसाध्यानि विवाहादिकर्माणि निरूपयन्ति। अथ निषेकादीन् सस्कारान् व्याख्यास्याम । गर्भाधान, पुसवन, सीमन्तोन्नयन, जातकर्म, नामकरणम्, अन्नप्राशन, चूडाकर्म, उपनयन, चत्वारि वेदव्रतानि, ते नियता बाह्मा सस्कारा पाकयज्ञादय दैवा। ते पुनरुभये ब्राह्मण्यहेतव इत्यादिभि वाक्यै आपस्तम्ब, बोधायनादिभि स्वसूत्रै निरूपिता इति नातीव प्रयत्यते विवरणाय ।

धर्मसूत्राणि च–आचारप्रधानानि गोतमादिमहर्षिभि गोतमधर्मसूत्रादिग्रन्थेषु विस्तरेण लोकानुग्रहाय प्रणीतानि विराजन्ते। यदाह गोतम स्वसूत्रेषु क्रियाकाण्डे–

आचाराल्लभते धर्ममाचाराल्लभते धनम्।
आचाराल्लभते सौख्यमाचारात् मोक्षमाप्नुयात्।। इति।।

एव सूत्राणीमानि लोकहितार्थ तत्तन्महर्षिभि प्रणीतान्युपजीव्य सर्वे जना सुखिनो भवन्तु । ★

VAS - I-7

# वेदाङ्गत्वेन छन्दोनिरुक्तयोः प्राधान्यम्

डा वि.वि सीतारामाचार्य
पोन्नूर्

"वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कवि" इति विष्णुसहस्रनामस्तोत्रम्। अत्र वेदवेदाङ्गशब्दा परमात्मवाचकतया प्रयुक्तो। भगवान् वेदव्यासमहर्षिरेव प्रयोगमिम चकार। वेद परमात्मान वदतीति उपनिषदप्याह 'तमेत वेदानुवचनेन ब्राह्मणा विविदिषन्ती ति। गीताया भगवान् कृष्णोऽपि वदति 'वेदैश्च सर्वैरहमेव वेद्य इति। चिदचिदीश्वरात्मकस्य जगतस्सम्बधि विज्ञान तदङ्गत्वेन यन्त्र, तन्त्र, रसायन, वास्तु, शिल्प, वैद्य, ज्योतिष, सङ्गीतादिविद्या वेदे वर्तन्ते।।

अस्य वेदस्य सत्यार्थविज्ञानाय स्वरूपावगमाय च महर्षय षडङ्गानि निर्ममुरिति आर्षस्सप्रदाय। तानि च शिक्षा कल्पो व्याकरण निरुक्त ज्योतिष छन्दश्चेति नाम्ना प्रथितानि। एतेषाम् अङ्गत्वकथनेन वेदस्य शब्दमयदहवत्त्व सुव्यक्त भवति। यथा अस्मदादीना देह करचरणादिभिरङ्गै क्रियाकारि भवति तथा वेदोऽपि शिक्षादिभिरङ्गै ज्ञानदायि भवति ।

शब्दानुशासनकर्ता भगवान् पाणिनिमुनि षडङ्गान्येव कथितवान् । यथा च शिक्षाया-

छन्द पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयन चक्षु निरुक्त श्रोत्रमुच्यते ।।
शिक्षा घ्राण तु वेदस्य मुख व्याकरण स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।"।।

इति।

मुण्डकोपनिषदि एतेषा षडङ्गाना अपरविद्यात्वमुक्तम्। श्रीशङ्करभगवत्पादा एव वदन्ति-वेदाना साधनभूतधर्महेतुत्वात षडङ्गसहिताना धर्मसाधनत्वनापरविद्यात्वमिति। एतेषु षट्स्वङ्गेषु निरुक्तमपहाय शिष्टानि पञ्चाङ्गानि वेदस्य बाह्यस्वरूपावबोधकानि । निरुक्त तु केवलमान्तरस्यार्थ-स्वरूपस्यावबोधने समर्थ भवति।

प्रकृते छन्द वेदस्य पादस्थानीय । अनेन वर्णनेनैव बाह्यस्वरूपबोधकेष्वङ्गेषु छन्दस अतिरस्करणीय प्रामुख्य विशदीभवति। यथा देह पादहीन पङ्गुर्भवति तथा छन्दोहीनो वेदोऽपीति व्यज्यते। अपि च वेद वर्णात्मकश्शब्दराशि स च छन्दस्येवाविरासीत् । यथा वेद लोककल्याणाय परमात्मन आविरास तथा छन्दोऽपि। ऋक्सहिताया दशमे मण्डले एवमुक्तम्- 'ऋचस्सामानि जज्ञिरे । 'छन्दासि जज्ञिरे तस्मात् इति। अत्र श्रीसायणाचार्या

एव वदन्ति– 'सर्वात्मकस्य पुरुषस्य हवनरूपात् तस्मात् यज्ञात् ऋच सामानि च जज्ञिरे। गायत्र्यादीनि छन्दासि च समुत्पन्नानी'ति। अत यथा वेद परमात्मैकमूलस्तथा छन्दोऽपीति सर्वेष्वङ्गेषु छन्द प्रधानम् भवति।।

**छन्दश्शब्दस्यान्वर्थकत्वम्**

वेदमन्त्रगतस्य गणगुम्भस्य छन्द इति नाम कथ सार्थक भवतीति परिशीलनीयम्। वेदमन्त्राणा पठने सुस्वरा उच्चावचा हृदयाह्लादिनी लयबद्धा च काचन नादरीति मनासि आवर्जयति। यत्र चाज्ञातेऽपि वेदार्थे श्रवणेन केवलमास्वादिता नादमाधुरी मनासि प्रसादयति, इन्द्रियाण्यन्तर्मुखानि कृत्वा प्रशान्तिमनुभावयति। अत्र च कारण मन्त्रपादाना गणनियमबद्धतैवेत्यत्र न सन्देह। छन्दश्शब्दस्य व्युत्पत्तिरपि उपरितनमर्थं दृढयति। चदि=आह्लादने इति भावादिकात् धातो 'चन्देरादेश्च छ' इत्योणादिकेन सूत्रेण असुन् प्रत्यये, चस्य छत्वे, छन्दश्शब्द निष्पद्यते। आह्लादकर इति तस्यार्थ। चन्दनात्=आह्लादनादेव वेदे छन्दश्शब्द अन्वर्थो भवति।

छान्दोग्योपनिषदि छादनात आवरणात छन्दस छन्दस्त्व अन्वर्थमित्यभिधीयते। अय समन्त्र। देवा वे मृत्योर्बिभ्यत त्रयी प्राविशन्। ते छन्दोभिरच्छादयन्। यदेभिरच्छादयन् तच्छन्दसा छन्दस्त्वमिति'।

भगवान् यास्कमुनिरपि आह्लादकत्वमेव छन्दश्शब्दस्य प्रवृत्तिनिमित्त स्वीकृत्य "छन्दासि छादनात्" इति निरुक्ते (7 3 12) निर्वचनमकरोत्। सवृणोति हृदयमानन्दातिरेकेणेति छन्दस्त्व सिध्यति।

वेदे तावदनेकानि छन्दासि विराजन्ते।भगवान् कात्यायन छन्दसा लक्षणप्रदर्शनाय सर्वानुक्रमणी व्यरीरचत्। कात्यायनादपि पिङ्गलनामको मुनि सूत्ररूपेण छन्दोग्रन्थ विरचयामास। तत्र द्विपञ्चाशत् छन्दासि सलक्षण निरूपितवान्। तेषु प्रधानानि सप्त छन्दासि। तानि च गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्ति, त्रिष्टुप्, जगती नामकानि। एतेषु गायत्रीछन्दस आर्षी, दैवी, आसुरी, प्राजापत्या, याजुषी, साम्नी, आर्ची, ब्राह्मीति भेदेन अष्टो प्रकारा विलसन्ति। एते अष्टो भेदा उष्णिगादीना षण्णामपि पिङ्गलमुनिना प्रदर्शितानि। एतानि आहत्य पूर्वोक्तद्विपञ्चाशता सह अष्टोत्तर शत भवन्ति। एतेषाम् अष्टविधाना भेदाना कारण पादतद्-घटकाक्षरवृद्धिह्रासावेव। अपि च वेदमन्त्रेषु दृश्यमानेषु एतत सुस्पष्ट भवति यत् गायत्र्या पाद वा पादा वा अनाहत्य अन्येषा छन्दसाम् उत्पत्तिरेव नास्तीति। अत एव श्रौतस्मार्तसाम्प्रदाये सर्वेषु छन्दस्सु गायत्र्या एव महत प्राधान्य दत्तम्। 'अग्र वै छन्दसा गायत्री'ति बह्वृचोपनिषत्। गीताया (10 35) कृष्णोऽपि छन्दसाम् आत्मान गायत्रीछन्द इति व्याजहार। भगवान् यास्कमुनिरपि निर्वचने गायत्र्या प्राधान्य निरूपयामास। गायत्री– गायते स्तुतिकर्मण। त्रिगमना वा विपरीता। त्रिषु वेदषु गमनम् अस्या विद्यते। अत एव सन्ध्यावन्दनेऽपि जपविषयीभूता गायत्रीति वक्तु समुचितम्।

श्रौतसम्प्रदाये याजनाध्यापनादिषु मन्त्राणा छन्दासि नियत विज्ञेयानीति नियमो वरीवर्ति। छान्दोग्यब्राह्मणे एवमुक्तम् – "यो ह वा अविदितार्षेयच्छन्दोदैवतविनियोगेन ब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स स्थाणु वर्च्छति गर्त वा पद्यते। प्रमीयते वा पापीयान् भवति। तस्मादेतानि मन्त्रे मन्त्रे विद्यादिति। बृहद्देवताग्रन्थोऽपि एतदनुसारेणैव वदति–

**अविदित्वा ऋषि छन्दो दैवत योगमेव च।**
**योऽध्यापयेज्जपेद्वापि पापीयान् जायते तु स ।।**

इति।

वेदमन्त्रपाठस्य सक्रमा रीति छन्दस्येवाधारीभवतीति वेदस्य पादत्वेन, छन्दस वेदाङ्गत्वम् उपपन्नम्। वेदमन्त्राणा बाह्यस्वरूपपरिकल्पने क्षमत्वात्, मन्त्रस्थितेराधारभूतत्वात्, पादवदङ्गत्वादपि छन्दश्शब्द वेदस्य वाचकतया रूढस्सन स्वस्य वेदाङ्गेषु अत्यन्त प्राधान्यमवगमयति। वेदमन्त्रेषु दत्तेनानेन प्राधान्येन लोकिकान्यपि छन्दासि अतीव प्रभावितानीति मन्ये। यतो वा 'अपि माष मष कुर्यात् छन्दोभङ्ग न कारयेत्' इति छान्दसी सूक्ति लोकिकवाङ्मये राराजते।।

छन्दस अनन्तर वेदाङ्गेषु निरुक्तस्य महत् प्रमुख्य वर्तते। वेददेहस्य निरुक्त श्रोत्रस्थानीयम्। नि =निश्चयेन उक्त निरुक्तम्। यथा अस्मदादीना श्रोत्र शब्दप्रत्यक्ष जनयत् अर्थज्ञानायोपकरोति, तथा निरुक्तमपि वेदगताना पदाना मूलस्वरूप प्रदर्श्य वास्तव अर्थमवगमयति। तेन वेदमन्त्राणाम् अर्थज्ञान स्पष्टमुदेति। तेन प्रयोग दोषरहित सफलश्च भविष्यति।

अर्थज्ञानाभाववत केवल शब्दमात्रतुष्टस्य विद्याया वैयर्थ्यं वेद एवानुशास्ति। "स्थाणुरय भारहार किलाभूत् अधीत्य वेद न विजानाति योऽर्थम्" इति वेदमन्त्र। स्थाणुर्नाम अशाखवृक्ष। स यथा प्रफुल्लै कुसुमै पक्वै फलैश्च नित्य सबद्धोऽपि तद्गतै रूपरसगन्धादिभि अणुमात्रेणापि न सबध्यते एव शब्दमात्रवेदपाठकोऽपि वेदगतेन परमार्थेन न सबध्यते। तस्मात् केवला शब्दमयी विद्या व्यर्था। अर्थज्ञानवत प्रशसनमपि वेदे एव क्रियते। तदेवम् "योऽर्थज्ञ इत्सकल भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा" इति।

अन्यानि वेदाङ्गानि शिक्षा, व्याकरण, ज्योतिष, कल्प, छन्दासि वेदस्य केवल बाह्यस्वरूपावगमायेव कल्पन्ते। तथाहि। शिक्षा तावत् वर्णस्वरसम्बन्धिविज्ञानमेव बोधयति। व्याकरणन्तु प्रकृतिप्रत्ययविभागेन शब्दाना सस्कारमनुशास्ति। ज्योतिष तु वेदोक्तयज्ञयागक्रियानुकूलस्य कालस्यैव विज्ञान बोधयति। कल्पस्तु साङ्गोपाङ्ग यागक्रियाविधानमावेदयति। छन्द मन्त्रपादघटक गणनियममेव लक्षयति। वेदमन्त्रगताना निगूढार्थानामवबोधार्थ तु केवल निरुक्तमेव कल्पते। तस्मात् प्रधानञ्चेदमितरेभ्योऽङ्गेभ्य वेदस्यार्थपरिज्ञानाभिनिवेशात्। शब्दश्च गुणभावमापद्यतेऽर्थस्य। नास्ति निरुक्तात् ऋते अन्यदङ्ग अन्यद्वा बाह्य शास्त्रमस्ति यदशेषान् शब्दान् निर्ब्रूयात्। धर्मार्थकाममोक्षाख्या चत्वार पुरुषार्था मानवजाते जीविते निरन्तरमाद्रियन्ते यत्साधनायेव विश्वमानवसङ्घ सर्वदा परिश्राम्यति उद्विग्नश्च भवति। एतेषा पुरुषार्थाना विज्ञान वेदमन्त्रार्थमविज्ञाय नोदेति। निरुक्तमेकमेव मन्त्रार्थविज्ञानप्रदम्। यद्यपि ब्राह्मणानि क्वचित् क्वचित् वस्तुगता क्रिया अनुसृत्य निर्वचनानि वदन्ति। तथापि न पदश वदन्ति। प्रकृते यास्काचार्यविरचित निरुक्तमेव वेदाङ्गमित्याद्रियते। अयमाचार्य क्रीस्तो पूर्व पञ्चमशताब्दीय। यास्काचार्यात् पूर्व कश्यपप्रजापति निघण्टुनामक शब्दसमाम्नाय व्यरीरचत्। वेदमन्त्रगतानि पदानि सर्वाणि पञ्चस्वध्यायेषु समुच्चितानि। तस्यैव ग्रन्थस्य व्याख्या यास्केन कृता। अयमाचार्य स्वव्याख्यारम्भे वदति 'समाम्नाय समाम्नात स व्याख्यातव्य' इति, अय निरुक्तग्रन्थ काण्डत्रयात्मक। आद्य नैघण्टुक काण्डम् द्वितीय नैगम तृतीय दैवतमिति। एतेषु त्रिष्वपि काण्डेषु गवादिदेवपत्न्यन्ता वैदिकाश्शब्दास्सर्वेऽपि निरुक्ता।

भगवान् यास्काचार्य पञ्चविध निर्वचनप्रकार प्रदर्शितवान्। दुर्गादासमहोदयेन पञ्चप्रकारा एव प्रभाषिता –

**वर्णागमो वर्णविपर्ययश्च**
**द्वौ चापरौ वर्णविकारनाशौ ।**
**धातोस्तदर्थातिशयेन योग**
**तदुच्यते पञ्चविध निरुक्तम्।।** इति।

वैदिकाना शब्दाना प्रवृत्ति त्रिविधा वर्तते। केचन शब्दा प्रत्यक्षवृत्तय। केचन परोक्षवृत्तय। केचन अतिपरोक्षवृत्तय। अतिपरोक्षवृत्तीना परोक्षवृत्तित्वमापाद्य प्रत्यक्षवृत्तिना शब्देन व्याख्यायते। बहुत्र वेदे सामान्यरूपेण विज्ञायमानेषु मन्त्रेषु निरुक्तग्रन्थ महत्तर वैज्ञानिक सत्यमाविष्करोति, यत्सत्य आधुनिकविज्ञान सूत्रैस्सवदत् धीनिधीन् वैज्ञानिकान् आश्चर्यचकितान् करोति। अत्रैको मन्त्र उदाह्रियते।

ऋग्वेदे अग्निसूक्तमस्ति। ऋग्वेदे स्तुतेषु अग्नि प्रथम। वेदारम्भ "अग्निमीळे" इत्यादिना अग्निमन्त्रेणैव भवति। चारित्रिका इममग्निसूक्तमधिकृत्यैव व्याचख्यु। प्रकृतिप्रकोपसक्षोभेण भीता आर्या अचेतनाया प्रकृत देवतात्वमारोप्य भयेन अस्तोषुरिति। परन्तु निरुक्तग्रन्थस्य परिशीलने एतदग्निसूक्त विश्वे प्रतिक्षण प्रवर्तमानस्य अनेकधा दृश्यमानस्य तेजोधातो परिशोधनात्मकमिति व्यक्त भविष्यति। अग्निसूक्ते सर्वस्मिन् अग्नि त्रिषु स्थानेषु स्तुत। स्थानानि च पृथिवी द्यौरन्तरिक्षमिति त्रीणि। एकस्यैव तेजोधातो स्थानभेदेन क्रियाभेद फलभेदश्च

भवतीति निरुक्तादवगम्यते। तत्र कश्चन मन्त्र विविच्यते (निरु अ 7 पा 4 ख 18)-

**अभि प्रवन्त समनेव योषा**
**कल्याण्य स्मयमानासो अग्निम् ।**
**घृतस्य धारा समिधो नसन्त**
**ताजुषाणो हर्यति जातवेदा ।।**

ऋ स 3-8-11

मध्यमस्थानीय=द्युस्थानीय अग्नि अय मन्त्र प्रस्ताति। मन्त्र तावत् वाच्यवृत्त्या मध्यमस्थानीय इत्यर्थो न लभ्यते। घृतस्य=उदकस्य धारा समना कल्याण्य स्मयमाना योषा इव अग्निम् अभिप्रवन्ति। स चाग्नि ता जलधारा जुषाण = प्रीयमाण अभिकामयते इति तात्पर्यम्। अस्मिन् मन्त्रे अग्निशब्द सामर्थ्यात् मध्यमस्थानीयमग्नि वदति। एव घृतशब्द उदकवाचक। लोके आज्यपर्याय। अत्र भगवान् यास्कमुनि एव अभिप्रेति 'स न मन्येतायमेवाग्नि-रिति। अप्येते उत्तरे ज्योतिषी अग्नी उच्येत। ततानु मध्यम इति"। अय अत्र यास्काचार्यस्याशय। मध्यमस्थानीयो वह्नि मेघेषु उत्पद्यते। स च मेघगतै जलै दीप्यते अर्थादबिन्धन। स चाग्नि ता जलधारा प्रीयमाण अभिकामयते। अर्थात् मध्यमस्य वैद्युताग्ने वृद्धिह्रासौ इन्धनीभूते जले आधारीभवत। एव अस्मिन्मन्त्रे वैद्युताग्नि-सबन्धि (Production of current) वैज्ञानिक सूत्रमन्तर्लीनम्। एवमेतत् निरुक्तशास्त्र वेदमन्त्राणा निगूढानर्थान् विवृण्वन् तदन्तर्गतानि आध्यात्मिकाधिदैविकाधिभौतिकानि विज्ञानानि प्रकटयति। व्याकरण तु केवल पदसस्कारकमेव। भगवान् यास्काचार्य निरुक्तमेतत् स्वातन्त्र्येण विद्यास्थानमिति व्याकरणशास्त्रस्य परिपूरकम् इति च अभिप्रैति। वेदस्य अन्तस्स्वरूपप्रदर्शनद्वारा अन्येभ्य पञ्चभ्य अङ्गेभ्य अस्य निरुक्तस्य महत्तम प्राधान्य अस्ति।।

तस्मात् एतयो अङ्गयो विज्ञानेन वेदस्य बाह्यमान्तर च विज्ञान नियतमधिगन्तव्यम्। नास्ति चाद्यतने काले विविधाना सामाजिकरोगाणा चिकित्साकरणाय वेदविज्ञानमन्तरा अन्य कश्चन चिकित्सोपाय। तस्मात् साङ्गवेदाध्ययन, तदध्यापन, तद्विज्ञानप्रचार, तद्बोधितधर्माचरणद्वारा इय मानवजाति शान्तिमानन्द च लभतामिति आशासे।। ✦

# व्यासशिक्षाविमर्शः

श्री मगिपूडि वेकटशास्त्री
कलिदिण्डि

वेदाङ्गेषु शिक्षा प्रथमोपात्ता। शिक्षा नाम वर्णोच्चारणप्रकारानुशासनम्। तदुक्त तैत्तिरीयोपनिषदि– "शीक्षा व्याख्यास्याम। वर्णस्स्वर। मात्रा बलम्। साम सन्तान। इत्युक्तश्शीक्षाध्याय" इति। एतेन वेदमूलकत्व सिद्ध शिक्षाया। एतच्छ्रुतिविवरणार्था पाणिनीयशिक्षादयो बहव उपलभ्यन्ते। यो वर्णो यत्रोत्पद्यते यथा व्यज्यते तत्सर्व स्थानकरणप्रयत्ननिरूपणद्वारा विशदीकृत्य तत्तत्सहितापरिरक्षणमेव मुख्य फलमस्य वाङ्मयस्य। तत्र प्रतिवेदमनेकाश्शिक्षा असमग्रा वरीवृतति। तेन पूर्वैर्विद्वद्भिर्नवशिक्षास्तदीयसर्वशिक्षासङ्ग्राहका उद्धृता प्रत्याम्नायम्। तासु तैत्तिरीयाणान्तु–

**व्यासलक्ष्मीर्भरद्वाजशम्भ्वापिशलिनिर्मिता।**
**कौहळेयकालात्रेयारण्यशिक्षा नव स्मृता॥**

इति परिगणिता। तत्र प्रथमा व्यासशिक्षेत्यभ्यर्हितत्वमत एव प्रमाणमूर्धन्यत्व चास्या स्फुट तथापीयमप्यसमग्रैव। अपि चाद्यतन पाठविरुद्धवचनानि बहून्यस्या वर्तन्ते। न केवलमिय शिक्षा किन्तु सर्वाप्येवमेव विराजते। अत एव पुरा वेदोच्चारणपरिरक्षणाय तदा तदा बुद्धिमद्भी रचितानि वचनान्यर्थत स्वरूपेण वा क्रोडीकृत्य स्वय विशेषवचनानि त्रिचतुराणि प्रणीय तेषा च प्रामाण्यसिद्धये महर्षिविशेषनामोपपादकशिक्षानाम्ना प्रचारितानि सूरिभिरिति, तथोच्चारणविषये यत्र यत्र विवादा प्रचलितास्तत्र स्वस्ववासनानुकूलानि वचनानि ग्रथितानीति चोह्यम्। अत एव स्वरभक्त्यनुस्वारादिषु विरुद्धवचनान्यप्युपलभ्यन्ते। अत एव च प्रत्येकमसमग्रा च सर्वा शिक्षापि दृश्यते। समुच्चयेऽपि सर्वासा सामग्री तु न सिध्यति। तथाहि– प्रतिशिक्ष प्रकरणविभागशून्य प्रायेण, पूर्वोत्तरसगतिरहित च सामग्र्यलुप्त च विषयप्रतिपादने केनचिदुक्तानामेव भङ्ग्यन्तरेणोक्ति।

सन्देहस्थले पूर्वकविप्रयुक्तयथास्थितपदप्रयोगश्च। अत एव सर्वत्रैकरूप्यमेव व्युदितलक्ष्यविषयकवचनाना दृश्यते व्यक्तिमध्यस्थनासिक्य इत्यादीनाम्। यद्यप्यासा प्रामाण्य वेदवर्णोच्चारणज्ञापकत्वरूपमस्ति। तथापि व्याकरणादिप्रमाणान्तरसापेक्षमेव तत्। शिक्षावाङ्मयस्य प्रायश पण्डितोपज्ञत्वादत एव रागद्वेषादिमालिन्यमलीमसत्वात्।

इय व्यासशिक्षाऽप्यर्वाचीनैव न तु वेदव्यासमहर्षिणा रचितेति स्पष्टमन्ते भविष्यति। इयवर्तमानजटापाठसाधुतास्थापनमपि प्राधान्येन स्वीकृत्य प्रणीता। तदित्थम् – पुरा

जटोच्चारणे द्विधा सप्रदाय इत्यनुमीयते। व्याकरणानुसारेण विलोमे छन्दोविशेषकार्यरहितमेव न्याय्यमिति प्रामाणिका विलोमे प्रातिशाख्यानुरोधेनैव जटोच्चारण सुकरमिति व्याकरणगन्धशून्यकेवलछान्दसाश्च। ते परस्परेण विवदन्त कालक्रमेण यदा जटापि प्रत्येकविद्यास्थानापन्ना सत्यधीतिबोधप्रचारणवती तदा तत्संस्काराय नेद प्रातिशाख्य-सूत्र किन्तु ग्रन्थान्तरप्रमाणमित्यपलपितु लक्षणानि प्रणिन्यु श्लोकरूपाणीति चोह्यम्।

अत एवेदानीन्तनजटाया केषुचिल्लक्ष्येषु व्याकरणा-नुयायित्वमन्यषु प्रातिशाख्यानुगतत्वमिति विशेष। सोऽपि सङकीर्णदशाया व्याकरणानुसरत्पाठक वृद्धमुखनिःसृतपाठ-श्रवणजनितसाधुत्वश्रद्धयत्यभिप्रैमि। अत एव भिन्नभिन्नवचना- "न्येयाता ब्राह्मणाये" त्यादिलक्ष्यविषयाण्युपलभ्यन्ते। एवमेव जटापाठो भ्रष्ट। कथमेवमिति चेदस्मद्गुरव प्रमाणमित्यध्येतार-स्समादधतो गुरुपरम्पराया दोष विन्यस्य स्वय पूतमन्या भवन्ति। तथापि यत्किञ्चन वचन स्वपाठप्रतिकूलमपि कस्माच्चिद्विद्वन्मुखाच्छ्रुत्वा अहो। ममाय प्रमाद एवेति मत्वा तदनुकूल पाठ सस्कृत्य शिष्येभ्योऽप्युपदिशन्त स्वयमेव कारण भवन्ति पाठभ्रशीकरणे। अध्येत्रतिरिक्तार्थान्तरस्य परम्पराशब्दवाच्चस्याभावात्।

गच्छति काले व्याकरणविरुद्धाध्ययने व्याकृति-पारज्ञात्राक्षपानसहमान कश्चन तदानीन्तनपाठ स्वीकृत्य तत्संस्कारक कञ्चन शिक्षाग्रन्थ विरचय्य केवल-श्रोत्रियानानन्दाब्धो पातयामास। "विदुषा प्रमुदे यथे" ति तत्प्रतिज्ञयापि स्पष्टमिदम्। तद्ग्रन्थस्य स्वकर्तृकत्व प्रकाशित चेदप्रामाण्य स्यादिति यथाकथञ्चित्स्वग्रन्थस्य शाश्व-तत्वमपक्षमाणोऽशाश्वतत्व स्वयशसोऽपि सहमान-श्शिक्षाप्रणेतृसमयमनुरुध्य च व्यासनाम्ना प्रकटीकृत-वानित्यनुमीयते। इदमास्तिकमन्याना श्रवणपिधान-हेतुभूतमपि निर्मत्सराणामास्तिकाना कर्णपेयमेव। एव च नाय व्यासो ग्रन्थकर्ता महर्षि।

इय व्यासशिक्षा समग्रेतरशिक्षापेक्षया। विलोमे प्रातिशाख्यप्रवृत्तौ यत्र यत्र विवादा प्रादुर्भूतास्ते सर्वेऽप्यत्र प्रायेण परिष्कृता। अत एवास्या अर्वाचीनत्वम्। कि च प्राचीनग्रन्थेष्वस्या नामापि न प्रयुज्यते नवशिक्षा-परिगणनपरभ्योऽर्वाचीन वचनभ्याऽन्यत्र। यद्यस्या प्राचीनत्व स्यात्तर्हि तत्र तत्र विवादशान्तेरनयैव सुलभत्वे सति जटासङ्गत्यसङ्गत्यो परस्परदूषण प्राचीनग्रन्थकर्तॄणा वृथव स्यात्। 'प्रातिशाख्यादिषु ह्यत्र वृत्तिस्सैव समाश्रिता' (व्या सू 480) इति सूत्रेण मूलस्य प्रातिशाख्यानुकृतित्व व्यासेनैव स्थिरीकृतम्। 'विज्ञेया प्रकृतिस्तस्या ज्ञानादेव फल लभेत् (व्या सू 32) इति प्रकृतिसहिताविधिबलात्त्रिभाष्यरत्नव्याख्यानानन्तर-कालिकत्व, यत प्रकृतिसहिताविधिस्त्रिभाष्यरत्नोपज्ञम्। यदीय शिक्षा वेदिकाभरणात्पूर्वमेव प्रकाश नीता स्यात्तर्हि विलोमे छान्दसकार्याणि नापादनीयानि, सहिता मात्रविषयत्वात्प्रातिशाख्यस्येति गोपालयज्वोद्घोषणेन भुक्तवन्त प्रति 'मा भुङ्था' इत्युक्तिरिव कि कृत स्यात्। अतस्तताऽ प्यर्वाचीनत्व व्यासशिक्षाया आपादन युक्तम्। तेन प्रायशो वर्षशतद्वयमायुरस्या इदानीमिति वक्तु शक्यते।

कि चास्या जन्मभूमिर्द्रविडदेश इत्यनुमीयते। तथाहि-तन्त्रसमाप्तिप्रयुक्तविरामविषये कालनिर्णयशिक्षाया "तन्त्राणान्तु त्र्यह भवे" दिति त्रिदिन विराम उच्यते। स त्वध्ययनाध्यापनादीना प्रतिबन्धक। तद्वारणायान्ध्रदेशे तत्रान्तिमपदानि बन्धु 'ओ' "इत्युपनिष" दित्याकारकाणि न प्रकाशयन्ति। 'समुद्र' इत्यतो विरमन्ति सहितायाम्। तेन स्याद्बन्धुपदस्यावशिष्टत्वात्। एव ब्राह्मणारण्यकयोरपि। एतदनौचित्यपरिहाराय व्यासशिक्षाया 'ग्रन्थाना परिपूर्णे तु त्रिगुण काल उच्यते' (व्या सू. 472) इति त्रिशन्मात्रिको विरामोऽनुगृह्यते व्यासेन। तेन समापितेऽपि तन्त्रे पारायणादीना प्रतिबन्धकता न भवति। एवविधानुकूलवादोऽपि व्यासशिक्षाया अधुनातनत्व द्योतयति, अस्य विशेषस्यान्यत्रानुपलम्भात्। तत्र द्राविडास्तु व्यासशिक्षानुयायिन तेनास्याश्शिक्षाया अभिजनोऽपि द्रविडदेश इति तर्कोऽपि युक्त एव।

ग्रन्थस्थविषयानुरोधेनापि शिक्षेयमिदानीन्तना, न महर्षिप्रणीतेति निर्णेतु शक्यते। तद्यथा तत्र सज्ञाप्रकरणे

विधीयमानास्सञ्ज्ञा लौकिकार्थान्नातिरिच्यन्ते 'अनमानानिषेधा स्यु (व्या सू 22) त्वथैवेति निवृत्तिस्थ (व्या सू 21) इत्यादय । अतस्तेषा सञ्ज्ञाकरणान्मूढोऽय ग्रन्थकर्ता मत्सम । तथा हलाद्यनुक्तसञ्ज्ञाव्यवहारोऽप्यत्रायुक्त । स्वयमप्रयुक्तार्थानामपि सञ्ज्ञा क्रियन्त इति महच्चित्रम्। यथा – ऋवर्णश्च लृवर्णश्च पृक्तसञ्ज्ञ प्रकीर्तित (व्या सू 15) इत्यादय । द्विर्द्विर्युक्ते तु सहिते (व्या सू 29) त्याद्यसगतपदप्रयोग इत्याद्यनेके दोषा प्रकटीकृताश्शिक्षायामस्याम्। परिभाषाप्रकरणमप्येव, निष्फलानापरिभाषाणामुपदिश्यमानत्वात्।

अपि च शिक्षेयमात्रेयसर्वसम्मतपारिशिक्षाणा छायया रचितेति तत्परिशीलनेन स्पष्टमेव समेषा भविष्यति । तत्राप्येवमेव प्रकरणविभागस्य विषयविभागस्य चोपलभ्यमानत्वात्। अत्रत्यविषयाणा सस्काराणा च तत्र गतार्थप्रायत्वात्। अत एव शिक्षास्वपीतरापेक्षाया ऽऽ त्रेय-सर्वसम्मतया प्राधान्य प्रत्यक वर्तते तत्पूर्वतनग्रन्थसग्राहकत्वात्। ते उभे अत्र सगृह्येते इति युक्तमस्या लक्षणशीर्षभूषात्वमापेक्षिक यद्ग्रन्थकर्ता प्रतिज्ञायते। अत एव तत्पूर्वतनशिक्षा-पयोधिमथनजनितपीयूषप्रायत्वात्प्रायेण ग्राह्या एवात्रत्यसिद्धान्ता । अत एव च–

> **शिक्षासु क्वचिदन्योन्य विरोध स्फूर्यते यदि।**
> **व्यासशिक्षा बलवती विशेषैर्यद्यबाधिता।।**

इति व्यासशिक्षाया प्रामाण्यमन्यत्र प्रतिपाद्यते।

विलोमे प्रातिशाख्यप्रवृत्तौ यत्र यत्र विवादा प्रवृत्तास्ते सर्वेऽप्यत्र परिष्कृता इत्यत्र किञ्चिदुच्यते– वरुणस्त्विवति पदद्वयस्य जटोक्तौ तु नु पूर्व उदात्तयोर्वकार (प्राति 5–13) इति सूत्रेण वकारलोपे वरुणस्तु त्वरुणो वरुणस्त्विवति रूप भवति। अज्ञानतो ज्ञानतो वा तत्र वकारलोपो नादृतो जटाध्येतृभलाक । तत्साधुत्व स्थापनाय "चादौव उच्चतुन्वध (व्या सू 142) इति सूत्रयित्वा जटाध्येतृपक्षपात प्रदर्शितो व्यासेन। एव 'नसग् फाभितिरापर (प्राति 13–4) इति सूत्रेण "रायस्स" मित्यत्र जटाया "सम्म्राय" इति स्यात्। इद व्याकरणविरुद्धम्। अध्येतृभिश्च व्याकरणमत्रानुसृतम्। अतस्तन्निरूपणाय "नादौ स सा चरापर (व्या सू 158) इति सस्कृतम्। प्रग्रहप्रकरणे पूर्वजे प्रभृत्याय (प्राति 4 23) मिति सूत्र विवादग्रस्तम्। अत आह व्यासो वरी इत्याद्यय पर (व्या सू 70) इति। एतेन पूर्वजे प्रभृतीति प्रातिशाख्यसमर्थनाय त्रिभाष्यरत्नकारयत्नस्य तत्खण्डनाय वैदिकाभरणकार सरम्भस्य पुनस्त्रिभाष्यरत्नमतस्थापनाय मुकुरकारदुरभिनिवेशस्य चापहास्यता गमयति। ईदृशा अपि विशेषा अस्य ग्रन्थस्याधुनिकत्व द्योतयन्ति। एवमनेकत्र।

अस्याश्शिक्षायाश्शैली तद्व्याख्याद्वय च बहूपप्लवयुक्तम्। यथा स्पर्शाना पञ्च पञ्च स्युर्वर्गा वर्गोत्तरस्य चे (सू–9) ति सूत्रे व्यञ्जनक्रममनिरूप्यैव सञ्ज्ञा क्रियते। अत्र वर्गोत्तरो वर्णस्तस्य वर्गस्याख्या भवतीति व्याख्यायते। तस्य मूल मृग्यम्। स्पर्शाना पञ्च पञ्च वर्गा स्युरित्येक वाक्यम्। वर्गोत्तरस्य चेत्यवशिष्ट तत्र कि भवतीत्याकाङ्क्षाया किमपि नास्ति मूले। तेन वर्गोत्तरो वर्णो वर्गसञ्ज्ञो भवतीत्यर्थस्सपन्न । कवर्ग इत्युक्तौ तत्र क इत्यस्य वर्गसञ्ज्ञा सञ्जातेति फलितम्। तन्न युक्तम्। अतो मूलमलङ्करोति व्याख्याताऽऽख्येत्यध्याहृत्य तस्यानुवृत्त्यपकर्षयोरसम्भवात्। किमिय व्यासोक्ति ? विमृशन्तु विचक्षणा । एव परस्परान्वयरहितरचनमिदम्, शाब्दबोधोपयोगि-विभक्तिशून्य च । यथा लोपप्रकरणादिमस्य सूत्रस्य लोपो विसर्गस्सोनिङ्ग्य उच्चोऽथैष चेद्धलीत्यस्य" "अनिङ्ग्यस्स स्य उच्च एष विसर्ग लोप हलि परत" इति वाक्ययोजना। अत्र सर्वेषामुद्देश्यविधेयाना प्रथमान्तत्वम्। तेन यमुद्दिश्याय विधीयत इति व्यासैकगम्यम्। के वराका वय ज्ञातुम्। तथापि भगवदनुग्रहाल्लक्ष्यानुसाराच्चापेक्षितविभक्त्यन्तत्वेन विपरिणमय्य व्याख्याता शाब्दबोध प्रापयति तथोत्तरवचनेऽपि। एव बहुत्र।

एव प्रातिशाख्यानुकरणात्क्वचित्स्वग्रन्थाशयभङ्ग सवृत्त । यथारेफिपदेषु तनुतरितिपद प्रातिशाख्ये गृह्यते। तस्य स्वशाखाया प्रयोजनाभावाच्छाखान्तरीयत्व कल्पित तद्व्याख्यातृभ्याम् । तदस्याश्शिक्षायामप्युपात्त तादृशदोषविरहेण स्वग्रन्थरचनाया प्रवृत्तेनाप्यनेन व्यासकञ्चुकधारिणा। एव ग्रन्थेऽस्मिन् बहुदोषा प्रविष्टा हन्त। अष्टादशमहा-पुराणतत्सङ्ख्याकोपपुराणाद्यनेकग्रन्थस्मर्ता–

**यान्युज्जहार माहेन्द्राद्व्यासो व्याकरणार्णवात्।**
**पदरत्नानि कि तानि सन्ति पाणिनिगोष्पदे।।**

इत्युद्गीयमानो वेदव्यासो भगवान्बहुभ्रमप्रमादयुक्तमिम ग्रन्थ प्रणीतवानिति वक्तु कस्य जिह्वा प्रवर्तते। अतिकृपण कश्चन वदतु नाम, तस्य नाम न गृह्णीयात्। न केवलमियमेवानृषिप्रणीता शिक्षा किन्तु प्रतिशिक्षमेवमेवेत्यस्माक वाद। कुत इति चेत्सर्वमपि लक्ष्यजातमेकस्याश्शिक्षायास्साधितु न शक्यते। किन्त्वेक लक्ष्यमेकस्या अन्यदन्यस्या इतरदितरस्याश्चेति चित्रमिदम्। कुत्रचिद्बहुभ्य शिशक्षाभ्योऽपि किञ्चित्किञ्चित्कार्यरूप मधुकरवद्गृहीत्वापि लक्ष्यमधु सम्पाद्यत इतीतोऽपि चित्रम्। यद्वा तत्तदुच्चारणमनाद्येव। तद्विवेचने शिक्षासु क्रमविपरिणाम। सर्वविषयाणामेकेन निरूपयितुमशक्यत्वात्। अत एव कालभेदोऽ सम्पूर्णत्व च विषयप्रतिपादन इति चेत् तदापि शिक्षाणामनृषि प्रोक्तत्वमर्वाचीनत्व च स्यात्। तेन च भ्रमप्रमादभूयिष्ठत्व तासा सिद्धमेवेति शिवम्। ✤

# VEDANGA SESSION - II

\ \S - II

# प्रमुखभाषणम्

**प्रोफेसर् सरोजा भाटे**
पुणे

'साक्षात्कृतधर्माण ऋषयो बभूवु। तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादु। उपदेशाय ग्लायन्तो ऽवरे बिल्मग्रहणायेम ग्रन्थ समाम्नासिषुर्वेद च वेदाङ्गानि च' इत्येव भगवता यास्काचार्येण वेदवेदाङ्गवाङ्मयोद्भव उपवर्णित। बिल्मग्रहणार्थ तर्हि वेदाङ्गानि समाम्नातानि। किमिद बिल्म नाम ? बिल्म भिल्य भासनम् इति वा इति तत्रैव व्युत्पादित यास्काचार्येण। भिल्म वेदाना भेदन, भेदो व्यास। भासनमिति वा। वेदाङ्गविज्ञानेन भासते प्रकाशते वेदार्थ इति श्रीमता दुर्गाचार्येण स्वटीकाया बिल्मशब्दार्थ विवृत।

वेदवेदाङ्गयो सम्बन्धमुपवर्णयन् पुराण ऋषि वदति-

**छन्द पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।**
**शिक्षा घ्राण तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात्साङ्गमधीत्यैवं ब्रह्मलोके महीयते ।।**

यद्यपि अपौरुषेयस्य वेदराशे सरक्षण विधातु निर्मित वेदाङ्गवाङ्मय पौरुषेय, श्रुत्यङ्गभूतत्वात् गौण च, तथापि पुरा कालादारभ्य वेदाध्येतृणा वेदवद् वेदाङ्गानामपि स्वाध्याये ऽन्तर्भाव, चतुर्दशविद्यास्थानेषु स्थान चासीत्। वाङ्मयस्यास्य स्मृतिरूपत्वेऽपि महत्त्व न हीयते। तदामनन्ति शास्त्रकारा -

**श्रुतिस्मृती उभे नेत्रे विप्रस्य चक्षुषी मते।**
**एकेन हीन काण स्याद्द्वाभ्यामन्ध प्रकीर्तित ।।**

इति। पौरुषेयी सत्यपि स्मृति शिष्टैर्निबध्यमानत्वात् सर्वथा श्रुतिवत् पूज्या एव। तदाह भर्तृहरि वाक्यपदीये ब्रह्मकाण्डे-

**अनादिमव्यवच्छिन्नां श्रुतिमाहुरकर्तृकाम्।**
**शिष्टैर्निबध्यमाना तु न व्यवच्छिद्यते स्मृति ।।**

इति। तत्र शतपथब्राह्मणे वेदाङ्गाना स्मृति इति निर्देश।

वेदपुरुषस्य रक्षार्थं सनातनै ऋषिभि भूयिष्ठ वेदाङ्गनिर्मिति कृता। किन्तु भूयासो वेदाङ्गग्रन्था दुर्भाग्यवशात् कालकवलिता अल्पीयास एव अवशिष्टा। तद्यथा अङ्गत्रयोपेतानि कल्पसूत्राणि आपस्तम्ब-बौधायनहिरण्यकेशिविरचितानि त्रीण्येव उपलभ्यन्ते। वेदाङ्गव्याकरण पाणिनीयमेकमेव, वेदाङ्गनिरुक्तमपि यास्करचितम् अनन्यमेव। केषाचन वेदाङ्गग्रन्थाना नामोल्लेख उपलब्धग्रन्थेषु लभ्यते। अन्येषा तु नामापि न ज्ञायते केवलम् अनुमानेन तेषा स्थिति ज्ञातु शक्यते।

मूलत प्रतिशाख भिन्नानि वेदाङ्गानि मौखिकपरम्परया सरक्ष्यमाणानि परम्पराया खण्डितत्वात्, रक्षणोपायान्तराणा च अभावात् कालप्रवाहे विलुप्तानि। अत यावन्ति शिष्यन्ते तावन्ति वेदरक्षण विधातु न पर्याप्तानि।

यद्यपि सन्ति अन्येऽपि धर्मशास्त्रपुराणादय उपाङ्गभूता ग्रन्था तथापि तेषामपि अपरिपूर्णत्वाद् अपर्याप्तत्वम् ।

अपर च स्वाध्यायपरम्पराया इतिहासे कदाचिदवतीर्णम् अन्धयुग यस्मिन् हि अविज्ञायैव अर्थं पठनमात्र प्रारब्धम्। तादृशान् वर्णपाठकान् निन्दन् यास्क श्लोकमिमम् उद्धरति-

**यद् गृहीतमविज्ञात निगदेनैव शब्द्यते ।**
**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥**

इति । यथार्थज्ञाने अरुचि दधाना तथैव शब्दज्ञाने ऽपि उदासीना पाठका 'वेदमधीत्य त्वरिता वक्तारो भवन्ति' इति शब्दै भगवता पतञ्जलिना निर्दिष्टा वेदाङ्गाना सर्वथा अनावश्यकतामेव प्रत्यपादयन् 'वेदान्नो वैदिका शब्दा सिद्धा लोकाच्च लौकिका। किमर्थम् अध्येय व्याकरणम्' इति । तान् विप्रतिपन्नबुद्धीन् प्रत्याह कश्चन ऋषि -

**स्थाणुरय भारहार किलाभू -**
**दधीत्य वेद न विजानाति योऽर्थम् ।**
**योऽ र्थज्ञ इत् सकल भद्रमश्नुते**
**नाकमेति ज्ञानविधूतपाप्मा ॥** इति ।

किमत्राश्चर्यं यद् उद्घोषितेष्वपि एवविधेषु अर्थवादेषु लाघवार्थं स्वभावत प्रवृत्तो लोक लघुना उपायेन महान्तमर्थं सम्पिपादयिषु गुणभूतेषु वेदाङ्गेषु उदासीन इवासीत् । एवञ्च येन वेदाङ्गसाहित्येन वेदाना रक्षण विधातव्यमासीत् तस्यैव रक्षणमापतितम् ।

अद्यत्वे तु सर्वथा सरक्षणमर्हति न केवल वेदवाङ्मय वेदाङ्गवाङ्मयमपि। अयि विद्वास ! कि बहुना उक्तेन, इय विद्वत्परिषदपि वेदसरक्षणोपायाश्चिन्तयितुमेव आहूता इति कार्यक्रमपत्रिकावलोकनेन सुव्यक्ततर भवति ।

तत्र एतद्देशप्रसूता अनधीतवेदवेदाङ्गा अधीतार्वाचीनशास्त्राश्च ये युवान अध्येतार तेषा मनसि त्रय प्रश्ना जाग्रति- केन खलु कारणेन अरक्षित तिष्ठति वेदवेदाङ्गवाङ्मयजातम्? का खलु आवश्यकता अस्मिन् विज्ञानयुगे वेदवेदाङ्गसरक्षणस्य? के सरक्षणोपायाश्चिन्तनीया ? इत्येते त्रय प्रश्ना। तत्र प्रथमयो प्रश्नयो समाधानं तृतीयस्य उत्तर सुलभमिति मन्ये। यद्यपीय विद्वद्गोष्ठी तृतीय प्रश्न समाधातुमत्र सहता, तथापि पूर्वप्रश्नद्वयमप्यभिप्रेत तृतीयप्रश्नपिपृक्षो इत्यत्यन्त स्पष्टमेव। अत क्रमेण समाधातु यत्यते।

Now, in the interest of the individual, the nation and the science itself, it should be worthwhile to appraise the accuracy of astrological predictions There are two ways of assessing a discipline which is apparently in its empirical stage or the steps in whose evolution are not very clear First, to analyse and study the factors involved, and, secondly, to verify the computed findings of the discipline with observed results In fact, these are the methods employed for the evaluation of seemingly intuitive traditional disciplines like Yoga Perhaps, the analysis of astrology is more complicated than that of Yoga, since more factors, including the personal equation, are involved here Thus, the different branches of the discipline, like planetary astrology, numerology, palmistry and physiognomy as applied to the same person on the same event could be studied individually and the results compared Substantial statistical data collected on a number of representative items studied in the light of the rules of the different branches of astrology could, when properly classified and correlated with actual happenings, indicate the authenticity or otherwise of the different branches Modern scientific explanations and corroborations might also have to be taken into account whenever available Since in all astrological predictions, the use of the exact time of the events, in local time, is required, any error or inaccuracy therein has to be corrected at the outset itself A check has also to be made to ascertain if all attendant factors have been duly noticed and taken account of

**Conclusion :**

It is worth mentioning here that a number of verifications made by individuals and institutions, especially the well-known Astrological Institute of B V Raman, Bangalore, have confirmed the veracity of astrological predictions, especially those based on horoscopical astrology Such errors and non-events have been ascertained to be on account of inacuurate or incomplete data and sometimes because all evidences have not been duly taken notice of More recently, G V Chaudhury has gone a step further in this direction In his book *Vedic Numerology* (B V Bhavan, Bombay, 1968), he devotes two long chapters, VI and VII (pp 203-350) for a detailed analysis of a large number of horoscopes, with actually known dates and events and has shown the correctness of the predictions If solid proof on astrology is required here it is It would seem an individual with faith has in the science of astrology a solid base to fall upon in case of mental and spiritual need, providing him with the stamina to lead a full life, even as a qualified physician can provide him with health and stamina for his physic Speaking for a larger forum, it might not be wrong to warrant that properly understood and used with discretion, astrological science can benefit the entire Indian Nation

**References :**

1 See K V Sarma, Astronomy in India' — Vedic period , Vishveshvaranand Ind Jl 14 (1976) 1-20, R N Dandekar, Vedic Bibiography I 143, II 75, III 75, IV 75 passim

* * *

VAS - II-5

# ज्यौतिषशास्त्रसंरक्षणस्य प्रसारस्य चोपायाः

**प्रोफेसर् रामचन्द्र पाण्डेयः**
वाराणसी

वेदाङ्गेष्वन्यतमं ज्यौतिषं शास्त्रं सिद्धान्त- संहिता-होरात्मकं स्कन्धत्रयाधिष्ठितं विद्यते। त्रिषु स्कन्धेषु अनेके विषया गुम्फिताः सन्ति । सिद्धान्ताख्ये प्रथमस्कन्धे सृष्ट्यादितः प्रलयान्तकालं यावत् स्थूल-सूक्ष्मभेदद्वयेन कालगणनां विमृश्यानन्तरं कालाश्रिता ग्रहगणना-पद्धतिर्विस्तरेण प्रतिपादिता वर्तते । संहितास्कन्धोऽतीव विस्तृतस्तत्र प्राधान्येन ग्रहचाराः, आकाशलक्षणानि, आकाशीयोत्पाताः

प्रभावाः प्रतिपादिताः सन्ति । अस्मादतिरिक्तं वास्तुः, वनस्पतिविज्ञानम्, शरीरलक्षणम्, पशुपक्षिणां विकृतिलक्षणप्रभृतयो विलक्षणा अनेके विषयास्तत्र संकलिताः सन्ति। तृतीये होराख्ये स्कन्धे गर्भकालादारभ्य देहान्तप्राप्तिपर्यन्तं जातकस्य शुभाशुभौ विमृष्टौ स्तः। अत्रापि जातकं ताजिकञ्चेति भेदद्वयं वर्तते। एवं ज्यौतिषशास्त्रस्य स्वरूपं समासेनोपस्थापितम् । कालक्रमेण क्षीणतां व्रजन् सन् ज्यौतिषशास्त्रम् इदानीं केवलं होराशास्त्रमात्रेण परिज्ञातो भवति । आधुनिकशिक्षाप्रणाल्यां ज्यौतिषशास्त्राद् गृहीता अनेके विषयाः स्वतन्त्रशास्त्ररूपेणाङ्गीकृता वर्तन्ते । यथा - खगोलविज्ञानम्, ऋतुविज्ञानम्, वास्तुविज्ञानम्, वनस्पतिशास्त्रं भूगर्भशास्त्रमित्यादिः। एतत् तु सत्यं वर्तते यत् आधुनिकप्रणाल्यामङ्गीकृता विषयाः सततमनुशीलनेनानुसन्धानेन च वृद्धिं गताः दृश्यन्ते परं ज्यौतिषशास्त्रे चिराद् अवरोधो दृश्यते । कदाचित् शास्त्रमिदं मूर्ध्नि स्थितमासीत् परमिदानीं शोचनीयतां गतम् । भवद्भिः सर्वैरतिरोहितं यत् भुवः आकर्षणशक्त्या आविष्कारकः न्यूटनमहोदयः आसीत् इति आधुनिकानां मतम्; परं तथ्यमिदं नास्ति । सप्तदशशताब्द्यां न्यूटनः आसीत् परं चतुर्दशाधिकैकादशशततमे ईसवीयवत्सरे प्रादुर्भूतः भास्कराचार्यो भुव आकषर्णशक्तेः प्रभावं उद्घोषितवान् । तेनोक्तम्-

**आकृष्टशक्तिश्च मही तया यत्**
**खस्थं गुरुं स्वाभिमुखं स्वशक्त्या ।**
**आकृष्यते तत् पततीव भाति**
**समे समन्तात् क्व यतत्त्वियं खे ।**

- सिद्धान्तशिरोमणिः गोलाध्यायः

परमद्यापि छात्रान् न कोऽपि पाठयति यत् आकर्षणशक्तेराविष्कारको भास्कर आसीत्। मन्ये न्यूटनमहोदयेनाकर्षणसिद्धान्ते केचन परिष्काराः कृताः परमन्वेषकत्वेन श्रेयस्तत्र न गच्छति । एवमेवार्यभटस्य संख्यापद्धतिः सूक्ष्मपरिध्यानयनम्, अवर्गाङ्कस्य मूलानयनम् एतत्सर्वं भारतीयज्यौतिषशास्त्रस्य गौरवाय कल्पते । गणेश-दैवज्ञैर्विरचितं ग्रहलाघवमद्यापि स्वीयं समुन्नतं स्थानं बिभर्ति।

अद्यापि समस्ते भूमण्डलेऽस्मिन् न कोऽपि वक्तु पारयति यत् ज्याचापकर्मरहितेन गणितेन ग्रहसाधन कर्तुं समर्थ । केवलमिय गणेशदैवज्ञस्यैव साहसोक्तिर्वर्तते यत् -

**यद्यप्यकार्षुरुरव करणानि धीरा-**
**स्तेषु ज्यका धनुरुपास्य न सिद्धिरस्मात् ।**
**ज्याचापकर्मरहित सुलघुप्रकार**
**कर्तुं ग्रहप्रकरण स्फुटमुद्यतो ऽ स्ति ।**

(ग्रहलाघवम्)

एवभूतस्य समुन्नतस्य भारतीयज्यौतिषशास्त्रस्यैताहशी दुरवस्था कथ जाता इति विचारणीय पक्ष । अहमनुभवामि यत् ज्यौतिष लौकिक व्यावहारिक च शास्त्र वर्ततेऽतोऽत्र केवल कल्पनया आर्षत्वेन च कमपि सिद्धान्त स्वीकर्तुं न शक्यते । अत्र वासनया सिद्धस्य पदार्थस्य प्रत्यक्षोपलब्धस्य पदार्थस्य च प्रामाण्य भवति । यथोक्त कमलाकरभट्टेन-

**सुयुक्ता न मुन्युक्तिरप्यत्र शास्त्रे**
**भवेत् कार्यवर्गस्य यादृग्विरुद्धा ।।**

(सिद्धान्- वविवेक )

अयमेव हेतुरासीद् यत् पुरा दैवज्ञा गणितागतान् पदार्थान् वेधक्रियया प्रन्यक्षीकृत्य स्वीकुर्वन्ति स्म । यावत्कालपर्यन्त वेधक्रियया सहैव ज्यौतिषशास्त्रस्योपरि अनुसन्धान अध्ययनमध्यापन च प्रचलिष्यति तावत्कालपर्यन्त ज्यौतिषशास्त्रमक्षुण्ण सुरक्षित च भविष्यति। पर वेधस्य परम्परा चिराद् विच्छिन्ना वर्तते । परिणामत कस्मिश्चिदपि सिद्धान्ते चिराद् सशोधन न जातम् । पुरा इय परम्परा आसीत् । यथोक्त श्री वेङ्कटेश वापू केतकर महोदयेन यत् पूर्ववर्तिसिद्धान्तान् त्रुटिसम्पन्नानवलोक्य गणेश दृक्समतामकरोत् । पर साऽपि किञ्चित् स्थूलता गतोऽत अमु पुन सशोध्योपस्थापयामि । ज्यौतिषशास्त्रस्य इयमेव समीचीना परम्परा । ज्यौतिषशास्त्रस्य रक्षायै वेधशालाया स्थापन तस्या वेधकर्मण प्रशिक्षणञ्च नितान्तमावश्यक वर्तते । तथा चानुदिन गणितोपलब्धान् ग्रहान् वेधद्वारा परीक्ष्य तेषा सत्यापन कर्त्तव्यम् । वेधक्रियाया सरक्षणेन जौतिषस्य सरक्षण भविष्यति । अपरञ्च ज्यौतिषशास्त्रस्य मानकग्रन्थानामभावोऽपि अस्य शास्त्रस्य कल्याणाय न भवति। अत मानकग्रन्थाना प्रामाणिकेन व्याख्यानेन सह प्रकाशन हिताय भविष्यति । इदानीं कमलाकरभट्टस्य सिद्धान्ततत्त्वविवेक , केतकीग्रहगणितम्, सर्वानन्दकरणम् आदयो अनेके ग्रन्था चिरादनुपलब्धा सन्ति । यद्यप्येते प्रायश सर्वे ग्रन्था सर्वत्र ज्यौतिषशास्त्रस्य पाठ्यक्रमे निर्धारिता सन्ति तथापि एतेषामभावो महादाश्चर्यमुत्पादयति ।

ज्यौतिषस्य सिद्धान्तसहितास्कन्धयो प्रसार इदानीं कुण्ठितो विद्यते । केवलमिदानी होराशास्त्रस्य प्रचारो वर्तते। पर तत्रापि नूतनप्रकाशने कश्चन प्रतिबन्ध स्थापनीय येन अप्रामाणिकाना ग्रन्थाना प्रकाशनमवरुध्येत् । होराशास्त्रस्येदानी दुरुपयोगो दृश्यते । यद्यपि वराहादयो आचार्या सशकिता आसन् यत् कालान्तरे शास्त्रस्य रक्षा न तथाविधा भविष्यति यथा अस्माभि क्रियते । अध्येतार प्रमाद करिष्यन्ति अत आचार्य वराहमिहिरेण सावत्सरिकाणा लक्षणमपि प्रतिपादितम् ।

"तत्र सवत्सरोऽभिजात प्रियदर्शनो विनीतवेष सत्यवागनसूयक सुसहितोपचितगात्रसन्धिरविकलश्चारुकर-चरणनखनयनचिबुकदशनश्रवणललाटभ्रूत्तमाङ्गो वपुष्मान् गम्भीरोदात्तघोष । प्राय शरीराकारानुवर्तिनो हि गुणा दोषाश्च भवन्ति ।

(बृहत्सहिता प्रथमखण्ड )

अत्राचार्यवर्याणामाशयो वर्तते यत् शरीराभ्यन्तर-वर्तिनो गुणदोषयो प्रभाव शरीरस्योपर्यपि पतति । अत उत्कैर्गुणैरुपेता जना एवास्य शास्त्रस्याधिकारिणो भवितुमर्हन्ति। ये अविदित्वैव शास्त्र दैवज्ञत्व प्रपद्यन्ते ते नक्षत्रसूचका भवन्ति । तेभ्य शास्त्र रक्षितव्यम् । अत अध्यापनात् पूर्वं शिष्य आचार्यै परीक्षितव्य यतो हि सुपरीक्षितशिष्याय विद्यादान कल्याणाय भवति । अन्यत्र विद्यादानेन सरस्वती कुप्यति । यथोक्त केनचिदाचार्येण -

**नैतद्देयं दुर्विनीताय जातु**
**ज्ञान गुप्तं तद्धि सम्यक् फलाय ।**
**अस्थाने हि स्थाप्यमानैव वाचां**
**देवी कोपाग्निर्दहेन्नो चिराय ।।**
**विनयावनताय दीयमाना**
**प्रभवेत् कल्पलतेव सत्फलाय ।**
**उपकृत्यनुचिन्तकानि शास्त्रा-**
**ण्युपकारस्य पदं हि साधुरेव ।।**

(समरसार ४, ५)

अतो निर्विवाद वक्तु प्रभवामि यत् शास्त्ररक्षायै सुपरीक्षितशिष्याय विद्यादानस्य परम्परा पुनरस्माभि सर्वै सम्भूय सर्वत्र स्थापनीया ।

केषाञ्चन विदुषा मतमस्ति यत् ज्यौतिषशास्त्रस्य ह्रास करणग्रन्थानामाविष्कारेणाभवत् । एषा साहाय्येन सरलया सरण्या ग्रहाणा स्फुटीकरण ग्रहणादीनाञ्च ज्ञान भवितुमर्हति । परिणामत मूलसिद्धान्तानामध्ययनपरम्परा विलुप्तप्राया सञ्जाता । वेधोपकरणाना प्रयोगस्य, आकाशदर्शनेन ग्रहाणा ज्ञानस्य तेषा नताशोन्नताशदिगशक्रान्त्यशाना प्रत्यक्षीकरणपरम्परा एव विच्छिन्ना जाता । सर्वे दैवज्ञा इदानी करणग्रन्थोक्तेन पथा सरलतया गन्तुमभिलषन्ति न कोऽपि सूर्यसिद्धान्तीयानुपातेषु रुचि दधाति अत करणग्रन्था अपि ज्यौतिषशास्त्रस्य कृते बाधका सन्ति । परमह इद न स्वीकरोमि । यतो हि करणग्रन्थानामनुकूल प्रतिकूलो वा प्रभाव प्रमुखरूपेण सिद्धान्तस्कन्धस्योपरि पतति । पर ह्रासस्तु सिद्धान्तसहिताहोरात्मकस्य त्रिस्कन्धस्यैव दृश्यते । अस्माक दृष्ट्या तु करणग्रन्थाना रचनया ज्यौतिषशास्त्रस्य विस्तारो ऽभवत् । सिद्धान्तस्य पोषका प्रखरपण्डिता आचार्य भास्करा अपि करणकुतूहलाख्य करणग्रन्थमकार्षु पर तस्य न कश्चन दुष्प्रभावो दृश्यते । भास्करादनन्तरमपि ज्यौतिषशास्त्रेऽनुसन्धानमूलक कार्यमभवत् । अत करणग्रन्था कथमपि ह्रासस्य कारणानि न सन्ति ।

अत निष्कर्षरूपेण इदमेव वक्तु प्रभवामि यत् ज्यौतिषशास्त्रस्य सरक्षणाय प्रसाराय च वेधशालाना निर्माण तेषा प्रयोगश्चावश्यक। आधुनिकऋतुविज्ञानसस्थया सह ज्यौतिषशास्त्रस्य सम्बन्ध स्थापनीय । ज्यौतिषशास्त्रानुसार वृष्टेर्भूकम्पादीना पूर्वसूचनार्थं दैवज्ञै प्रयतितव्यम् । सर्वासु दिक्षु सर्वेषु क्षेत्रेषु चास्योपयोग प्रदर्श्यास्योपयोगित्व प्रतिपादनीय वर्तते। सर्वाणि शास्त्राणि तावदेव सुरक्षितानि भवन्ति यावदेतेषा सम्यक्तयानुशीलनपरम्परा प्रचलति। शास्त्रानुकूलव्यवहारेण स्वयमेव शास्त्राणि सुरक्षितानि भविष्यन्ति । यदा खगोलविज्ञाने, चिकित्साविज्ञाने भूभौतिकीविज्ञाने चास्योपयोग सिध्यति तदा आधुनिकानामप्याकर्षणमस्मिन् शास्त्रे भविष्यति । उपयोगेनावश्यकता वर्धते । यदा आवश्यकता भविष्यति तदा स्वयमेवास्य सरक्षण प्रसारश्च भविष्यत्येव ॥ ✤

# SASTRA SESSION - I

२२-

# अध्यक्षभाषणम्

**श्री रेमिल्ल सूर्यप्रकाशशास्त्री**
राजमहेन्द्रवरम्

१. **वागीशाद्या सुमनस सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्या स्युस्तं नमामि गजाननम् ।।**

२. **प्रणो देवी सरस्वती वाजेभिर्वाजिनीवती ।
धीनामवित्र्यवतु आनो दिवो बृहत पर्वता ।
दासरस्वती यजता गन्तु यज्ञम् । हवं देवी
जुजुषाणा घृताची शग्मानो वाचमुशती शृणोतु ।।**

३. **श्रिय कान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ।।**

४. **शास्त्राब्धिपारदृश्वानो वाग्देवीरङ्गभूमय ।
विश्वम्भरागीष्पतयो गृह्णीत प्रणतीर्मम ।।**

५. **एषा परिषद्यथा सुनिर्व्यूढा सर्वश्लाघ्या भविता
तथा याचे सांजलिबन्धं पण्डितप्रवरान् व ।।**

विदितचरमेवैतत्सर्वेषा श्रीतिरुमल तिरुपति नाम्ना प्रसिद्ध वेकटाचलक्षेत्रमिति।

**"धर्मसंस्थापनार्थाय । संभवामि युगे युगे"।।**

इति गीतावचनानुसारेण सर्वत्र धर्मसस्थापनार्थं अस्मिन्कलियुगे भूलोकवैकुण्ठे वेकटाचलक्षेत्रे सर्वान् दीनजनार्नुद्धर्तुकाम "कलौ वेङ्कटनायक" इत्यभियुक्त्या परमेश्वर वेकटश्रीनिवासनाम्ना यतोह्यवतीर्ण अत एव वेङ्कटाचलक्षेत्रमित्यन्वर्थं नाम बिभर्ति । अस्मिन् क्षेत्रे चतुर्णामपि वेदाना, वेदाङ्गाना, इतिहासपुराणाना च पारायणरूपेण, अन्यत्र च वेदपारायणरूपेण, अध्ययन अध्यापनसम्प्रदायरूपेण तत्तद्ग्रन्थमुद्रापणरूपेण तत्तद्ग्रन्थपरिशोधनकारयितृत्वरूपेण भाविकालेऽपि वैदिकवाङ्मयस्य अविस्मरणार्थं यन्त्रारूढात्मककरणरूपेण नृत्यगीतादिकलापोषणरूपेण च एवमेव बहुभि प्रकारै सर्वदा वेदशास्त्राभिवृद्धये अतीव श्रद्धालुभि सहृदयै देशश्रेयस्कामै अत्रत्यैरधिकारि महोदयै प्रयतमानेषु प्रकारेषु मध्ये अयमन्यतम प्रकार विविधेभ्यो राष्ट्रेभ्यो विद्वद्वरेण्यावागमय्य वेदशास्त्रपण्डित परिषत्प्रचालनात्मक इति जानन्ति भवन्तस्सर्वेऽपि ।

अखिलभारतीयवेदशास्त्रपण्डितपरिषद अस्या चतुर्थदिवसप्रयुक्ते ऽधिवेशने अस्मिन् बहूना विद्वद्धौरेयाणा ज्ञानवृद्धाना वयोवृद्धाना च सत्त्वेऽपि अल्पज्ञोऽह अध्यक्षपदवी आरोपितोऽस्मि, एतत्परिषन्निर्वाहकैरिति तैभ्यो मदीया नती कृतज्ञता च निवेदयामि । अध्यक्षपदवी वोढुमर्हता बहुरूपा । यथा परिनिष्ठित पाण्डित्य निर्वाहकशक्ति जनताया बहुमान वयोवृद्धता, कार्यनिर्वाहकवर्गीय आदराभिमाने इत्यादि । तत्र पचमविध मयि वर्तत इत्यङ्ग यकार्षम् ।

सम्प्रदायेन नियन्त्रितोऽस्मि अध्यक्षभाषणनाम्ना भवता सविधे किमपि वक्तु मदीये भाषणे विद्यमानान्दोषानधरीकृत्य गुणानेव स्वीकुर्वन्त्विति साञ्जलिबन्ध सप्रश्रयमभ्यर्थये । अस्मिन्दिवसे कार्यक्रमपट्टिकाप्रकारेण अत्रोपस्थितैस्सर्वैरपि पण्डितै दर्शनशास्त्राण्यधिकृत्य विचारयितव्य । यद्यपि न्यायवैशेषिकसाख्ययोगपूर्वोत्तर मीमासाख्यानि षड्दर्शनशास्त्राणि सन्ति तत्र साक्षाद्वेदार्थविचारात्मके पूर्वोत्तरमीमासाख्ये शास्त्रे इत्यत्र न कोपि विवाद तथापि अवशिष्टानि चत्वार्यपि दर्शनानि यथा वेदार्थोपयोगीनि तथा विचारणीयानि ॥

अद्यतनकाले प्राचीनपद्धत्या यो वेदशास्त्राऽध्ययनप्रवणा अतीव विरलविरला एव दृश्यन्ते। प्राय वेदशास्त्राध्ययनाधिकारिण बहव भारतीया आग्लभाषाशिक्षामण्डिता पाश्चात्यानुयायिन यद्यपि केचित् पाश्चात्या तदनुयायिन भारतीया अपि सस्कृतभाषाभिमानिन तस्या भाषाया कृतपरिश्रमाश्च सन्ति । नतु केवल भाषापरिश्रम वेदविज्ञान समुद्धरणेऽपि समुत्सुका बहून्मन्त्रान् व्याचिख्यु इदानीमपि व्याचक्षते च। तादृशपरिश्रमेण ते तावदतीव शलाध्या तथापि सम्यक्परिशीलने सति मीमासाशास्त्रविरुद्धतया सायणादिभाष्यविरुद्धतया च बहुषु स्थलेषु ऐतिहासिकी विचारपद्धतिमवलम्ब्य वेदार्थविचारप्रवणा आसन्निति तद्ग्रन्थपरिशीलनेन स्पष्टमवगम्यते । तत्र को हेतुरिति विचिकित्सायामेव प्रतीयते । पाश्चात्याना, तदनुयायिना भारतीयाना प्राचीनसाप्रदायिकभारतीयाना च दृष्टिभेदो वर्तते । तथाहि । पाश्चात्यानामयमभिप्राय ऋषय प्राकृता जना इति ते सोममदवैभवेन देवतास्तुतिपरा या काश्चन ऋच प्रणीय तत्तत्सूक्तनाम्ना वेदेषु प्रावेशयन्निति । यतो ह्यनित्यानामृषीणा नामानि श्रूयन्ते अतो हेतो वेदा अनित्या इति पौरुषेया इति च सङ्गिरन्ते । किञ्च वेदोच्चारणे स्वरवर्णादिविपर्यासेन प्रत्यवायो नास्तीति केवलमर्थप्रधाना इति तत्रापि वैज्ञानिकार्थपरा एवेति च केचित् मन्त्रभागस्यैव वेदत्व, नतु ब्राह्मणभागस्येति, वेदो नाम कश्चन पुरातनग्रन्थ नतु भगवदात्मक 'स्वाध्यायोऽध्येतव्य ' इत्यत्र कर्तृविशेषवाचकपदाश्रवणात् ''समानो मन्त्रस्समिति स्समानीति'' मन्त्रे, मन्त्र = वेद , समान = सर्वेषा वर्णाना समानाधिकारिक इति प्रतिपादितत्वाच्च वेदाध्ययने, तदुदितकर्मस्वपि सर्वेषा वर्णानामधिकार इति, धर्मो नाम नतु केवल वेदविहित किन्तु तत्तत्कालानुसारेण समाजेन निर्णीत इत्येवेति बहव बहुधा सङ्गिरन्ते । साम्प्रदायिकभारतीयास्तु 'ऋषिर्दर्शनात्' इति निरुक्तात् ऋषय मन्त्रद्रष्टार नतु कर्तार इति वेदे श्रूयमाणाना ऋषीणा अनित्यत्व नास्तीति ''यज्ञेऽध्वर्युरिव ह्यस्ति मनुर्मन्वन्तरे सदा'' इत्यादिवार्तिकग्रन्थेन तेषामृषीणा प्रवाहनित्यत्वमुपपादितम् । अत एव तच्छ्रवणमात्रेण वेदानामनित्यत्वदोषोऽपि नास्तीति वेदे यथाकथचिदपि पुरुषानुप्रवेशो न सभवतीति मीमासादर्शनस्य प्रथमपादे बहुधा विचार्य निर्णीतत्वात् अपौरुषेया इति गुरुमुखोच्चारण - अनूच्चारणात्मकमध्ययन तद्विधिवाक्येन विहितमिति शीक्षाप्रातिशाख्यादि शास्त्रानुसारेण नियतस्वरवर्णविशिष्ट-आनुपूर्व्या अपि प्राधान्य मातिष्ठन्ते बहव । ''मन्त्रब्राह्मणयोर्वेदनामधेयमिति'' कल्पसूत्रम् । तेन मन्त्रब्राह्मणसमुदायस्यैव वेदत्वमिति तत्सर्वमध्येयमिति, अन्यथा महान्प्रत्यवायो भवेदिति च श्रद्धते । वेदा प्रमाणान्तरानवगतधर्मब्रह्मावबोधका न तु वैज्ञानिकार्थपरा इति च । अत एव भट्टपादै -

**लोकायतिकमूर्खाणां नैवान्यत्कर्म विद्यते ।**
**यावत्किंचिददृष्टार्थं तद्दृष्टार्थं हि कुर्वते ॥**
**वैदिकान्यपि कर्माणि दृष्टार्थान्येव ते विदु ।**
**तस्माल्लोकायतस्थानां धर्मनाशनशालिनाम् ॥**
**एवं मीमांसकै कार्यं न मनोरथपूरणम् ॥**

इत्यादिग्रन्थेन वार्तिके दृष्टार्थपरत्वेन वर्णनपरा निराकृता । अत एव मीमासापद्धतिमवलम्ब्य धर्मब्रह्मसबद्धार्थपरिरक्षणे च बद्धादरा दरीदृश्यन्ते । तथाहि-

**धर्मे प्रमीयमाणे हि वेदेन करणात्मना ।**
**इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥''**

इति श्लोकवार्तिकोक्तदिशा मीमासाशास्त्रसाहाय्येनैव वेदार्थमधिजिगमिषन्ति । अत एव 'समानो मन्त्र स्समितिस्समानी'ति मन्त्रस्य ''यस्समानैर्मिथो विप्रिय-

स्स्यात्तमेतया सज्ञान्यायाजयेत्'' इति वाक्य विहितसज्ञानीनामकयागे विनियोग इति कल्पसूत्रादवधार्य तत्प्रकरणानुरोधेन यत अय याग अन्योन्य-शत्रुभावपरिहारार्थं विहित तदनुकूलतया ''समानो मन्त्र'' उभयोरेकविधमेव आलोचन भवतु, कर्तव्ये कार्ये एकविध एव सकल्पो भवतु-इत्याद्यर्थ सायणभाष्योक्त इति तमेवार्थमाददते । केचिन्मीमासाशास्त्रानभिज्ञा मीमासाशास्त्रस्याप्युपरि एवमाक्षिपन्ति । तथाहि-केनचित् सुप्रासद्धन पाश्चात्यविदुषा यज्ञलक्षणविषय स्वप्रकाशिते ग्रन्थे मीमासासम्मतयज्ञलक्षणे विरोध अस्तीति फलार्थं तत्तद्देवतोद्देशेन हविर्दानमेव याग इति । यदर्थं याग अनुष्ठीयते तत् अध्वर्युकृतहविष्प्रक्षेपानन्तर यजमान ''अग्नय इद न मम'' इत्यादि त्यागमन्त्रेण फल परित्यजति । तेन यज्ञारम्भ हेतुभूतफलपरित्यागेन यज्ञो निष्फलो भवति इत्येको विरोध। वेदविहित कर्मविभाग नित्यकाम्यभेदेन द्वेधा वर्तते । यदवश्यमनुष्ठेयतया विहित तन्नित्यम्। यत् फलकामनया विहित तत्काम्यम्। यदि फलेच्छा स्यात् तदनुष्ठीयेत अत एव तदैच्छिकमिति। याज्ञिका काम्य - अग्निचयनेन साक नित्याग्निष्टोममनुतिष्ठन्ति । अत्र काम्यमैच्छिकम् नित्यमवश्यमनुष्ठेयम् एतदुभयमेकत्र न सगच्छते । किच त्यागमन्त्रे फल त्यज्यते । यज्ञो निष्फलो भवति फलार्थं खलु यज्ञ अनुष्ठीयते इत्यपरो विरोध । एवविधा बहवो विरोधा मीमासाग्रन्थेषु उपलभ्यन्त इति ।

एते मीमासाशास्त्र सम्यक् न जानन्तीति उदाहृतग्रन्थवशेनैव सुस्पष्ट प्रतीयते। सम्यक परिशीलने सति विरोध एव नास्ति, तथाहि ''यावज्जीवमग्निहोत्र जुहोति'' इत्यादिषु सायप्रात कालावच्छिन्नजीवनमित्यादिनिमित्त नतु फलकामना, तथापि नित्याना पापक्षय फलमिति ''धर्मेण पापमपनुदतीत्यत्र धर्मशब्देन नित्यकर्माण्यभिधीयन्त इति शास्त्रे उक्तम्। काम्येषु फलकामनाया निमित्तत्वेऽपि नित्येषु काम्येषु च यजमानोक्तत्यागमन्त्रेण न फल त्यज्यते किंतु अध्वर्युणा हविष्प्रक्षेपकाले यजमानेन यद्द्रव्य मनसा त्यक्त तदेव वाचा स्पष्टार्थं त्यज्यत इत्युक्तम्। न तु फल त्यज्यत इति विरोध। किंच अग्निचयन कार्यं भवतु तथापि स्वतन्त्रतया नानुष्ठेयम् येन केनचित् सोमयागेन । यथा इन्द्रियफलार्थं दधि अग्निहोत्रहोममाश्रित्य विधीयते ''दध्ना जुहोतीति'' तद्वत् इति इन्द्रियकामाधिकरणन्याय योजनीय

अपि च एकस्मिन्नेव कर्मणि नित्यत्व काम्यत्व न सभवति, एकस्य अवश्यानुष्ठेयत्वात् अपरस्य ऐच्छिकत्वादिति यदुक्त तत्र,सयोगपृथक्त्वन्यायेन विनियोजकवाक्यपृथक्त्वात् प्रयोगभेदेन तेन परमेश्वरप्रीणयानि तेन स्वर्गलोकमवान्पवानीति सकल्पभेदेनापि विरोध नास्तीति स्पष्टम् । यत् धर्माऽधर्मविषयेऽपि तत्तत्कालानुसारेण निर्णेतव्य इत्युक्त तत् सर्वधा नोपपन्नमिति।

साम्प्रदायिकास्तु-'मीमासाशास्त्रे बहुधा विचार्य खण्डितम्। अस्मिन् विषये मीमासाशास्त्रमेव प्रमाण'मिति वदन्ति । अत एवोक्त वार्तिके ''धर्माख्य विषय वक्तु मीमासाया प्रयोजनम्'' इति । तत्र एव विचारित को धर्म ? कथलक्षणक ? इति । भगवान् जैमिनि ''चोदनालक्षणोऽर्थो धर्म'' इति । ''तस्माच्चोदनालक्षण अर्थ श्रेयस्कर । यश्श्रेयस्कर स धर्मशब्देनोच्यते'' इति भाष्यम् ।

> ''ज्ञेयो हि पुरुषप्रीतिस्सा द्रव्यगुणकर्मभि ।
> चोदना लक्षणै स्साध्या तस्मात्तेष्वेव धर्मता ॥''
>
> -वार्तिकम्

एष धर्म धर्मो विश्वस्य जगत प्रतिष्ठा'' इति श्रुत्या जगत्कारणत्वेन अभिहित। अयमेव धर्म लोके प्राणिनाम् अन्नपानादिसमृद्धिकारणमिति श्रुति। तथाहि, ''यज्ञपतिमृषय एनसाहु प्रजा निर्भक्ता अनुतप्य माना मघव्यौ स्तोका वपन्तौ रराध ।'' लोके यदा प्रजा निर्भक्ता = अन्नपानादिरहिता अनुतप्यमाना = सन्तप्यमाना भवेयु तदा यज्ञाधिकारी यज्ञाननुष्ठानमेव दुर्भिक्षस्य कारणमिति, ऋषय अतीन्द्रियद्रष्टार तमधिकारिण निन्दन्ति इति भाष्यम् । यज्ञाधिकारी क ? इति निर्णयावसरे । ''अग्निहोत्र जुहुयात्स्वर्गकाम ज्योतिष्टोमेन स्वर्गकामो यजेत'' इत्यादिवाक्येषु स्वर्गादि कामनावानधिकारीति श्रूयत इति, स्वर्गादिकामनाया सर्वेषामविशिष्टत्वात् तत्तत्कामनावता सर्वेषा वर्णानामधिकारो भवतु इत्याशङ्क्य अश्रुतमप्याधिकारिविशेषणत्रय अध्ययनाविधोसिद्धार्थज्ञानवत्त्व, आधानविधिसिद्धाग्नि मत्त्व, विष्णुक्रमणादिसामर्थ्यं च आवश्यकमिति, तद्विशेषणवानधिकारीति निरणैषीत् मीमासादर्शन अग्यद्यपि ''स्वाध्यायोऽध्येतव्य'' इत्यत्र अध्ययनकर्तृवाचक पदस्य अश्रुतत्वेपि उपनयनविध्येक वाक्यतया उपनीताना त्रैवर्णिकानामेव अध्ययनाधिकार इति, तादृशाध्ययन विधिसिद्धार्थज्ञानवान् ''वसन्ते

ब्राहमणोऽग्नीनादधीतेति'' वाक्यविहिताधान सिद्धाग्निमान् अधिकारीति निर्णीय तादृशाधिकारि कृत कर्मैव लोके सुभिक्षसाधनमिति मीमासासाहाय्येन निश्चिन्वन्ति। एव वेदेन विहित यो याग स धर्म इत्युक्ते सति स याग ब्राह्मण कर्तृक धर्मो भूत्वान्यकर्तृक कथमधर्मो भवति? यस्य पदार्थस्य य स्वभाव स सर्वदा तथैव भवति कदापि नापवर्तितुमर्हतीति सर्वेषा सर्वकर्मस्वधिकार इति केचिदाक्षिपन्ति। तत्र भट्टपादै धर्मलक्षणविचार प्रसगे बहून् प्रकारभेदान्प्रदर्श्य अतिव्याप्त्याद्दिदोषराहित्यार्थं अन्ततो गत्वा-

"धर्माऽधर्मार्थिभिर्नित्य मृग्यौ विधिनिषेधकौ"। अय धर्म अयमधर्म इति निर्णयविषये विधिनिषेधशास्त्रे एव शरणमित्युक्तम्। अन्यथा-

**एव ये निपुण प्राहु तैरप्येतत् परीक्ष्यताम् ।**
**सुरापानादिभिश्शूद्र कि याति नरक कृतै ।।**

**वैश्यस्तोमेन वा कि स्यात् विप्राजन्ययो फलम् ।**
**पचम्या मिष्टिकरणान्मध्याह्ने चाग्निहोत्रत ।।**

**तस्मा द्यद्यादृश कर्म यत्फलोत्पत्ति शक्तिकम् ।**
**शास्त्रेण गम्यते तस्य तादृशस्यैव तत्फलम् ।।**

इति अस्य अयमर्थ - "न सुरा पिबेत्" इति शास्त्रेण त्रैवर्णिकाना सुरापान निषिद्धम् । सुरा त्रिविधा वर्तते। "गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा। यथैवैका तथा सर्वा न पेया ब्रह्मवादिभि" इति एका सुरा त्रैवर्णिकाना निषिद्धा त्रिविधापि सुरा ब्राह्मणस्य निषिद्धेति स्मृतिवार्तिके प्रदर्शिता । यद्यप्यय निषेध न शूद्रस्य अत एव शूद्रेण सुरापाने कृतेऽपि तस्य तत्प्रत्यवायो नास्ति नरक प्राप्ति रपि नास्ति । तथापि ब्राह्मणकर्तृकसुरापानस्य प्रत्यवायनिमित्तत्वेन पानक्रियाऽविशेषात् शूद्रस्यापि प्रत्यवायापत्ति "राजा राजसूयेन यजेत, वैश्यो वैश्य स्तोमेवेति" क्षत्रिय वैश्ययो व्यवस्थया विहित यत्क र्मद्वयम् तस्य ब्राह्मणकर्तृकत्वेऽपि फलोत्पादकत्वा पति। "साय जुहोति, प्रातर्जुहोति" इति सायप्रात कालयोर्विहितस्याग्निहोत्रस्य मध्याह्ने कृतत्वेऽपि फलात्पादकत्वा पत्ति अमावास्यापौर्णमास्यो विहित दर्शपूर्णमासाख्य कर्म पचम्या मनुष्ठितमपि फलोत्पादक भवेदित्यतिप्रसङ्गरूपदोषापत्ति प्रदर्श्य, यस्मिन्काले, येन कर्त्रा, यथा कर्तव्य मिति यत्फलसाधनमिति शास्त्रेण विहित तत्तथैव अनुष्ठित सत् तत्तत्फलसाधन भवेदिति तस्यैव धर्मत्वमिति शास्त्रे सिद्धान्तितम् । एतेन सर्वेषा वर्णानामधिकार स्समान सर्वेषा फलमविशिष्टमेवेति ये वदन्ति ते प्रत्युक्ता भवेयु एव धर्मस्वरूपलक्षणपरिष्कार । कृत्वा धर्मं प्रति वेद एव प्रमाण वेदस्य प्रामाण्य मस्त्येवेति सिद्धान्तितम् । अत धर्माधर्मनिर्णयार्थं मीमासादर्शनस्य आवश्यकता वर्तते ।

यद्यपि न्यायवैशेषिक, साख्य योग, पूर्वोत्तर मीमासाख्यानि षड्दर्शनशास्त्राणि भवन्ति दृश्यते आत्मा अनेनेति व्युत्पत्त्या एतनि शास्त्राणि दर्शनशब्द व्यपदेश्यानि भवन्ति । एतेषा शास्त्राणा आत्मतत्त्व साक्षात्कारसाधन भेदप्रतिपादकत्वेऽपि प्रमाणानामियत्ता निरूपणे भेदस्य सत्त्वेऽपि तत्त्वज्ञाना देव दु खनिवृत्ति सैव मोक्ष इत्यत्र न विप्रतिपत्ति अन्यैर्विरोधे सति वय "पञ्चोत्तर शत" मिति न्यायेन सर्वदर्शनकारा अपि एककण्ठेन वेदप्रामाण्यमुररी कुर्वन्ति । सर्वेषा दर्शनाना मध्ये मीमासादर्शन वेदार्थनिर्णयविषये अन्तरङ्गविधया उपयोक्ष्यति । अत एव "अथातो धर्मजिज्ञासा" इत्यत्र शबरस्वामिना अथ शब्दार्थविचार " अस्मिन् शास्त्रे वेदवाक्याना मनेक विद्यो वियार इह वर्तिष्यत इति तादृशी धर्मजिज्ञासामधिकृत्य अथशब्द प्रयुक्तवानाचार्य । या वेदाध्ययनमन्तरेण न सभवति इति "स्वाध्यायोध्येतव्य इति वाक्येन अध्ययनस्य अर्थज्ञानपर्यन्त कर्तव्यतया विहितत्वात्, तत् वेदार्थज्ञान धर्मविचार शास्त्रमन्तरा अनुपपन्नमिति, अध्ययन विधिवाक्येनैव धर्मविचारशास्त्राध्ययनमपि विहितमित्युक्तम्। तथाच अन्तरङ्गविधया वेदार्थनिर्णये मीमासादर्शन-मुपकारकमिति सिद्धम्। एवमेव अन्यान्यपि दर्शनानि अधिकृत्य यथा उपयोक्ष्यन्ति तथा विचारयन्तु इत्याशासे । ✱

S.S. I

# KEY NOTE ADDRESS

**Prof. K.T. PANDURANGI**
Bangalore

*Respected Svamijis of various Sampradaya!*
*Learned Traditional and Modern Scholars!*

I consider it an honour to deliver the keynote address at this Sastra Sadas This gives me an opportunity to express my views and give suitable suggestions to the preservation of Sastras and the continuation of the teaching and learning tradition of the Sastras As you all know, there are six systems of Darsanas viz ,

कपिलस्य कणादस्य गोतमस्य पतञ्जले ।
व्यासस्य जैमिनेश्चेति दर्शनानि षडेव हि ॥

In the course of time a vast literature has developed on these Darsanas consisting of Sutra, Bhashya, Vyakhyana, Anuvyakhyana, Vadagrantha, Prakaranagrantha, Krodapatra, Phakkika etc This entire literature was preserved orally by the Guru-Sisya tradition from generation to generation in the past Later when the art of writing developed, these works were written on bhurja leaves, palm leaves and country paper etc The word Pustaka occurs in Kautilya's Arthasastra The word Grantha is still earlier The word Lipi is much more earlier In the earliest times, writing must have been used for very limited purposes and only later it must have been used for writing literary and Sastra works In the early stages, probably students and teachers themselves wrote down these works Later Book writing must have been developed as a service to the education These book writers were known as Lipikaras They took great care to write neatly and correctly The following verse is found in many manuscripts

भग्नपृष्ठ कटिग्रीव स्तब्धदृष्टिरधोमुख ।
कष्टेन लिखितो ग्रन्थ यत्नेन परिपाल्यताम् ॥

This service of writing books and donating them to the Scholars and students was developed in Jaina tradition greatly The Jains consider it as a holy service It is stated that the king of pattana got written by the scribes thousand copies of 'Sabdanusasana of Hemachandra, and distributed them to the Scholars He also developed a large library of Books This is how all major works, excepting the Vedas were reduced to writing in the past

The teaching and learning of these Sastras were mostly conducted at the very residences of the Scholars in Agraharas There were also Pathashalas attached to the Temples At the Mathas of various Sampradayas the teaching and learning of the respective systems was going on Every traditional scholar used to have his own collection of books in manuscripts There were a few Libraries in Temples and Maths It is also learnt that there were Universities in the learning Centres like Nalanda and Takshasila Buddhists Viharas and

Basatis of Jains had large collections of palmleaf manuscripts

During 19th century and the early part of 20th Century Samskrita Mahapathashalas were established by the British administration and Native rules in the learning centres like, Calcutta, Varanasi, Darbhanga, Jaipur, Mysore, Cochin, Trivandrum etc Oriental Libraries and Research Institutes were also established Royal Asiatic Societies were established at Calcutta and Bombay Vidvat Sadas and Vakyartha Sadas were organised at Sringeri, Udipi, Cochin, Pudukottai in the South and Varanasi, Darbhanga, Baroda etc , in the North Recently, Kendriya Vidyapeethas and Sanskrit Universites are started

With the advent of British rule in India, modern types of Universities and colleges were established There were Sanskrit Departments in these Universities Forigners took interest in Vedas ans Sastras Many German and French scholars translated these into their languages and published the Texts and the studies Thus, Sanskrit became an International subject Great Scholars like Maxmuller, Winternitz, Deussen etc, have rendered great service to the study of Veda and Sastras

However, in the Second half of the 20th Century a set back in the study of Veda and Sastra has set in Firstly, there is a dearth of students in all Sanskrit Mahapatasalas and Institutions Secondly, there is considerable reduction in the standard of the scholarship and the interest in teaching on the part of Saśtra teachers In the early part of this Century, Sanskrit books were published in a big way by the Nirnayasagara, Chaukhamba etc, Publishers and there were also Book series, like Baroda Oriental Series, Trivandrum Oriental Series, Mysore Oriental Series etc The Books published by these Organisations are out of stock now These Books are not available for teaching and learning There are no good Libraries also Most of the Public libraries do not stack Sanskrit Books Most of the manuscripts Libraries are in a very bad condition Manuscripts and printed books in these Libraries are perishing for lack of sufficient funds to maintain and publish them The provision for sanskrit studies as a part of general education at High school and College level is removed in several States This has affected the employment opportunities of Sanskrit Pandits This neglect of Sanskrit and Sanskrit Institutions is due to the lack of realisation of the amount of knowledge that is stored in Sanskrit Those who shape the educational policies carry the impression that Sanskrit contains only some religious books and Puranas They also carry the impression that this language is the concern of only the priestly class of people and it has no modern knowledge or the knowledge relevant to the modern life This impression is widespread now Therefore, it is necessary to remove this impression and bring home the rich knowledge that is stored in Sanskrit

The Vedas and Sastras are not mere religious books in the sectarian sense These contain a lot of philosophical, social, cultural, historical and even Scientific knowledge Vedas are not mere prayers to the deities of Nature These represent a whole Civilisation and also all aspects of that Civilisation The Vedanta philosophy deeply speculates on the nature of the Universe, the man, and the Central principle behind these The Panini's sutras, Patanjali's Bhashya on it, Bhartrihari's Vakyapadiya and a host of other works on Sanskrit grammar have made a very scientific study of the language and are considered to be even superior to modern linguistic discoveries The Navyanyaya developed in Bengal and later in Andhra, Karnataka and Chola Country has mathamatical precision It is a kind of symbolic language Apart from these theoratical branches of knowledge, there are great works on political science like Arthasastra of Kautilya, on aesthetics like Natyasastra of Bharata and Dhvanyaloka of Anandavardhana, on jurisprudance like Vyavahara Adhyayas of Yajnyavalkyasmritis and similar other secular aspects of life, works on Astronomy and Mathematics are well-known There are good many works on fine arts like Music, Sculpture, Temple construction, Iconography etc Works on Ayurveda, Alchemy, Gem cutting, mineral polishing etc , are also available Thus the works in Sanskrit represent all aspects of a civilisation that prevailed on Indian soil for more than five thousand years It was British administration that tried to introduce a Social order based on Roman law and non-Indian ethics on this Indian soil The intellectuals of 19th and 20th Centuries took this to be the starting point of Indian life and culture and tried to ignore and even spite the great cultural heritage of India This had made the Indians the non-Indians on their own soil However, no Society can survive with a grafted head and footless body Therefore, we have to regain our Indianness The only way of reviving our Indianness and rediscover our cultural heritage is to revive our Sastra study and strengthen our Sastra knowledge

There is one more reason that necessitates the sastra study This is restoring our emotional integration Sanskrit has played a big role in achieving the cultural unity and the emotional integration of India A mere glance at the geographical distribution of our great works will reveal as to how our academic life pervaed the whole India and brought about the intellectual and cultural unity of this vast country The Vedanta sutras were written at Badarikasrama by Badarayana but Bhashyas were written on it in Kerala, Chola Country,

Karnataka and Gujarat by Sankara, Ramanuja, Madhva, Vallabha and Nimbarka Panini's sutras were written in Kasmir while Patanjali's Bhashya was written at Chidambaram in the South The Navyanyaya was started in Bengal but developed in Karnataka and Andhra The Alankara sastra developed in Kasmir in its earlier phase but developed in the South later One wonders how in those days of slow communication and manual transport a sastra work attracted a commentator or a critic from a distant place The academic community all over India seems to have been very alert, quick in response and in continous touch with each other It is this that has greatly contributed to the Cultural, Intellectual and emotional integration of India Therefore, both to preserve the rich knowledge enshrined in our sastras and to strengthen the intellectual and emotional integration of India, the strengthening of our Sastra study and knowledge is very essential

In the light of this, I suggest the following measures to strengthen the Sastra study

1) The dearth of Students could be overcome by introducing suitable scholarships I suggest that a Scholarship of Rs 300/- per month be given to Prak-Sastri students and Rs 500/- to Sastri and the above level students This should be applicable to the students in all Sanskrit Institutions i e , private and the Government A Sanskrit Scholarship fund of Rs one Hundred Crore be created for this This fund may be subscribed by the Government, organisations like TTD, Mathadhipatis, Charitable Trusts and big Industrialists

As regards the employment opportunities, the Sastra study course has to be modernised by introducing at least one modern subject as subsidary subject Subjects like History, Sociology, Psychology, other languages and literature may be introduced This will not only enable the Sastra Degree holders to take up other jobs but also widen their outlook and enable them to explore the sastra knowledge better and to make it relevant to the modern knowledge

2 As regards maintaining the standard of teaching and the depth of the knowledge of the Teachers, it is more a matter of their devotion than any external incentive However, there is one area available for this purpose that can be utilised There are a large number of traditional scholars who are not employed anywhere but who have deep knowledge of Sastras Such scholars may be treated as emeritus scholars giving them an honorarium of Rs Three thousand per month The Sastra teachers regularly employed may be deputed to these scholars from time to time to refresh their knowledge These emeritus scholars may also be invited to the regular Institutions to conduct refresher courses A fund of Rs, One hundred crores may be created to finance this Scheme eliciting subscription as stated above One thousand emeritus scholors may be selected representing different sastras

3 In respect of protection and publication of manuscripts, developing Sasnskrit books-Libraries etc ,

i) A National Manuscripts Library be established

ii) A National Sanskrit Book Trust be set up

iii) A State Sanskrit Library be developed in each State

iv) There should be Sanskrit book Section in all Public Libraries

A fund of One hundred Crore may be set up for this purpose also If one peruses the Annual budget and the plan Budget of our Country, setting up three Funds of One hundred crore each for Sanskrit is giving just a grain of our budget to the development of Sanskrit I hope these suggestions will be discussed in the course of the deliberations of this Conference

In this Sastra Sadas eminent Scholars are going to present the papers highlighting the study and research work, that is going on in the Country and abroad Therefore, I have not touched the same in my keynote address to avoid prolonging and duplication I may add the information known to me in the course of the discussion However, I would like to make the following general suggestions in respect of the study and research

1) A Research information Centre at Tirupathi and Delhi Sanskrit Universities be set up to avoid duplication, repetition and acquaint the Research students with the latest research programmes in the country and abroad
2) The themes selected for the Research should not be merely critical edition, or Text study type These should be conceptual and comparative
3) Students undertaking Research in Philosophical topics should acquaint themselves with Western Philosophical thought on the relevant subjects and even the Scientific thought
4) Some Foreign scholars have recently published some books mentioning contradictions in our Sastras like Purvamimamsa These works have to be reviewed and answered
5) While selecting the themes for the Research, instead of selecting merely theoretical topics, it is better to select such subjects that have social purpose to serve and are relevant to modern challenges

I hope these guidelines will be kept in mind

I close my address by thanking all the learned Scholars for their patient hearing and the organisers for giving me this opportunity

५५ - 1-1

# भारतदेशे न्यायशास्त्रस्य साम्प्रदायिकाधुनिकाध्ययनयोः परिस्थितिः

**श्री गोडा सुब्रह्मण्यशास्त्री**
मद्रपुरी ।

भारतदेशे एतदर्धशताब्द्या पूर्वं सर्वेषामेव शास्त्राणामध्ययनरीतिरन्यादृशी आसीत्। शास्त्रेषु प्रवृत्ते पूर्वं सर्वेणाप्यध्येत्रा नाटकान्तसाहित्य सम्यक् सम्पादनीयमासीत्। अत इदानीमिव तदा शास्त्रग्रन्थेषु विद्यमानाना वाक्यानामन्वयादिप्रदर्शनस्यावश्यकता नासीत्। पदार्थज्ञानार्थ छात्रस्य प्रयासो नापेक्षित। विषयपरिज्ञानमेव सम्पादनीयमासीत्। अत शास्त्रार्थज्ञान सुलभतया सम्पादयितुमशक्यत। प्राचीनाना ग्रन्थाना दर्शने ग्रन्थकर्तृणा न्यायशास्त्रपरिज्ञान कियदासीदिति ज्ञायते। न्यायशास्त्र हि प्रमाणशास्त्रम्। तदध्ययनेन बहूनि प्रयोजनानि लभ्यानि। उक्त हि।

**"मोहं रुणद्धि विमलीकुरुते च बुद्धिं**
**सूते च संस्कृतपदव्यवहारशक्तिम्।**
**शास्त्रान्तराध्ययनयोग्यतया युनक्ति**
**तर्कश्रमो न तनुते कमिहोपकारम्"॥**

इति। न्यायशास्त्राध्ययन हि विषयपरिज्ञाननिरोधकम् अज्ञान विनाश्य नवनवोन्मेषशालिनी बुद्धि अपमार्गप्रवृत्तित, अर्थात् शास्त्रगतपङ्क्तीना विपरीतार्थग्रहणात् प्रतिनिवर्त्य यथा वदर्थावबोधनसमर्थां करोति। इदमेव विमली करणमुच्यते। अत व्याकरण मीमासादिशास्त्रा- ध्ययनस्यापि न्यायशास्त्राध्ययन बहूपकरोति। अत एव प्राचीना सर्वेऽपि न्यायशास्त्रेऽधीतिन एवासन्। पञ्चाशद्वर्षेभ्य पूर्वं न्याय शास्त्रस्याध्ययन सम्यगासीत्। तदा तर्कसङ्ग्रह, न्यायबोधिनी, दीपिका, नीलकण्ठीयम् मुक्तावली, दिनकरी चेति प्रकरण षट्कमवश्य शास्त्रप्रविष्टै सर्वैरप्यधीतमासीत्। तेन सम्यक् पदार्थव्युत्पत्तिर्लभ्यते। तदनन्तर वादग्रन्थेषु प्रवेश इति क्रम। तत्रापि पञ्चलक्षणी, चतुर्दशलक्षणी, सिद्धान्तलक्षण, अवच्छेदकत्वनिरुक्ति पक्षता, अवयव इति पूर्ववादन्यायग्रन्थाना समग्रतया अध्ययन कर्तव्यमासीत्। तदनन्तर हेत्वाभाससामान्य निरुक्ति, सव्यभिचारसामान्य- निरुक्ति, सत्प्रतिपक्ष, बाध, व्युत्पत्तिवाद, शक्तिवाद, प्रामाण्यवाद इत्युत्तरवादग्रन्थाना सम्पूर्णमध्ययन कर्तव्यमासीत्। एतावता ग्रन्थाना समग्रतया अध्ययनेन अनधीतग्रन्थानामप्यर्थमवबोद्धु तदानीन्तना अशक्नुवन्। सर्वमनधीत स्वय पश्यन्तश्चासन्। तदा एकस्य प्रतिदिनमेक एव पाठ आसीत्। अतश्च तत्पाठस्य दृढ चिन्तन कृत्वा स्वाधीन कर्तुं सौलभ्यमासीत्। अधीतस्याविस्मरणार्थं प्राचीनमपि ग्रन्थ आवर्तयामासु प्रतिदिनम्। न्यायशास्त्रे

मुक्तावल्या दीधितेश्च कण्ठस्थीकरणनियम आसीत्। गङ्गेशोपाध्यायेन नवीनन्यायप्रवर्तनानन्तर प्राचीन न्यायस्य अधिकतया अध्ययन नासीत्। गुरव सम्प्रदायप्रवर्तनेच्छव सन्त शिष्येभ्य सम्यक् पाठप्रवचनमकुर्वन्। शिष्या अपि 'ब्राह्मणेन निष्कारणो धर्म षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति विधिमनुसृत्य श्रद्धया गुरुशुश्रूषापरा सन्त अध्ययनमकार्षु। गुरुशिष्यभाव समीचीन आसीत्।

इदानीमाङ्गलकलाशालावत् शास्त्राणामपि कलाशाला स्थापिता। तत्र च छात्राणा पञ्चघण्टाकाल पाठेनैव गच्छति। स्वशास्त्रसम्बन्ध शून्याना इतरेषा ग्रन्थाना पठने एव व्ययीभवति। विंशतिवर्षेभ्य प्राक् पूर्वोक्ताना सर्वेषा पाठन नासीत्। तथापि प्रकरणेषु मुक्तावली वादग्रन्थेषु सर्वे पूर्वोक्ता ग्रन्था अवयवव्युत्पत्ति वादयो परमेकदेश अध्येतव्यमासीत्। तदैव ज्ञान न्यूनमासीत्। विंशति- वर्षेभ्य अर्वाक् तु कतीनाञ्चिदेव ग्रन्थानामध्ययन पाठ्यप्रणालिकाया स्थापितम्। तेषामपि सम्यगध्ययन न भवति। प्रायश इदानीन्तना अध्यापका प्रश्नोत्तरकण्ठस्थीकरणेनोत्तीर्णा (अध्यापकाना कोपो मास्तु आत्मा वेत्ति शुभाशुभम्) अत पङ्क्तिश ग्रन्थपाठन तेषा कष्ट भवति। सम्यक् पाठप्रवचन कर्तव्यमित्यास्थापि प्रायश नास्ति। सर्वे एतादृशा इति न। बहव एतादृशा। छात्रा अनधीतकाव्यकोशादय उत्तीर्णानुत्तीर्णदशम कक्ष्या इदानी विद्याप्रवीणशिरोमणि कक्ष्यासु प्रवेश लभन्ते। विज्ञै अध्यापकै पाठप्रवचने कृतेऽपि छात्रा अवबोद्धु न शक्नुवन्ति। एते कथमपि न जानन्ति किमर्थं वृथा श्रम इति मिषेण अध्यापका नाध्यापयन्ति। यदि कश्चिदध्यापक अज्धापने प्रवर्तेत तदा किमर्थमावयो श्रम प्रश्नोत्तराणि मुख्यानि चोच्यन्ता कण्ठस्थीकृत्य परीक्षायामुत्तीर्णा भवेमेति छात्रा वदन्ति। स्वयमसमर्था अध्यापका शिष्यानुजिघृक्षया स्वगौरवसरक्षणाय च स्वय पाठ्यपुस्तक निर्णयसमित्या स्थित्वा कठिनान् ग्रन्थान् नि- सारयन्ति। शिरोमण्यादिकक्ष्यासु आग्लभाषाया अध्ययन कर्तव्य भवति। कलाशालासु पाठप्रवचनार्थं निर्णीतेषु षण्मासेष्वपि वस्तुत मासत्रयमेव पाठप्रवचन कुर्वन्ति। एव रीत्या शास्त्राध्ययने प्रवर्तमाने पण्डिताना समर्थानामुत्पत्ति कथ वा भवेत्। अध्यापकै बहूनि सहस्राणि लभ्यन्ते। अस्मिन् काले तावत् दातव्यमेव। परन्तु तदनुगुणतया तै प्रवर्तितव्यम्। कृते च प्रतिकर्तव्यमेष धर्म सनातन। मया द्वेषेण वा असूयया वा इद सर्व न लिख्यते। आत्मपरिशोधन क्रियताम्। आत्मा वेत्ति शुभाशुभमिति पुनर्वदामि। एवमेव यदि प्रवर्तते अल्पीयसा कालेन ग्रन्थनामपरिचयोऽपि लुप्येत किमुत विषयपरिज्ञानम्। नवीनेषु पण्डिता न सन्तीति मया नोच्यते। विद्यमाना यथावत् सर्वान् ग्रन्थानधीतवन्त एव वर्तन्ते। इदानी दशवर्षेषु ये कलाशाला सु पठिता शिरोमण्यादिपरीक्षासु उत्तीर्णा ते सिद्धान्त मुक्ता वली वा सिद्धान्तकौमुदी वा आनुपूर्व्या पाठयितुमशक्ता एवेति नि सन्देह वच्मि। इदानीमध्येतार सामान्यत साहित्यशिरोमणि तदपेक्षया अल्पा व्याकरणशिरोमणि पठन्ति। न्यायशास्त्र तु न कोऽपि पिपठिषति। बह्वीषु कलाशालासु न्यायकक्ष्यैव नास्ति तत्र तत्र एको वा द्वौ वा भवेयु। एषा दु स्थितिरिदानीम्।

शास्त्राणा तत्रापि न्यायशास्त्रस्य रक्षण सर्वकारेण कर्तव्यम्। सर्वकार एकैककक्ष्याया दशावरा छात्रा आवश्यका इति निर्बन्ध करोति। न्यूनताया सा कक्ष्या निष्कास्यते। न्यायशास्त्र व्याकरणशास्त्र वा अध्येतु कि अधिका आगच्छेयु? येषामाग्ल विद्याया बुद्धि न प्रसरति येषा वा आर्थिकसौकर्यं आग्लविद्यापठने नास्ति त एवागच्छन्ति। तादृशा कति भवेयु। यदि शास्त्रसरक्षण कर्तव्यमिति त्रिकरणशुद्ध्या वर्तते तदा तादृश निर्बन्ध न कर्तव्य। सर्वेषा ग्रन्थाना सम्यगध्ययन यथा भवति तथा सविधान कर्तव्यम्।

वेङ्कटेश्वरदेवस्थानाधिकारिभ्य मुख्या विज्ञापना। भारतीय सस्कृतिमूलक एव देवस्थानस्य धनाभ्यागम। अतो देवस्थानेन अस्मत्सस्कृति सरक्षणमवश्य कर्तव्यम्। आग्लसस्कृतिरक्षणाय महान् धनव्यय क्रियते। तत्र दशाशधनव्ययेनापि अस्मत्सस्कृतिसरक्षण कर्तुं शक्यते। अस्मत्सस्कृति रक्षण अस्मद्देदशास्त्रसरक्षण भवति। अत तदर्थं दृढ प्रयत्नो विधेय। इद सर्वकारापेक्षया देवस्थानस्यैव

अवश्यकर्तव्यम् । कतिभ्यश्चन वर्षेभ्यः पूर्वं उन्नत शास्त्राध्ययन पद्धतिः Higher Education Scheme प्रारब्धा । किञ्चित्कालं प्राचलत् । संविधानं न सम्यक् कृतम्। पाठ्यप्रणालिका न निर्णीता । यद्यस्मै रोचते तत्तेन अध्यापितमिति प्रदर्शितम् । वर्षे वर्षे परीक्षा न संचालिताः। एवं रीत्या सा प्रणालिका भग्ना। अतः इदमिदानीं कर्तुमुचितमिति मम भाति । ये शिरोमणि समानपरीक्षासूत्तीर्णाः तान् स्वीकृत्य तेषां कालमनुसृत्याधिकधनं दत्वा समीचीनपण्डितनिकटं प्रेष्य तेषाम् अध्यापनं निर्वर्तनीयम् । संवत्सरचतुष्टयं अध्ययनकालः एकैकस्मिन् वत्सरे एते ग्रन्थाः पठनीयाः इति संवत्सरान्ते तेषु ग्रन्थेषु परीक्षा इति च नियमः आवश्यकः। अध्यापकेभ्योऽपि गौरवभृतिः दातव्या । अन्यत्र नियुक्ता अस्यां प्रणालिकायां अनधिकारिण इति नियमः शिथिलीकर्तव्यः। परीक्षापत्रादिकमन्यत्र स्थितैः पण्डितैः सज्जीकर्तव्यम् । छात्रा गृहस्था एव स्युः। अतस्तेषां पर्याप्तं धनं देयम् । एकैकस्मिन्नपि शास्त्रे त्रिचतुरा वा एवंरीत्या पाठ्यन्ते यदि तदा शास्त्रसंरक्षणं कञ्चित्कालं कृतं भवेत्। एवं रीत्या परीक्षासु उत्तीर्णानां कृते श्री श्रीनिवाससन्निधौ वेदपारायणवत् शास्त्रपारायणमपि प्रकल्प्य जीविकापि निर्वोढुं शक्यते । एतादृशव्ययेन स्वामिनो धनक्षय इति न मन्तव्यम्। किन्तु धनागम इतोऽप्यधिकतरं वर्धेतैव । मया लिखितं सर्वेषामप्यरुन्तुदमिव भवेत्। वस्तुस्थितिरियम् । यथार्थवादी बहुजनविरोधी इति सूक्तिरस्त्येव ।

सर्वथा देवस्थानाधिकारिभिः शास्त्रसंरक्षणे बद्धश्रध्दैर्भाव्यमिति विज्ञापयामि । भगवान् श्रीनिवासः अन्तर्यामी तेषां अनुकूलां प्रवृत्तिं जनयतु इति भगवन्तं प्रार्थये ॥ ✪

S.S-I - 2

# STUDIES IN SAMKHYA PHILOSOPHY

**Dr. GANGADHAR PANDA**
Kancheepuram

Among the Astika philosophies, Samkhya, the oldest system, is derived from the word Samkha or Samkhya The word samkhya denotes number, philosophical investigation or the knowledge arising from such a philosophical investigation Consequently the term samkhya comes to mean a system which analyses the facts of experience by means of enumeration of categories or a system dealing with the consideration of twenty five categories

Samkhya analyses experience into different planes or stages which it arranges in the following descending order in which each arises from the other, giving to each stage a specific name in a well - defined scheme of categories i e

1 Purusa
2 Prakrti or pradhana
3 Mahat or Buddhi
4 Ahamkara




The literature available on Samkhya is very scanty The earliest systematic record on Samkhya is found in Samkhyakarika of Isvarakrsna. A large number of commentaries are also written on this text only But prior to this text, some other authors are known to us We observe the essence of Samkhya philosophy of kapila in the Purusasukta of Rgveda, the samkhya of Asuri in Brhadaranyakopanisad the Samkhya of Pancasikha in Santiparva of Mahabharata and the Samkhya of Lord Krsna in Srimadbhagavadgita [1] However, we see the gradual and systematic development from kapila to Vijnanabhiksu

**KAPILA :**

Kapila is the founder of Samkhya philosophy and he is supposed to have written 'Sasti-Tantra' which is not available. Due to lack of internal and external evidences his period is not yet fixed. However, some commentators assumed that he belonged to the pre-Buddhistic period while some others fixed his date in the Post-Buddhistic era.

**ASURI :**

Asuri is considered as the direct disciple of Kapila. Vyasa has mentioned this in his commentary on Yoga-sutra i.e.

> आदिविद्वान् निर्माणचित्तमधिष्ठाय कारुण्याद् भगवान्
> परमर्षिरासुरये जिज्ञासमानाय तन्त्र प्रोवाच । [2]

According to Samkhya-Karika, Asuri is also the teacher of Pancasikha.[3]

**PANCASIKHA :**

The name of Pancasikha appears, very often, in Mahabharata as the disciple of Asuri. Now, no book is available to his credit, but many a time his quotations are found in Yoga-Sutra. The compilation of his quotations is very much similar to that portion of Caraka-Samhita which deals with Samkhya theory. Dr. S. N. Dasgupta has tried to compare the collection of the quotations of Pancasikha with that portion of Mahabharata which deals the Samkhya theory.[4] However, scholars have accepted the great importance of Pancasikha's theory in between the development of Samkhya theory from Upanisadic period to Isvarakrsna.

**ASITA-DEVAḶA :**

There is difference of opinion between the analysis of Samkhya theory by Asita-Devala and Isvarakrsna. Asita-Devala has given great emphasis on KALA which plays a main role in creation. He has also accepted eight DHATUS which are Five MAHABHUTAS, KALA, BHAVA and ABHAVA. Further, he has accepted eight sensory organs and SAKTI as the sixth motor organ. These above points go against the view of the traditional Samkhya thought.[5]

**BHISMA :**

The great grand father of Mahabharata, Bhisma was a warrior as well as an eminent scholar. He has also delineated some Samkhya thoughts through his advice. He has accepted NARAYANA as the Highest-Being which is above Prakrti and which is also NITYA and PARAMATMA. According to him, MOKSA is the absorption of a liberated sou' with PARAMATMA.[6]

**VASISTHA :**

In M habharata Vasistha is also regarded as one of aut ors of Samkhya. Among the twenty five elements, he has accepted visnu in place of purusa, which is not responsible for creation and destruction. Visnu is PURNA - CHAITANYA and NITYA.

**YAJNYAVALKYA :**

In Mahabharata, Yajnyavalkya has also discussed the twenty five elements of Samkhya system. He has also accepted oneness of Prakrti and plurality of Purusa.[7] With a number of illustrations, he has tried to make a difference between Purusa and Prakrti. Such as a mosquito stays with fig-fruits, but it is different from those fruits. A fish lives with water, but it is different from water. A lotus-leaf floats on water, but it is different from water.

**SAMKHYA SYSTEM IN GITA :**

Purusa, described as CETANA, all pervading, is not attached with Karma (न कर्म लिप्यते नरे). According to Gita, the body is KSETRA and the Atma is KSETRAJNA.[8] Twenty four elements are coming under KSETRA i.e. Five Mahabhutas, Ahamkara, Buddhi, Avyakta, Five Tanmatras and eleven organs. Prakrti and purusa are eternal (Anadi). Mahabhutas and other elements are the creation of Prakrti along with three gunas. Purusa is considered as उपद्रष्टा, अनुमन्ता and आत्मतत्व.[9] One who realises the actual relationship of क्षेत्र and क्षेत्रज्ञ, प्रकृति and पुरुष is free from Karmabandhana. The division of karma and caste system is decided on the basis of the three qualities (सत्त्व-रजस्-तमस्).

**ISVARAKRSNA :**

Samkhya Karika of Isvarakrsna is the most famous and popular text available to us. The name of the text[10] itself means that this is not the first text in Samkhya system. According to Chinese tradition, Vindhyavasa has composed Suvarna Saptati on Samkhya system which has similarity with Samkhyakarika. Vasubandhu, a Buddhist scholar has written paramartha saptati on Samkhya system. Takakasu, a Japanese scholar claims that Vindhyavasa and Isvarakrsna is one and the same personality. Samkhyakarika is the first book on Samkhya system on which a number of commentaries are written. These are

**PARAMARTHA TIKA :**

This is an old commentary written in chinese by Paramartha during his stay in China in between 557 to 569 A.D. But scholars have accepted that this commentary had been written by some other scholar and Paramartha had only translated this into Chinese.

**MATHARAVRTTI :**

This Vrtti was written by a popular Samkhya Scholar, Mathara by name. Some commentators opine

that this is the commentary which was translated by Paramartha in Chinese [11]

**YUKTIDIPIKA :**

The author of this work is anonymous and is believed to have composed in 8th century A D The first edition of this commentary had been brought out by Sri Pulinavihari Chakravorti

**TATTVAKAUMUDI :**

This commentary is the most authentic one, written by Vacaspati Misra in 9th century A D This gives a vivid and elaborate discussion on each karika

**JAYAMANGALA :**

There is a great deal of confusion in fixing the time and the author of this commentary However, Pandit Gopinath Kaviraja has tried to attribute this work to a scholar Sankara by name whose time was 1300 to 1400 A D

**VIJNANABHIKSU :**

Vijnanabhiksu, a prolific scholar of Samkhya made a great contribution to Indian philosophy The following works are available to his credit

1 Samkhya pravacanabhasya
2 Samkhyasara
3 Yogavarthika
4 Yogasarasamgraha
5 Vijnanamrtabhasya

Now we will discuss Ankurarpana or Ankuraropa in the Agamic rituals pertaining to temples Uniformly, Saiva and Vaisnava Agamas prescribe the Ankurarpana as an important ceremony In Kasyapa Jnanakanda of Vaikhanasa Agamas, the fiftyeighth chapter deals with Ankurarpana, where it is mentioned that though Ankurarpana is not prescribed in connection with the rituals pertaining to Lord the performance is always pleasing the Lord [4] Hence this should be performed with special efforts This gives an idea how the local custom is adopted and assimilated in the Agamic rituals Similar passage in Padma Samhita of Pancaratra Agamas says, without Ankurarpana no ritual will be beneficial [5]

In the Saivagamas, we find the prescription of Ankurarpana Kamikagama says that Ankurarpana must be performed on all auspicious occasions Ajitagama mentions in Sivayajna i e ritual connected with Siva, in all rituals, Ankurarpana must be done The stanza 2 of Ajitagama mentions that Ankurarpana is for auspicious beginning We can safely come to a conclusion that the practice of Ankurarpana as prescribed in the Vaikhanasa and Pancaratra Agamas, was assimilated in the temple rituals This is further strengthened by the Rauravottaragama (Appendix) Here, it is mentioned that non-performance of Ankurarpana will result in the destruction of the children [6] This Ankurarpana ritual is followed in the domestic rituals too, such as Vivaha, Upanayana, Pumsavana simanta etc While commenting on the Sutra 'avrtascastribhyah pratiyeran' in Apastamba Grhyasutra,[7] the commentators say that the rituals such as Ankurarpana etc should be performed and the procedures may be obtained from women and others [8]

**Mrtsangrahana (Collection of Clay) Candesa and Visvaksena :**

A part of Ankurarpana which is preceding is Mrtsangrahana (collection of clay) It is a common aspect for Saiva and Vaisnava Agamas The procedures for Mrtsangrahana which are prescribed are similar If Candesa is to be taken in procession for Mrtsangrahana in Siva temples, Visvaksena occupies the same place in Visnu temples Candesa is incharge of receiving Nirmalya of Siva and Visvaksena is given the same place in Visnu temples Of course, in Srivaisnava tradition, Visvaksena gets more important position because of the concept of single deity for worship Ganapatipuja is replaced by puja to Visvaksena even in domestic rituals

**Pavitraropana :**

Yet another important festival in Saiva and Vaisnava temples is Pavitrotsava Pavitrotsava is prescribed without any discrimination as a festival of atonement for commissions and omissions during the year, in the performance of rituals in the temples Marici says In the lapse of the *mantras kriya* and *dravya* pavitraropana is to be performed" [9] Rauravagama says, *Mantralopa Kriyalopa* and *dravyalopa* committed during the year will be recitified by pavitraropana" [10] Padma Samhita says, "Pavitraropana is to be done in rectifying excess or lapse in the performances of *Puja* during the year" [11] Similarly one can compare the duration of the festival and time of the year of the festival, in both the Agamic traditions Further, even the procedure of making the Pavitras which are offered to the deities in the temple, is also the same The persons eligible to make pavitra are also of the same kind

**Mahotsava :**

The grand festival of the year, which is called Mahotsava is also having a similar procedure in both Saiva and Vaisnava Agamas The announcement of the festival is to be done by *bheritadana* The procedures of the *bheritadana* given in detail in Rauravagama, Ajitagama, Marici Samhita and padma Samhita are the same

**Dhvajapata :**

One more aspect to be compared in Saiva and Vaisnava Agamas is *dhvajapata* (cloth for banner) The procedure for drawing the figure of Nandin or Garuda, the procedure of procession and hoisting the flag (i e *dhvajapata*) are one and the same

**Dhvajastabham :**

This is also a close similarity in the weight, length, height and variety of the wood to be used

These are the few aspects of unification of the two traditions Such a comparative study of these Agamas, will help to understand one's own tradition much better and also the traditions of others There are many more *Utsavas* common for both Saiva and Vaisnavas such as krttikadipa, Dipavali, Damanotsava, Vasantotsava, Navaratri etc The most important and crucial study of the Agamas will be the portion pertaining to architecture (Prasadanirmana) and iconometry (Pratimamana) With the help of the knowledgeable traditional sthapatis, a study of this portion of the Agamas will reveal many important aspects of temple construction The portion about the iconometry and iconography which could be undertaken with English translation definitely will help to identify some of the *murtis* found in the temples

**References :**

1 तदाराधन द्विविधम् - अमूर्त समूर्तमिति अग्नौ हुतममूर्तम्, प्रतिमाराधन समूर्तम्, तच्छ्रेष्ठ यजमानाभावेऽपि अविच्छिन्न भवति -1 मरीचिसहिताया पटल-1 पृष्ठम्-5

2 कामिकागमे I 1 15-16
परापरेण भेदेन पतिपश्वर्थदर्शकम् ।
शिवप्रकाशक ज्ञान शिवज्ञान पर स्मृतम् ॥
वेदाद्यमपर ज्ञान पशुपाशार्थदर्शकम् ।
यथा विलक्षण चक्षु क्षपाया नृबिडालयो ॥

3 मरीचिसहिताया पटल - 1 पृष्ठम् - 2
सुप्रसन्न परमात्मान नारायण ध्यात्वा अभिवन्द्य श्रुत्यनुकूलेन मार्गेण चतुर्वेदोद्भवमन्त्रै तमर्चयन्त ।

4 काश्यपज्ञानकाण्डे अध्याय 58
अङ्कुराननर्पयित्वा कृत सर्वं निष्फल भवति । भगवत्कर्मण्यनुक्तेऽपि अङ्कुरार्पणे कृते भगवान् प्रीतो भवेत् । तस्माद्यत्नकत कुर्यात् ।

5 पाद्मसहितायाम् क्रियापादे 24 26a
न कर्मफलद ब्रह्मन् अङ्कुरारोपण विना ।

6 रौरवोत्तरागमे अुबन्धे 3 16
अङ्कुरार्पणहीने तु बालाना नाशन भवेत् ॥

7 आपस्तम्बगृह्यसूत्रे 1 2 15
आवृतश्चास्त्रीभ्य प्रतीयेरन् ॥

8 For details, see the author's paper in the publication of the Kuppuswami Sastri Research Institute, Madras (Seminar on 'Vaisnava Agamas')

9 मरीचिसहिताया पटल - 78 पृष्टम् 469
मन्त्रक्रियाद्रव्यहीन यत् कृतम् तद्दोषशान्त्यर्थं पवित्रारोपण कुर्यात्।

10 रौरवागमे क्रियापादे 25 2-4a
आचार्यसकर चैव तन्त्रसकरमेव च ।
निर्माल्यसकर चैव मन्त्रलोप च सकरम् ॥
क्रियालोप च पूजाङ्गहीन चैव तथान्यकम् ।
सवत्सरकृत सर्वं पवित्रेण विनश्यति ॥
पवित्र कारयेत्तस्मात् प्रतिसवत्सर रुरो ।

11 पाद्मसहितायाम् चर्यापादे 14 356, 38
तस्य न्यूनातिरेकाभ्या दुष्कृत सकल भवेत् ॥
मन्त्रलोपादिना कर्म पतित विहित पुन ।
प्रायश्चित्तेन तत्कर्म कर्तार त्रायते पुन ॥

**Bibliography :**


1 Ajitagama - critically edited by N R Bhatt, Institute Francais d'Indologie, Pondichery,1964

2 Apastambagrhyasutra - with two commentaries of Haradatta Misra and Sudarsanacharya, edited by A Chinnaswami Sastri, Chowkhamba Sanskrit Series Office, Benares, 1928

3 Marici Samhita (Vimanarcanakalpa or Ananda Samhita) edited by V Raghunatha Bhattacharya and Setu Madhavacharya Madras, 1926

4 Kasyapajnanakanda (Kasyapa Samhita) edited by Parthasarathy Bhattacharya, Tirumala Tirupati Devasthanams, Tirupati, 1960

5 Kamikagama - edited by C Swaminatha Sivacarya, South Indian Arcaka's Association, Madras, 1975

6 Padma Samhita - critically edited by Smt Seetha Padmanabhan and V Varadachari, Pancaratra Parisodhana Parisad, Madras, 1974 & 1982

7 Rauravagama - critically edited by N R Bhatt, Institute Francais d'Indologie, Pondicherry, 1961

8 Rauravottaragama - critically edited by N R Bhatt, Institute Francis d'Indologie, Pondicherry, 1983


* * *

AS-II-5

# PUBLICATION OF AGAMA MANUSCRIPTS SOME SUGGESTIONS


**Dr. PRABHAKAR APTE**
Pune


Agamas are the temple-oriented Sanskrit scriptures divided according to the deities of worship Visnu, Siva, Sakti etc Of these Agamas Saiva and Vaisnava are main in south India Saiva Agama includes the worship of Siva and Sakti his consort and the worship of Visnu and Laksmi is governed by two subsets of Vaisnava Agama Vaikhanasa and Pancaratra In Tirupati the ritual of divine worship includes the worship offered to Lord Visnu, Siva and Goddess Padmavati and interestingly, the management of T T Devasthanams have to invoke all the three Agamas Vaikhanasa for Lord Venkatesvara, Pancaratra for Goddess Padmavati and Saiva Agama for Lord Siva at Kapilatirtha T T D Publications in Vaikhanasa Agama are a unique, monumental and precious contribution to Indology Late Pt Parthasarathi Bhattacharya has made out a place for Vaikhanasa theory and practice in the scholarly map of the world Not much has been left by T T D in the publication work of unpublished Samhitas of the Vaikhanasa Agamas A suggestion in this respect may be confined to an exhaustive search for more manuscripts by making a public appeal to Agama-lovers But a more urgent demand by these scholarly world is for T T D publications which are out of print especially the set of Bhrgu-Samhita The reprint - work should be supplemented by critical notes and scholarly introduction The next step is the translation in English and in Indian languages, preferably Hindi and Telugu With this equipment, scholars in the fields of religion and allied branches can be induced to do valuable research A Dutch scholar, J Goudria has published an English translation of the Jnanakanda of the Kasyapa-Samhita which he named as 'Book of Wisdom proclaimed by Kasyapa' Recently, a French scholar, G Colas has published a translation of Vimanarcana-kalpa, through the French Institute, Pondicherry I propose to translate the same, in English, at the instance of Indira Gandhi Kala Kendra, New Delhi Only two seers of Vaikhanasa are thus on the map of Europe A paper was read in U S A on Vaikhanasa, some years back The World Sanskrit Conferences in U S A , Europe and India have duly included Agamas in their programme and the agenda of the next year conference in Australia includes a special Agama-section During one year some concrete research programme and T T D contribution can be placed before world-scholars Textual reconstruction in temple designs displayed in Tirupati museum can be produly mentioned therein The temple-text correlation has been worked out by us, with reference to one of the four seats of Visnu, in south India, namely,

Melkote We propose to extend our research to Tirupati temple and Vaikhanasa samhitas like Vimanarcana-kalpa The research in the Agamas is interdisciplinary, requiring Sanskrit-technology collaboration and ready availability of annotated Agama-texts Some of the unpublished Samhitas contain valuable material With computer technology at our disposal, we can help universal community of scholars, not only through book-medium but also through magnetic software i e computer-floppies which can be prepared at Tirupati and catered all over the world An apex reference-centre for Agamas in general and Vaikhanasa in particular can be developed at Tirupati under the auspices of T T D in near future

The next important Agama is the Pancaratra It has traditionally hundred and eight Samhitas and the list has grown upto about three hundred, through the research beginning with F Otto Schrader, Daniel Smith(Nul-Vilakkam), H H Yatiraj Jeer of Melkote, V Krishnamacharya and several others Out of a long list of texts, about seventy are extant and about forty of them are available in printed form in Grantha, Telugu and Devanagari Many of these Samhitas are translated as well The centres of publications are spread all over in India i e Trivandrum, Srirangam, Kumbhakonam, Tirupati, Bhadrachalam, Calcatta, Varanasi, Lucknow, Delhi, Baroda, Banglore, Melkote etc and from Rajashahi BanglaDesh, Japan, Paris and Leiden Several papers have been read at various national and international conferences by Indian and Western scholars about published and unpublished Samhitas A century has already passed over the publication of books beginning with Narada Pancaratra by Rev Banerjee in 1862, and articles by scholars beginning with U Govindacharya, sometime thereafter Schrader had given his suggestions for the publication of Pancaratra Mss in 1916 followed by lot of publication work of the Samhitas Thereafter in sixties and seventies, H Daniel Smith of Syracuse University, did pioneering work under the guidance of V Raghavan at Madras, later on published in the form of the book, 'Bibliography of Pancaratra', by Oriental Institute, Baroda That Bibliography gives adequate information for publication of unpublished Pancaratra-texts The range of topics covered in the Agamas is wide and encyclopaedic including Philosophy, Yoga, Art, Architecture, Iconography and temple-renovation-technology and temple rituals and social ethics, broadly divided under four padas Jnana, Yoga, Kriya & Carya Most of these topics are covered under the three classical Samhitas of Kashmirian origin (Kashmiragama as per Yamunacharya), namely Satvata, Pauskara and Jayakhya The post classical Samhitas cover more temple-oriented topics encompassing temple rituals round the clock and round the year These are associated with three aspects of Visnu Narayana at Melkote (Isvara-Samhita) (Vasudeva at Srirangam(Paramesvara - Samhita) and Visnu at Visnu Kanchi (Padma-Samhita) All these texts are now available in good critical editions, but there are some minor and later texts awaiting the light of the day One text with thirty chapters in Grantha characters in Madras manuscripts library enlightens on the avenues opened by the Pancaratra seers, for the weaker sections of the society, aiming at ideal social harmony The Kriyapada of the Padma Samhita, which was separately published by Daniel Smith under the name 'Pancaratra-Prasada-Prasadhanam' can pass as a Silpa text like Vimanarcanakalpa of Vaikhanasa Agama Kasyapa Samhita published by A Srinivasa Aiyangar is a Pancaratra reference book on snake-poison These texts need critical editing and translation The publications like Paramesvara Samhita published by Srirangam, which have gone out of print contain valuable information for temple-text co-relation which is ably annotated need urgent reprint with revision with the help of architects The latest noteworthy Pancaratra publications are of Pauskara and Visvamitra Samhitas by Dr P P Apte and U S Bhat and a cigest 'Pancaratra-Paramyam' published by K S Vidyapeeth, Tirupati There are several unpublished complete, incomplete and fragmented Samhita Mss scattered at the repositories at Tirupati, Madras, Mysore, Trivandram, Melkote, Baroda etc These may be printed with critical notes The TTD publication of Markandeya Samhita is though a welcome addition however not standing the test of critical edition expected by scholars A few fragmented Pancaratra Samhitas transcribed from yadugiri Yatiraj collection, into Devanagari are included in the Ph D thesis of Dr P P Apte Those and some other fragmented Samhitas can be clubbed together in a single publication as is done by recent Agama publication in the library of the Academy of Sanskrit Research at Melkote

The survey of Saivagama Mss traditionally numbering to be 28 as against 10 of the Vaikhanasa Agama has been fairly exhaustively made by the French Institute at Pondicherry Dr N R Bhat has brought out several critical editions of high mark under the guidance of late Prof Jean Filiozat, which probably prompted his able son Prof Pierre Filiozat in his lecture in Poona University to foresee Agama research to dominate the

21st century in Indological studies The publication work of the Saivagamas, yet unpublished may be undertaken in consultation with prof N R Bhat who is associated with Kuppuswamy research Institute, Madras after his retirement from Pondicherry The help of the expert staff of K S Vidyapeeth Tirupati connected with the Agama kosa project, unfortunately so far unpublished may also be consulted in regard to the critical editing of Mss belonging to all the three Agamas. It is learnt that the Vaikhanasa section of the Agamakosa is ready for publication The press copy may give some information useful for the TTD publication scheme

The publication work of the unpublished Agamas needs to be set up on a scientific footing requiring formation of an expert editorial board constituting experts from all the three Agamas and expertise in Silpasastra Following names are suggested for incorporation in the editorial board

A Vaikhanasa Agama 1 T T D Asthana Vidvan 2 Prof Gerald Colas, Paris B Pancaratra 1 Varadaraja Bhattar, Vishnu Kanchi 2 Prof V Varadachari, Pondicherry 3 Dr P P Apte, Pune 4 H H Yadugiri Yatiraj Swamy, Melkote 5 Prof Vrajavallabha Dvivedi, Varanasi 6 Prof Ashokkumar Kalia, Lucknow 7 Prof Narasimhachari, Madras 8 Prof H Daniel Smith, Syracuse, New York 9 Prof Mrs Samyukta Gupta, c/0 Prof Gomrisch, London 10 M Lakshmi Thathachar, Melkote C Saivagama 1 Prof N R Bhat, Madras 2 Prof M D Balasubrahmanyam, Tirupati D Silpagama Prof V Ganapati Sthapati, Mahabalipuram 2 N N Swamy, Mysore

* * *

A.S II - 6

# IMPORTANT TEMPLE FESTIVALS - A REVIEW

**Dr. K.V. RAGHAVACHARYA**
Tirupati

Festivals symbolise the religious aspect in the social life of people They are the occasions for prayer and worship as well as for enjoyment In the Hindu religion, festivals have been invested with great significance Throughout the centuries, the Hindu temple played a pivotal role in promoting the social, religious and cultural life of the people The celebration of festivals has been an important and attractive feature of the functioning of the temples Besides, it enhanced the popularity and sanctity of temples

Festivals conducted in temples are generally known by the name, 'utsava' or 'Tirunallu' The compound word 'utsava' consists of two words, ut and sava Of these, ut means high or great and sava means yajna or sacrifice Among the several sacrifices deva-yajna or the worship of a deity is considered the greatest Thus the celebration of a festival constituted the greatest sacrifice or worship offered to God It is interesting to observe that 'utsava' in Sanskrit which literally means 'to cause to go upwards' denoted 'enterprise' in the vedas and later came to mean 'joy' and 'festivity'

Festivals prescribed by the Agamas are of three varities One is santika or those celebrated to ward off calamities like drought and pestilence The second is Aicchika or those performed by individuals for the increase of their welfare and the third is the kalika or those celebrated in a particular day or month in every year The kalika festivals may be of varying duration, celebrated for one to nine days Among this type of festivals Brahmotsavam is the best festival

The temple festivals may be classified into parvotsavas, ekadinotsavas, masotsavas and brahmotsavas Parvotsavas are simple festivals celebrated within the temple on panchaparvas (masa sankramanam, amavasya, paurnami and two ekadasis) each month When bigger festivals are being celebrated, the parvotsavas get merged with them

The ekadinotsavas like Sri Jayanti, Sri Rama Navami, Vijayadasami, Dipavali, Bhogi and Yugadi etc , last for a day These festivals are invested with mythological significance The monthly masotsavas and the annual Brahmotsavas last for more than a day, usually about ten days

The temple festivals are spread evenly over the whole year Every 'tithi' (lunar day) and Sankranti day has its special association and appropriateness for particular worship of a certain deity Special services were conducted on asterisms of Rohini, Punarvasu, Sravanam etc , the natal stars of the deities, acharyas and alwars

On festive occasions the divine image (utsava bera) is beautifully dressed and specially decorated witn several costly jewels and taken out of the temple in procession seated on various vahanas such as horse, elephant, swan etc , and accompanied with music The deity is given all the traditional royal paraphernalia like huge white umbrellas and fly-whisks as the lord is considered to be the king of kings Hence, temple festivals are popular and are attended by a concourse of people During Brahmotsavam Garudotsava and Rathotsava attract people from far and near The festivals are largely seasonal in character They are also commemorative, recalling some miracles of Vishnu as found in the puranas Temple festivals form the very basis of our culture, philosophy and religion

The temple festivals are classified into nine kinds, in accordance with the number of days they are celebrated Saivam, Ganam, Bandhikam, Bavunam, Daivikam, Kaumaram, Saivitram, Chandram and Sauram festivals are celebrated in one, three, five, seven, nine, thirteen, fifteen, seventeen and twenty days respectively All functions and processions of the mahotsavas are generally conducted in the evenings Some important festivals are briefly reviewed

**1) The Adhyayanotsavam :**

The Adhyayanotsavam is one of the important festivals, celebrated particularly in Vaishnava temples in the month of Margali or Dhanurmasam Adhyayana means study Veda parayanam and the recitation of the Divya prabandham (tamil) during the festival confirms the nature of this festival

The festival, spanning twenty days, is divided into two parts, viz , ten days before and ten days after the ekadasi (vaikuntha ekadasi) day of the bright half of the month The first period of ten days is called Tirumoli-utsavam or pagal pattu (ten days) and the second period of ten days is called Tiruvoimoli utsavam or irapattu (ten nights)

This is a unique type of festival conceived as to preserve and perpetuate the treasure of devotional literature handed down by the Alvars, viz , the Nalayira prabandham, by arranging for their recitations in the divine presence

**2) The Pavitrotsavam :**

The Pavitrotsavam is celebrated for expiating for all the omissions and commissions made during the daily worship or during the festivals It was celebrated in both Vaishnava and Saiva temples The duration of festival is three/five days The Pavitrotsavam is celebrated in the month of Avani (sravana masam) for god Sri Venkateswara at Tirumala

During this function, pavitras (cotton threads) made with knots resembling beads are adorned the hands, feet, neck, crown etc , of the divine images After pranapratistha ceremony the longest pavitra, the vanamala pavitra, is taken out and the mula-bera is adorned with it Vedic hymns are recited and homa is performed This purificatory ceremony ends with purna-ahuti

**3) The Brahmotsavam .**

Festivals celebrated in temples may be classified into obligatory, optional and miscellaneous The obligatory festivals are those enjoined by the sastras and agamas to be celebrated at specified times Non-observance of these festivals is considered as a serious ommission, while their restitution calls for special purificatory rites To this class belongs the Brahmotsavam

'Brahmotsavam' generally means the biggest festival It is believed that this festival was originally started by Brahmadeva As if to remind us that the Brahmotsava at Tirumala is started and verily performed with the guidance of Brahma, a small decorated wooden car called Brahmaratha, heralds the processions on all the days of the Brahmotsavam of Sri Venkateswara

According to the Venkatachala-mahatmyam, the Brahmotsavam at Tirumala was originally instituted and conducted by Brahma deva Historically, it was instituted for the first time by a woman devotee, named Samavai (queen of Satti vitanka) in the 10th century according to TTD inscriptions I-9, Tirumala and IV-86, 110, Tirumala

At Tirumala, the processional image in festivals is different from the installed deity in the shrine and is known as Sri Malayappa swami Annual Brahmotsavam is being celebrated at Tirumala only in the month of purattasi or Asvayuja masa and additional festival once in three years, when there is an additional month (Adhika masa) or intercalary month There is an allusion to this 13th month in Rig veda, I-25-8 and in Atharva veda, V-6-4, XIII-3-8

The dhvajarohanam (the hoisting of the Garuda flag) signified the commencement of the Brahmotsavam Similarly, the Dhvajavarohanam (the lowering of the Garuda flag) indicates the conclusion of the festival In between these two, there are several other minor festivals like Pushpayagam, Pari-veta, Vasantotsava, Kalyanotsava, Dola-utsava and float

festival The tirtha-vari festival is celebrated as a component item

On certain occasions the Vedas and Iyal prabandham are recited in the presence of the deity The Asthanam is also arranged during the festival Processions are arranged during day and night on vahanas (vehicles) like Sesha, Hamsa, Simha, Kalpavriksha, Sarvabhupala, Garuda, Hanuman, Gaja, Suryaprabha, Chandraprabha, Asva and Ratha

The fifth day is the most important day of the Brahmotsavam In the morning the lord is decorated as a bewitching lady-Mohini-adorned all jewels and ornaments to commemorate vishnu's manifestation as Mohini to lure away the asuras from the amrita (Nectar) The image of the standing god is dressed up as that of a seated goddess This Mohini-alankaram attracts more devotees to the festival, particularly women It is said that the God in disguise is more attractive than the Goddess herself

**Garudaseva :**

The fifth day, night-festival marks pinnacle of the Brahmotsavam Garuda or the king of birds is the favourite vahana (vehicle) of vishnu On this sacred day, the Lord arrives majestically, adorned with rare jewels like Lakshmihara, makara-kanti etc , on His most significant vahana, the Garuda Special umbrellas for this occasion are brought every year all the way from Madras on foot and offered to the Lord by devotees

Lord Varadaraja perumal of Kancheepuram gives darsan to devotees, on his favourite vahana, the Garuda, on the third day of Vaikasi-visakam festival, which is annually celebrated This 'kanchi garuda seva' is an idiom in Telugu literature

In March-April during the Brahmotsavam at Sri Narayana temple at Melkote (karnataka), the processional idol, Sampathkumara, is carried on Garuda on the fourth night The festival is called 'vairamudi seva' on account of the diamond-studded crown worn by the deity

As a footnote, it may be added that from Sri Ramanujacharya's times (11th century A D) Harijans were given the right of entry into Sri Narayana temple at Melkote For three days they enjoyed this privilage during Brahamotsavam Sri Ramanuja is said to have called them "Therukkulatthar" or those belonging to noble families Thus these temple festivals increase community consciousness and spiritual integration among the people

**4) Plavotsavam or float festival :**

This festival, celebrated every year is separate from the float festival performed during the Brahmotsavam At present the plavotsavam of Sri Venkateswara swami at Tirumala is celebrated on full moon day of phalguna masam But this festival was conducted on full moon day of vaisakha masam in the 16th century Sri Krishnadevaraya, author of Amukta malyada and a staunch devotee of Sri Venkateswara described the Lord as "Krukavaku dhvaja dirghika-plava tapah kridotsavadyutsaka"(3-90) He describes that plavotsavam of Lord Venkateswara is celebrated during summer in Swami Pushkarini

**5) Rathotsavam or car festival :**

The car festival is commonly celebrated in both Vishnu and Siva temples It is celebrated both as part of the Brahmotsavam and as a separate festival

The car festival in Puri is the most famous of its kind The great festival is celebrated on the second lunar day (sukla-vidiya) of the bright fortnight in Ashada masam The car journey of Jagannatha with Balarama and Subhadra is celebrated with great eclat in Puri Three cars, constructed a - new every year and draped in blue, red and white cloth for Jagannatha, subhadra and Balarama respectively, and adorned with floral wreaths, flags and festoons, are drawn all along the broad path by a large number of pilgrims of both sexes The entire congregation rupturously greets three idols with devotion The procession is taken from the temple to the garden-house of the deities The return journey takes place in splendour eight days later Moving wheels of Jagannatha's chariot is used as a symbolic image to eradicate differences in society by progressive poets in modern Telugu literature

Kalyanotsavam, Vasantotsavam and Navaratri Utsavam are also important festivals celebrated in the temples

Temples continue to promote religious consciousness among the people The temple festivals contribute to the development of social contacts by bringing together people from far and near They also act as an agency, in pooling out the resources for the distribution among the needy When several minds and hearts get together with a spirit of devotion on such festive occasions, it is bound to produce tremendous results in the common life of a community

* * *

AS - II-7

# देवालयीयक्रियाकलापस्य प्रचारोपायाः

श्री वेदान्त श्रीविष्णुभट्टाचार्य.
तिरुपति

भारतदेशेऽस्मिन् प्रधानतया विराजमानेषु **वैखानसाद्यागमग्रन्थेषु** अर्चारूपस्य प्रतिष्ठा–स्नपन–अर्चन–**उत्सवादिक्रियाणाम्** अनुष्ठेयविधे मुख्यतया ुपदिष्टत्वात् **क्रियाभाग** एव प्रधान प्रमेय च भवति। अत अस्मिन् **क्रियाभागे** प्रधानतया अङ्कुरार्पणम् अधिवास होम **आवाहनम्** अर्चनम् स्नपनम् पवित्रोत्सव उत्सव (अयमेव **ब्रह्मोत्सव**) प्रायश्चित्तम् इत्याद्या अनेके आचरणयोग्या **प्रचाराशाश्च** भवन्ति। एषु केचन अशा एव मया अत्र **गृहीता**। तेषा प्रचार कथमिति चेत् –

## 1) अङ्कुरार्पणम्

देवालयसम्बन्धिना कर्षण– शङ्कुस्थापन – **बिम्बप्रतिष्ठा**– स्नपनोत्सव – प्रायश्चित्तादीना कर्मणामादो **अङ्कुरार्पण** विधीयते। कर्मेद देवस्य प्रीतिकर, हीने चेत् कार्यं **सर्वं** **निष्फल** भवति। अत सर्वकर्मणामादो यत्नेन **इदमाचरणीयमिति** आगमग्रन्था निर्दिशन्ति।

**तथैव** अङ्कुरार्पणे बीजन्यास मुख्य। बीजानामधिपति **चन्द्र**, **तस्य** **काल** रात्रि, तस्मात् अङ्कुरार्पण रात्रावेव **कर्तव्य**, **दिवाङ्कुरार्पण** न कुर्यादिति च निर्णय, इत्याद्यशा **सामान्यजनेभ्य** अवश्य बोधनीया।

## 2 अधिवास

बिम्बप्रतिष्ठाया निर्दिष्टासु कर्मसु अन्यतम **अधिवास**। अय बिम्बाना शुद्ध्यर्थं उद्दिश्यते। **अहोरात्र** **वा** **केवल** **याम** वा अय कर्तव्य। अधिवाससमनन्तरमेव प्रतिष्ठार्थं **बिम्बानि** अर्हाणि भवन्ति। अत प्रतिष्ठाकर्मणि **अधिवास** **मुख्यतम**। पण्डितै अयमश सर्वेभ्यो बोधनीय।

## 3 आवाहनम्

आगमग्रन्थेषु बिम्बावाहन प्राधान्येन उपदिश्यते। सर्वव्यापिन परमात्मन आवाहनम् उद्वासन **कथ** **सम्भवत** इति सामान्यजनसन्देहस्य समाधान अत्र **निरूप्यते**। **यथा**–

अरण्या अन्तर्लीन वह्नि मथनादेव **बहिर्भूतो** **यथा** भवति, तथा विशेषध्यानेन भक्तस्य **हृदि** स्थितस्य देवस्य साक्षात्कारो भवति। अत परमात्मानम् आवाह्य अर्चयेदिति आगमेषु प्रतिपाद्यते।

## 4. अर्चनम्

प्रात कालादारभ्य रात्रिकालपर्यन्त **भगवन्तमुद्दिश्य** **बहुप्रकारै** क्रियमाण पूजनम् अर्चनमिति **कथ्यते**। तत्र प्रात शयनप्रबोधनम् आवाहन रात्रौ शयन उद्वासन विधीयन्ते।

अत्र प्रथमतः भगवन्तमुद्दिश्य क्रियमाण शयनप्रबोधनम् आवाहनं पिपीलिकादिसर्वप्राणिना सृष्टेः प्रतीक, रात्रौ शयनम् उद्वासन लयस्य चिह्न च सभाव्येते। भक्ताः भगवन्त सृष्टिसमये आराधयन्ति चेत् तैः प्रतिदिन आचर्यमाणाः लौकिकव्यवहाराः सुखमयाः भवेयुः। एव लयसमये भगवन्त आराध्यमानाना भक्ताना सुखनिद्रावाप्तिश्च सिध्येत्।

**5. उत्सवः**

सर्ववर्णाश्रमस्थजनाना धर्मप्रबोधनाय आस्तिकबुद्धि-प्रेरणाय आनन्दजननाय च विशेषरूपेण उत्सवविग्रहाणा क्रियमाण पूजनं उत्सवपदेन आगमेषु व्यवह्रियते। अस्मिन्नुत्सवे ध्वजारोहण –देवताह्वान– बलिप्रदान– वीथ्युत्सवादिकर्माणि सन्ति। तानि सर्वाणि शास्त्रोक्तरीत्या अनुष्ठेयाणि। यथा ब्रह्मेन्द्रादिदेवाना आह्वानार्थं ध्वजप्रेषण, ध्वजारोहण, देवाना मन्त्रपद्यगद्यादिस्तोत्रैः आह्वानरूप देवताह्वान, तेषा हविस्समर्पण बलिप्रदान, वृद्धजनदर्शनार्थ गरुड–गज–रथादिषु यानेषु उत्सवबिम्बाना वीथीभ्रमणरूपः उत्सवः इति च तानि कर्माणि निर्दिश्यन्ते ।

ग्रामादारभ्य पत्तनादिपर्यन्त स्थितेषु देवालयेषु उत्सवोऽयं प्रतिसंवत्सरं निर्णीतकाले "ब्रह्मोत्सव" नाम्ना महता वैभवेन अद्यापि प्रचलति । आगमविद्वद्भिः अवश्यं अयमंशः प्रचारे आनेतव्यः।

**6. उपसंहारः**

आलयेषु देवेभ्यः अनुष्ठीयमाणानाम् एषां कर्मणां मौलिकप्रचारः उक्तरूपेण आगमपण्डितैः करणीयः। वेदेषु प्रतिपादिताना यज्ञयागादिक्रतूनाम् आचरणे यत्फलं तदेव आलयेषु अर्चनादि कर्मणा आचरणेऽपि सिध्यति । एषाम् अनाचरणे आस्तिकानां धर्मार्थ – काममोक्ष– रूपचतुर्विध पुरुषार्थफलप्राप्तिः क्लेशतर प्रत्यवाय रूपो भवति। तस्मात् क्रियाभागान्तर्गता नाम् अङ्कुरार्पण–अधिवास–होम–विशेषपूजा – पवित्रोत्सव–प्रायश्चित्तादीना कर्मणाम् आचरणेन भक्ताः सन्मार्ग प्रवर्तकाः वैदिकधर्मप्रचारकाः आर्षसम्प्रदायपरि –रक्षकाश्च भवेयुः। अतः देवालयाधिकारिणः अर्चकाः आगमविद्वांसः सर्वेऽपि शास्त्रोक्तानुष्ठानैः प्रचारैश्च कृतकृत्याः भवेयुः इति आशास्यते ।।

# STOUTA AND SMARTA SESSION

SSS

# अध्यक्षभाषणम्

**प्रो एम डी बालसुब्रह्मण्यम्**
तिरुपति

चतस्र वै वैदिकसहिता। एकैकस्या सहिताया ब्राह्मण–आरण्यक–उपनिषद्–कल्पसूत्रभागा परिगणिता सन्ति। प्रसिद्धयागप्रतिपादका मन्त्रा वेदेषु तत्र तत्र उपगुम्फिता दृश्यन्ते। यज्ञकर्मणि देवतास्तुतिरूपा मन्त्रा ऋग्वेदे समुपलभ्यन्ते। यजुर्वेद सामवेदश्च यागार्थमेवोत्पन्नौ। सामवेदे प्रायेण सोमयाग प्रोक्त। यजुर्वेदे सर्वयागोपयुक्तानि कार्याणि निर्दिष्टानि सन्ति। "कर्तव्य यजु" "यज्ञेन यज्ञमयजन्त देवा तानि धर्माणि प्रथमान्यासन्" इत्यादिषु मन्त्रेषु यज्ञस्य वैशिष्ट्य दृश्यते।

बह्वृचा आमनन्ति–

अवदस्त्व शकुने भद्रमा वद
तूष्णीमासीन सुमति चिकिद्धि न।
यदुत्पतन्वदसि कर्करिर्यथा
बृहद्वदेम विदथे सुवीरा॥

(2 4 43)

अत्र सायणभाष्यम्– शकुने हे कपिञ्जल। अवदन् शब्द कुर्वन् त्व भद्रम् आवद। तूष्णीमासीन तूष्णी तिष्ठन् अपि न अस्माक सुमति चिकिद्धि बुध्यस्व। यत् यदा उत्पतन् वदसि, तदा कर्करिर्यथा कर्करिरिव वदसि। कर्करि वाद्यविशेष। कपिञ्जलरूपी इन्द्र देवता। हे इन्द्र भद्र वद। सुमति बुध्यस्व। कर्करिरिव नाद कुरु। सुवीरा शोभनै वीरै पुत्रादिभि उपेता सन्त यज्ञे स्तोत्रान् उच्चारयेम।

एव ऋग्वेदकालादारभ्य भारतेषु यज्ञस्य प्राधान्यविवक्षा दत्ता विद्यते, यत यज्ञद्वारा मानव भद्र पश्यति शृणोति च। सर्वजनहिताय लोकरक्षणाय च यज्ञ करणीय इति वैदिकमत विदाङ्कुर्वन्तु वैदिका, "कर्तव्य यजु" इत्युक्तत्वात्।

यज्ञसप्रदाय पूर्वं सहितासु ब्राह्मणेषु पश्चात् कल्पसूत्रेषु प्रतिपादितो विद्यते। वेदप्रोक्ताना कर्मजालाना सुलभतया अवधारणायार्वाकछ्रौतादिसूत्राणि महर्षिभि रचितानि।

क्रिस्तो पर्वं पञ्चमशतकादारभ्य द्वितीयशतक–पर्यन्त कल्पसूत्राणि वैदिककर्मकाण्डमवलम्ब्य प्रावर्तन्त। तत्र वैदिक मार्गं रक्षितुकामा महर्षय अविस्मरणीय कर्मकलाप सूत्रे क्रोडीचक्रु। अत वैदिककर्मक्रोडीकर्तु सूत्राणि कल्पसूत्राणि, यानि च श्रौतसूत्राणि गृह्यसूत्राणि धर्मसूत्राणि इति त्रिधा विभक्तानि दरीदृश्यन्ते। वस्तुत श्रौतगृह्यधर्मसूत्राणा मिलिताना कल्पसूत्राणि इति सामान्य नाम उदभवत्। एकैकस्या वैदिकशाखाया द्वित्राणि पञ्चषाणि

वा श्रौतसूत्राणि सन्ति । तद्यथा, शाङ्खायनश्रौतसूत्राणि आश्वलायनश्रौतसूत्राणि च ऋग्वेदीयानि। द्वयोरपि नाधिको व्यत्यासो दृश्यते। तथापि शाङ्खायने राजसूयादय अधिक वर्णिता सन्ति। अष्टादशविभागात्मकानि शाङ्खायनश्रौतसूत्राणि शाङ्खायनब्राह्मणसबद्धानि दृश्यन्ते।

आश्वलायनश्रौतसूत्राणि पुन ऐतरेयब्राह्मणसबद्धानि द्वादशभागात्मकानि। सामवेदसबद्धानि त्रीण्येव यथा प्राचीनानि मशककृतानि पञ्चविशब्राह्मणानुसारीणि सोमयागसबद्धानि आर्षेयकल्पाभिधानि। लाट्यायनश्रौतसूत्राणि पर कौथुमसामवेदशाखासबद्धानि पञ्चविशब्राह्मणक्रममनुसरन्ति, मशकसूत्राणि कुत्रचित द्राह्यायणश्रौतसूत्राणि पुन राणायनीयशाखासबद्धानि लाट्यायनत नातिभिन्नानि।

कात्यायनश्रौतसूत्र शुक्लयजुर्वेदसबद्ध षड्विशतिभागात्मक शतपथब्राह्मणसमुद्भवम्। तत्र 22–24 अध्यायेषु सामवेदीया क्रिया काश्चन प्रोक्ता सन्ति। इद च सूत्रकालान्ते समुत्पन्नम्।

कृष्णयजुर्वेदसबद्धानि षट् श्रौतसूत्राणि यथा आपस्तबीय शौतसूत्र तैत्तिरीयशाखासबद्ध यत्र त्रिशत्प्रश्नात्मकस्य आपस्तबकल्पसूत्रस्य आदिम चतुर्विशतिप्रश्नात्मकम्। द्वितीय श्रौतसूत्र हिरण्यकेशीयम् आपस्तबान्तम्। तत्र हिरण्यकेशीयकल्पसूत्रेषु एकोनत्रिशदध्यायात्मकेषु षड्विशस्सप्तविशश्च अध्याय हिरण्यकेशीयश्रौतसूत्राणि। बोधायन काशिकर महाशयसपादित भारद्वाज च श्रौतसूत्रम् प्रसिद्धम्। मानव वेखानस च श्रोतसूत्र मैत्रायणीयसहितासबद्धम्। तत्र आद्य श्रोतसूत्र अतिप्राचीन यजुर्वेदब्राह्मण च बहुधा अनुसरति।

अथर्ववेदीय वैतानश्रोतसूत्र गोपथब्राह्मणसबद्ध दृश्यते। इद च कात्यायनश्रोतसूत्रमनुसरति

श्रौतसूत्रोक्ता विषया – एकेन यजमानेन कर्तव्या क्रिया प्रोक्ता। हविर्यज्ञा सोमयज्ञाश्च अत्र प्रतिपाद्यन्ते।

गृहस्थदिनचर्यासबद्धानि शिष्टाचारसस्कारमूलकानि च गृह्यसूत्राणि। शाङ्खायनगृह्यसूत्र ऋग्वेदसबद्ध षडध्यायघटित, अन्त्य चाध्यायद्वय पश्चात् सयोजितम्। अपर च शाभव्य गृह्यसूत्र कोषीतकीशाखासबद्ध दृश्यते। इतरगृह्यसूत्रेषु अनुक्ता पितृयज्ञक्रिया तत्र विचारिता सन्ति। आश्वलायन गृह्यसूत्र च भागचतुष्टयात्मकम्। सामवेदसबद्ध गोभिलगृह्यसूत्र गृह्यसूत्रेषु प्राचीनमिति वैदिकसाहित्यविदो विदन्ति। वक्तव्याना विषयाणा सम्यक् प्रतिपादनात् कोथुमराणायनीयशाखासबद्धमेतत्। मन्त्रब्राह्मणे एकैकस्मिन्नपि वेदे अन्तर्भूता सर्ववेदोद्धृता सामवेदानुक्तयागोपयोगिन मन्त्रा सकलिता सन्ति। खादिर च गृह्यसूत्र द्राह्यायणीयशाखासबन्धि, राणायनीयैरप्याद्रियते।

पारस्करगृह्यसूत्र शुक्लयजुर्वेदीय वाजसनेयापराभिध कात्यायनश्रोतसूत्रमनुसरति। याज्ञवल्क्यस्मृतिश्च एतदेव अनुसरति। कृष्णयजुर्वेदीयानि सप्त – आपस्तम्बीय गृह्यसूत्र, बोधायन, मानव, काठक, वैखानस, हिरण्यकेशीय भारद्वाजमिति च प्रसिद्धि गतानि। वैखानसगृह्यसूत्राध्ययन विश्वविद्यालयभूतपूर्वाध्यक्षेण कलान्त् नाम्ना प्रख्यातवेदविद्याविमर्शकेन अकारि। तथैव भारद्वाजश्रौतसूत्रविषये पुण्यपत्तनस्य काशीकरपण्डितेन विस्तृत पाठसमीक्षात्मकम् अध्ययनमकारि।

आपस्तबीयगृह्यसूत्र च श्रोतसूत्रस्य 26–27 प्रशात्मकम्। ततश्च न्यायतो द्वितीयस्यैव गृह्यसूत्रत्वमिति आचक्षते। मानवीये विनायकपूजा प्रस्तुता द्रष्टव्या। चत्वार विनायका एकीकृता गणेशशब्देन व्यवह्रियन्ते।

अथर्ववेदसबद्ध कौशिकगृह्यसूत्र, यत्र आभिचारौ पयिका विषया प्राधान्येन वर्तन्ते।

वस्तुत गृह्यसूत्रेषु द्विजसस्कारा उपवर्ण्यन्ते। तत्र च प्रथम पुसवन, जातकर्म, नामकरण, चूडा, अष्टम उपनयन, ब्रह्मचर्ये अनुष्ठेया धर्मा अध्ययनानन्तर गुरुकुलप्रतिनिवर्तनावसरे समावर्तनाख्य कर्म, यदा स स्नातको भवति विवाह इत्यादयो विमृष्टा।

स्नातकश्च गृहस्थाश्रम प्रविविक्षु विवाहसस्कार–मनुतिष्ठति। विवाहसस्कारश्च भारते देशे बहो

कालादेव आसीत्। गृहस्थकर्मणा मध्ये ब्रह्म–देव–पितृ–भूत–मनुष्ययज्ञसमाख्या सन्ति पञ्च महायज्ञा उत्कृष्टा। तत्र स्वाध्ययन, ब्रह्मयज्ञ, देवानुद्दिश्य आग्नो होमो देवयज्ञ, तर्पणादिक पितृयज्ञ, भूतान्युद्दिश्य भूमो बल्युपहारो भूतयज्ञ, अतिथिपूजन मनुष्ययज्ञश्चेति। अन्येऽपि दर्शपूर्णमासादय कर्मविशेषा श्रोतग्रन्थानुरोधेन। गृह्यसूत्रप्रतिपाद्याना कर्मणा मध्ये अन्त्येष्टि, श्राद्धकर्म च सुप्रसिद्धा।

अपरस्तत्र ग्रन्थसमुदाय धर्मसूत्राभिध स्मृतिमूलक। "श्रुतिस्तु वेदो विज्ञेय धर्मशास्त्र तु वै स्मृति।" आपस्तबधर्मसूत्र, हिरण्यकेशीयधर्मसूत्र, बोधायनधर्मसूत्र, वासिष्ठधर्मसूत्र (क्रिस्तो पूर्वं पञ्चमशतकात् प्राक् वसिष्ठेन सकलितम्) इत्यादीनि बहूनि विद्यन्ते। अन्यच्च शुल्बसूत्रम्। तत्र रेखागणित वेदिकरणादो परिमाण क्रमश्च वर्ण्यते।

पुरा खलु सुरभारत्या साम्राज्यमेव आसीत् आन्ध्राणा राज्ये। क्रिस्तो पूर्वम् अष्टमषष्ठशतकयो मध्ये प्रवृत्तत्वेन परिकीर्तितस्य महर्षेर्जीवितात्मन आपस्तबस्यैव आन्ध्राणा मध्ये सर्वप्रथमसस्कृतग्रन्थप्रणेतृत्वम् इति तत एव सस्कृतवाङ्मयस्य इतिहासश्चेति सुविदितमेतत् आन्ध्रवैदिकाना सस्कृतपण्डितानाम्। अधुना तिरुमल तिरुपति देवस्थानकार्यनिर्वहणाध्यक्षा श्रीमन्त एम वी एस् प्रसादमहाभागा तत्सहायाश्च वेदाना शास्त्राणा च प्रचुरप्रचारार्थम् इद वेदशास्त्रसम्मेलन निरवहन् श्रीवेङ्कटेश्वरसान्निधावात भारतभारतीयसस्कृतज्ञा वय सर्वे आशास्महे – "विद्वद्भि सगतैर्दिक्षु सस्कृतश्री समेधताम्" इति। *

SSS

# प्रमुखभाषणम्

प्रोफेसर आर सी द्विवेदी
जयपुर

वैदिकी सस्कृतिर्यज्ञमूला। "यज्ञो वै विष्णु' (श ब्रा 4 3 4 3) "एष वै प्रत्यक्ष यज्ञो यत्प्रजापति" "स य स यज्ञोऽसौ स आदित्य" (श ब्रा 14 1 4 6) इत्यादिभि शतपथवाक्यै, "अग्निर्वै देवानामवमो विष्णु" (ऐतरेये 1 1) यज्ञो वै देवाना मह (तत्रैव 1 7 2 1), यज्ञेन वै देवा (तत्रैव 1 5 1) इत्यादिभिर्ब्राह्मणवाक्यैर्यज्ञस्य परमेश्वररूपत्व साक्षादाम्नातम्।

वस्तुतो यज्ञ एव प्रकृति कारण वा सर्वस्य देवात्मभावस्य, दीर्घायुषो, धनस्य, पापनाशस्य, पुण्यप्राप्ते, अपूर्वस्य, रोगसकटादि परिहारस्य, अमृतत्वस्य कि बहुना, अभ्युदयनि श्रेयससिद्धे। तत एव सर्व जज्ञे 'तस्माद्यज्ञात् सर्वहुत सभृत पृषदाज्यम्। पशून् ताश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये तस्माद्यज्ञात् सर्वहुत ऋच सामानि जज्ञिरे छन्दासि जज्ञिरे तस्माद्यजुस्तस्मादजायत तस्मादश्वा अजायन्त ये के चोभयादत। गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावय'(ऋग् 10 90 7–10)

अन्यत्रापि बहुत्र (तथाहि ऋग्वेदे 4 25 7 1 1 4 3 9) यज्ञमाहात्म्य श्रुतिषु प्रकटितम्। यज्ञो हि मूल सर्वेषा श्रोतस्मार्तकर्मणामिति प्राधान्येन तत्तत्त्वप्रकाशनार्थमेव प्रवृत्तोऽयमारम्भ। लौकिकस्य सार्वभौमाभ्युदयस्य पारलौकिकस्य च नि श्रेयसस्य सिद्धिस्थान यज्ञ एव। स एव हि सर्वान् कामान् दोग्धि लौकिकान् पारलौकिकाश्च। दृष्टादृष्टोभयविधफलप्राप्त्यर्थ च स एवानुष्ठेय। अत एव श्रूयते "यज्ञो वै श्रेष्ठतम कर्म" (शतपथे 1 7 1 5)

"अग्निहोत्र जुहुयात् स्वर्गकाम" "दर्शपूर्णमासाभ्या स्वर्गकामो यजेत", "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादीनि श्रुतिवाक्यानि मन्त्राणा नैरुक्त्य विनियोग प्रयोजन प्रतिष्ठान विधि च व्यवस्थापयन्ति ब्राह्मणानि (तथाहि– "नैरुक्त्य यस्य मन्त्रस्य विनियोग प्रयोजनम्। प्रतिष्ठान विधिश्चैव ब्राह्मण तदिहोच्यते।।"), "वेदा हि यज्ञार्थ मभिप्रवृत्ता" इति वेदाङ्गज्योतिषोक्ति, सायणादिभाष्यपरम्परा, निरवच्छिन्ना श्रौतकर्मानुष्ठानप्रवृत्तिश्च श्रुतिमन्त्राणा श्रौतकर्मभि सह साक्षात् सबन्ध निर्दिशन्ति। गीतास्मृतिरपि यज्ञस्य सर्वातिशायि महत्त्व सावष्टम्भ प्रतिपादयति। तथा हि –

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽय कर्मबन्धन ।
तदर्थ कर्म कौन्तेय मुक्तसङ्ग समाचर ।।
सहयज्ञा प्रजा सृष्ट्वा पुरोवाच प्रजापति ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्।।
देवान्भावयताऽनेन ते देवा भावयन्तु व ।
परस्पर भावयन्त श्रेय परमवाप्स्यथ।
इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविता ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव स ।।
यज्ञशिष्टशिन सन्तो मुच्यन्त सर्वकिल्बिषै ।
भुञ्जते ते त्वघ पापा ये पचन्त्यात्मकारणात्।।
अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भव ।
यज्ञाद्भवति पर्जन्यो यज्ञ कर्मसमुद्भव ।।

(गीतासु 3 10 14)

पर्यन्ते च गीयते 'तस्मात् सर्वगत ब्रह्म नित्य यज्ञे प्रतिष्ठितम्।।" (3 15)।

ऋग्वेदस्योपक्रमो यज्ञदेवस्य पुराहितस्य प्राचीनर्नूतनश्च सर्वैरीड्यस्य पितुरिवाग्न स्तुतिपूर्वक भवति ।

अग्निमीडे पुरोहित यज्ञस्य देवमृत्विजम् ।
होतार रत्नधातमम ।

अन्यत्र च सूक्तेषु (तथा हि 1 31, 1 65, 4 12, 5 11, 6 6, 7 9) अग्निद्वारा यज्ञमहिमा प्रकाश्यते। तथा हि-

यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे।
प्र प्रे वयममृत जातवेदस प्रिय मित्र न शसिषम्।।

(ऋग्वेदे 6 48)

इत्यत्राग्ने प्रियमित्रत्वमाम्नातम्।

विश्वासा गृहपतिर्विशामसि त्वमग्ने मानुषीणाम्।
शत पूर्भिर्यविष्ठ पाह्यहस समद्धर शत हिमा ।।
स्तोतृभ्यो ये च ददति।। (6 48 8)

इत्यत्राग्ने सर्वप्रजाना गृहपतित्वमाविष्कृतम्। तस्यैव च यज्ञाना राजत्व धर्मस्य रक्षकत्व चाम्नातम् ।

राजन्तमध्वराणा गोपामृतस्य दीदिवम्।
वर्धमान स्वे दमे। (ऋग्वेदे 1 1 8)

भारोपीय (इन्डो यूरोपियन्)-भाषापरिवारस्य ग्रीक-लेटिनकेल्टिक्-टयूटानिक्-स्लेवानिक्-लिथु आनिअन- भाषाणा वैदिकसस्कृतेन सह साम्य तद्भाषाभाषिणा प्रत्नानामार्याणा धार्मिक साम्यमपि परिचाययति। देवशब्दो द्योतनार्थे यथा सस्कृते सुप्रसिद्धस्तथैवान्यास्वपि भारोपीयभाषासु ।

तथा हि- थेओस (ग्रीक) देउस देइवस दियेवस (लेटिन), दिया (आशीश), तिवर (नार्स भाषासु)। एतेषा सर्वेषा शब्दाना प्रकाशन द्योतनञ्चार्थ सर्वत्र प्राप्यते। सस्कृतस्य अग्निशब्द इग्निस (लैटिन), उग्नि स (लिथुआनिअन), ओग्नि इतिरूपै प्रा स्लेव भाषासु) प्राप्यते। यथा वैदिकधर्मे अग्नि पूजास्थान तथैव रोमन् ग्रीक्धर्मेष्वपि। लिथुआनियन्जातीया अग्नि उग्निस स्जेवेन्ना (पवित्राग्नि ) इति, स्जेवेन्ना पोनिक (पवित्रस्वामिनी) इति च मेनिरे । आवत्सरमस्योपासना क्रियते स्म वेद्या च सर्वदा प्रज्वलित प्रतिष्ठाप्यते स्म। 'अस्पेलेने इत्याख्या वेद्या अधिष्ठात्री' देवी तैर्मन्यते स्म । रोमवासिना तथैव वेदी-देवता 'वस्ता' इत्याख्या तदर्थ निर्मितेषु मन्दिरेषु पूज्यते स्म। ग्रीकाणामग्निदेवता हेत्तिथा । गृहवेदीस्थिता सती गृह्यधर्माणा स्वामिनी कल्पिता । पारसीकाना जरथुस्तधर्मे अग्निदेवताया 'अतर' इत्याख्याया महत्त्वमतीव प्रसिद्धम्। अग्निरेव अध्वरमध्याया शक्तिस्तेडाश्च पृथिव्या प्राशते। तथापि वैदिकधर्मे यथाऽग्निरीड्यो न तथाऽन्यत्र। तत एव एकसहस्रसूक्तेषु प्रायेण सूक्ताना शतद्वयी पुरोहितमग्नि पुरस्कुरुते। न केवलमग्नेर्महत्त्वमपि तु सर्वेषु भारोपीयधर्मविधिषु यज्ञस्य महत्त्व सुप्रतिष्ठमासीदित्यपि सस्कृतस्य यजधात्वर्थस्य ग्रीकभाषाया अगधातौ,

अवेस्तायाश्च यजधातौ प्राप्त्या विज्ञायते। अवेस्तार्थाः Fraster प्रस्तरेण सह, Banesman, Barezis बर्हिषा सह, steretobaresman स्तीर्णबर्हिषा सह Hauma सोमेन सह, Jaotar होत्रा सह सवदन्ति । सोमस्य पानं प्रयोगश्च भारोपीयभाषादे· प्रचयाच्च। एतेन यज्ञसस्थायाः प्राच्यपाश्चात्यादिदिक्षु वर्तमानानामार्याणा प्रागैति हासिक कालात् प्रचलनमासीदित्यैतिह्यविद्भिः विद्वद्भिर्बहुधा तुलनात्मकदेवशास्त्रस्य पर्यालोचनया व्यवस्थाप्यते ।

एक एव वेदो होतृ-उद्गातृ-अध्वर्यु-ब्रह्मणामृत्विजा कृते चतुर्धा ऋग्यजुस्सामाथर्वभेदैर्व्यवस्थितः। अत एवाहुः व्यधात् यशसन्नत्यै वेदमेक चतुर्विधम्। यज्ञस्य विधिर्ब्राह्मणानि स्वशाखीयानि श्रौतसूत्राणि प्रयोगनिबन्धान् पद्धतीर्वा समालोच्य कथञ्चिदवगन्तुं शक्यते। भारतवर्षादन्यत्र भूमण्डले क्वापि यज्ञविधीनां तदवान्तरकर्मणा चानन्त्य नोपलभ्यते। गृह्यसूत्रेषु स्मृतिषु आगमेषु च प्रतिपदितानामनुष्ठानानामपि तथैव महान् विस्तरो दृश्यते । सम्प्रदायस्योच्छेदेन प्रयोगपरम्परायाश्च ह्रासेनातिविचित्रपरम्पराशालिन्या यज्ञसंस्थायाः स्मार्तागमादिप्रतिपादितानामनुष्ठानानाञ्चा साङ्गोपाङ्ग निरूपणमसंभवमिव संवृत्तम्। श्रुतिस्मृत्यागमदृष्ट्या धर्माय तद्विधीना च जीर्णोद्धाराय सम्मेलनमिदं प्रवर्तकं भविष्यतीति प्रतीमः । क्रियासु श्रौतसूत्रप्रतिपादितासु चतुर्दशविधासु क्रियासु सप्त सन्ति हविस्सस्थाः सप्त च सोमसंस्थाः।

आहिताग्नेः सपत्नीकस्य परस्सहस्रेषु श्रौतकर्मस्वधिकारः। तेषु कर्मसु अग्निहोत्र त्रैवर्णिकेनावश्यकर्तव्यं नित्यकर्म न स्मृति- कारैः स्मृतम्। तच्चयावज्जीवमनुष्ठेयम् । दर्शपूर्णमासोक्तः कालविकल्पः जराजीर्णो विरमेत । विंशतिं वा वर्षाणि निरवधिकमनुष्ठाय ततः परित्यजेदिति नात्र लब्धावकाशः। अस्याग्निहोत्रस्य सायमुपक्रमः प्रातश्चापवर्गः (समाप्तिः)। एवं सायंप्रातश्च कालद्वयानुष्ठानेनैकं कर्म निष्पद्यते । सूर्योदयादनन्तरं यत्प्राग्निव्रतोऽग्निहोत्रं विहित स उदितहोमी। ततः पूर्व कुर्वाणः अनुदितहोमीति ।

दर्शपूर्णमासौ नित्यकाम्यतया द्विविधौ । प्रतिदर्शं प्रतिपौर्णमासं च यावज्जीवं पुरुषेणावश्यमनुष्ठेयत्वादननुष्ठाने प्रत्यवायाच्च नित्यत्वम् । तत्तत्फलमुद्दिश्यानुष्ठानवि वधानाच्च काम्यत्वम्। अनयोर्दर्शपूर्णमासयोः न केवलं स्वर्गमात्रार्थत्वमपितु अभिलषितसर्वफलप्रदातृत्वं शास्त्रसम्मतम्। पिण्डपितृयज्ञोऽमावास्यायामनुष्ठेयः दर्शाङ्गमिति कात्यायनः। स्वतन्त्रमिद भवातारथाकानेऽनुष्ठेय कर्मेति जैमिनिः (४.४.७)।

निरूढपशुबन्ध आहिताग्निना प्रतिसंवत्सरं सकृत् द्विर्वा, षड्वार वा ऽनुष्ठेयः। अस्य ब्राह्मणग्रन्थेषु प्रयोगविधानं न दृश्यते । सर्वेषां पशुयागानां प्रकृतिभूतो ऽग्नीषोमीयः पशुयागः। स सोमयागस्याङ्गभूतः। तथापि हविर्यज्ञत्वेत निरुढपशुबन्धः पूर्वानुष्ठेय इति कृत्वा श्रौतकर्मानुष्ठातारो ऽविशेषेणेमव पशुयागं साङ्ग निरूपयन्ति । एतस्मादेव चाग्नीषोमीये धर्ममतिदिशन्ति ।

चातुर्मास्यानि अग्निहोत्रदर्शपूर्णमासवन्नित्यानि। राजसूयमनुतिष्ठता क्षत्रियेणैव राज्ञा राजसूयमध्ये यान्यनुष्ठेयानि तानि राजसूयान्तर्गतानि अन्यानि च त्रैवर्णिकेनानुष्ठेयानि स्वतन्त्राणीति द्विविधानि । अत्र चत्वारि वैश्वदेव-वरुणप्रघास-साकमेधशुनासीरीयाख्यानि पर्वाणि सन्त्रि । पर्वसु पौर्णमासीष्वनुष्ठेयत्वादिमे यागाः पर्वशब्देनोच्यन्ते। साकमेधपर्वाणीति । अनीकवत्यादय इत्यर्थः महाहवींषि, पितृयज्ञः, त्र्यंबकहवींषीति चत्वारि कर्माणि।

आग्रयणेष्टिः शरद्रात्रौ वसन्ततौ च नवान्नोत्पत्तिका लयोरनुष्ठेया । अत एव नवान्नेष्टिरित्यप्यस्यच संज्ञा शरदि व्रीहिकाले व्रीहिमर्वत्यन्ने नवैर्यवैश्चानुष्ठेया नवैः श्यामाकैरपि वर्षास्वनुष्ठेया ।आग्रयणं कृत्वैव नवान्नमश्नीयान्नान्यथा।

सोमयाग ऋग्यजुस्सामवेदोक्तैस्त्रिप्रकारैरङ्ग कलापै स्संवलितो ऽनुष्ठीयते। सर्वेषां सोमयागानां प्रकृतिभूतो

याग अग्निष्टोमाख्य। तत्र सोमयागे द्वादश स्तोत्राणि सन्ति यत्र अग्निष्टोमाख्यमन्तिम स्तोत्रम्। तत्स्तोत्रवशादेवास्य 'अग्निष्टोम' इति सज्ञा तथैव उक्थ्य, षोउशि अतिरात्र, वाजपेय इत्यादयोऽपि स्तोत्रसज्ञयैव स्वसज्ञा लभन्ते। यद्यपि सोमयागे बहूनामिष्टिपशूनामनुष्ठानमादिष्ट तथापि सोमद्रव्यकयागास्य प्राधान्यत सोमयाग इति सज्ञा।

सोऽय सोमयाग प्रतिवसन्त त्रैवर्णिकेनाहिताग्निना यथाशास्त्र सदारेणावश्यानुष्ठेय। अस्य काम्यत्वमपि तत्तत्फलप्राप्तिसाधनत्वेन श्रूयते। अस्यैवाङ्गभूत प्रवर्ग्य इति सप्रदाय। अग्निष्टोम-उक्थ्य-षोडशि अतिरात्र-रूपाश्चतस्र सोमसस्था। एताभ्य एव ग्रहचमस स्तोत्राणामावापोतापारिता इत्यग्निष्टोम-वाजपेय अप्तोर्याम सस्थास्तिस्र समुदिता। अत्यग्निष्टोमे क्षात्रय एवाधिकृतो न पुनर्ब्राह्मणवैश्याविति केचित्। आश्वलायनास्तु त्रैवर्णिकाना-मत्राधिकार मन्यन्ते।

केषाञ्चिद्यागाना पर्वानुसारेण सज्ञा यथाहि- दर्शपूर्णमासाविति, अपरेषा द्रव्यवशात्, तथाहि- सोमायाग इति, स्तवनीयस्तोमवशाच्चान्येषा तथाहि- अग्निष्टोम इति, देशविशेषेष्वनुष्ठान विधिविशेषात् केषाञ्चित् सज्ञा, तथाहि-कुरुवाजपेय इति परेषा मेध्य वशात सज्ञा यथाहि निरूढपशुबन्ध इति। सोमयागस्य सप्तमी सस्था अप्तोर्याम इति सज्ञिता। अस्य व्युत्पत्तिरेव श्रूयते पुरा कदाचित् प्रजापति पशूनसृजत्। सृष्टा सन्तस्तेऽपगता।ताननेन क्रतुनाऽऽप्नोत्। यस्मादाप्नोत् तस्मादप्तोर्यामत्वमिति। अप्तो प्राप्त यामो यश अप्तोर्याम इति। गवामयनाख्य सवत्सरसत्रविषयेऽपि श्रूयते यदिय क्रतुर्गोभिरनुष्ठित इति गवामयनमिति सज्ञा।

राजा सूयते अभिषूयते सोमो यागार्थमत्रेति व्युत्पत्त्या राजसूयो निष्पाद्यते। सोऽय क्रतु राज्येऽभिषिक्तेन राज्यधुर वहता क्षत्रियेणानुष्ठेय। सूर्यवशीया सोमवशीयाश्च प्राक्तना राजानो युधिष्ठिरादय इम क्रतुमन्वतिष्ठन्निति जानन्त्येव पुराविद। अय बह्वीनामिष्टीना, द्वयो पशुयागयो सप्ताना हविर्होमाणा षण्णा च सोमयागाना समप्राधान्यभावेन समुदायरूप। य खलु सार्वभौमो राजा स्यात् स अश्वमेधाख्यस्य महायागस्याधिकारी। साधाराणक्षत्रियस्य च सामन्तस्य, ब्राह्मणवैश्ययोर्वा नास्ति तत्राधिकार। केचन राजसूयवदत्रापि राजसामान्यानामधिकार व्यवस्थापयन्ति सूत्रकारा। यद्यप्यय सोमयागस्तथापि सवनीयस्याश्वस्य प्राधान्यात् तद्वशादेवास्य सज्ञा। सर्वेषु शश्रौतकर्मसु प्रधानतमोऽय महायाग सर्वफलप्रदो महापातकनाशकश्च।

सर्वस्याप्त्यै सर्वस्य जित्यै, सर्वमेव तेनाप्नोति सर्व जयनि। इत्यास्ति श्रुतेरुद्घोष। राष्ट्रस्य सर्वविधप्रभुत्व-सपादनैक कुशलोऽय क्रतुरिति हृदयम्। आसमुद्रक्षितीशानामानाकरथवर्त्मना राज्ञामभावे विलुप्तानुष्ठानो जटिलप्रयोगोऽ परिचितपदार्थसकुलोऽतिबृहत्क्रियासमूह - रूपो विलोप गतोऽय महायाग। अधिकारि-द्रव्य कालादीना नवैर्विकल्पै सपत्स्यत न वेति न प्रतीम। श्रौतकर्मणा मध्ये ऽश्वमेधस्य प्राधान्य सर्वयज्ञश्रेष्ठत्व सार्वभौमकर्तृकत्व महापुण्यप्रदत्व च प्रतिपादयद्भिरस्माकमृषिभी राष्ट्रस्य राज्यस्य च सर्वशक्तिमत्त्व सप्रभुत्व कल्याणकारित्व च प्रामुख्येन प्रतिष्ठापितमन्यथा राष्ट्रस्य स्वातन्त्र्य हीयेत पारतन्त्र्य च प्रभवेत्।

सोमयागेषु पुरुषमेध सर्वमेधश्चापि परिगणितौ। तत्र पुरुषमेधे द्व्यून द्विशत (198) पुरुषपशवस्तत्तद्देवतोद्देशेन विहिता। तैश्च सह अजा अपि तदुद्देशेन विहिता। तेषामेव च यूपेषु बन्धन-सज्ञापन-विशसन-वपोद्धरणादयो व्यापारा अनुष्ठेया भवन्ति न तु पुरुषाणाम्। तेषान्तु नारायणात्मना ध्यान कृत्वा उत्सर्ग अर्थात् जीवतामेव परित्याग कार्य। पुरुषाणा परमपुरुषात्मना ध्यानकाले एव पुरुषसूक्तमन्त्रा पठनीया। तदर्थमेवेद पुरुषसूक्त प्रवृत्तम्। पुरुषमेधशब्दश्रवणमात्रेण पुरुषा मेध्या आसन्वैदिककाल इति भ्रान्तचित्ता पाश्चात्यास्तदनुसारिणश्च

भारतीया प्रवदन्ति। न हि तत्र पार्यन्तिक तत्त्व सनातनो वा सम्प्रदाय । तदत्र अग्न्याधानम् अग्निहोत्र दर्शपूर्णमासौ निरूढपशुबन्ध, चातुर्मास्यानि, सौत्रायणी चेति सप्त हविस्सस्था, अग्निष्टोम उक्थ्य, षोडशी, अतिरात्र, अत्यग्निष्टोम वाजपेय अप्तोर्यामश्चेति सप्त सोमसस्था सूत्ररूपेण निर्दिष्टा । एतासा क्रियाणा तदङ्गोपाङ्गाना द्रव्यदेवतापात्रदक्षिणादीना चातिविस्तृतो विषयश्चाधुनापि न स्पृष्ट। वस्तुत एते विषया आकरग्रथानुशीलनेन गुरुसाहाय्येन निरन्तर ह्रासमुपेयुषा प्रयोगाणा परीक्षणेनैव परिभावयितु शक्यन्ते नान्यथा। श्रौतानि स्मार्तानि आगमोक्तानि च कर्माणि श्रौतस्मार्तधर्मग्लानिना सह दुरनुष्ठेयानि सवृत्तानि। उत्तरभारते आहिताग्नयो विरलविरला विभाव्यन्ते। दक्षिणेषु केचन क्वचित् दृश्यन्ते । अत एवेय चिन्ता, को वेदानुद्धरिष्यतीति। मन्ये साक्षादत्र स्थित श्रीवेंकटेश्वर एव श्रौतस्मार्तागमानुष्ठानेषु प्रेरयित्वाऽस्माननुग्रहीष्यति ।

"दैवी स्वस्तिरस्तु न स्वस्तिर्मानुषेभ्य" । ■

# SACRIFICES AND ENVIRONMENTAL HARMONY

**Dr. A.S. RAMANATHAN**
Srirangam

Veda Vidya consists of two parts viz 'ब्रह्मविद्या' and 'यज्ञविद्या' - Brahma Vidya deals with the origin of the cosmos while Yajna Vidya is concerned with the processes through which both living and non-living beings come into existence and are sustained The Vedic seers in their speculations about the origin of the solar system struck at an important fact that the sun should be constantly fed by some food of divine origin which maintains its shape and brightness The Yajna concept has its origin in this principle of feeding Agni with Soma Soma is 'अन्न' and Agni is 'अन्नाद' This Soma is some white substance concentrated in the milky way and is called "Soma dhara" (अथो नक्षत्राणामेषामुपस्थे सोम आहित ) (R V 10 85 2) This is the real Soma which the Brahmanas were after, for attaining 'amrtatva' (सोम मन्यते पविवान् यत्सपिषन्त्योषधिम् । सोम य ब्रह्माणो विदुर्न तस्याश्नाति कश्चन)) (R V 10 85 3) This Soma finds its way through the rays of the sun to the atmosphere and to the earth through rainfall and feeds the plants The moon, the Soma plant are both replicas of this Soma According to the Vedic seers whether it is the birth of the solar system and its attendant features, or the birth and sustenance of a child, or the birth of the plants and their sustenance, or the appearance of the seasons, the process at work is Yajna' in which a substance of the Soma category is absorbed or consumed by or interacts with a substance of the Agni category This is an important concept running through the entire Vedic, Brahmanic and Upanisadic literature The essence of this concept is contained in the Gita-verse

सहयज्ञा प्रजा सृष्ट्वा पुरोवाच प्रजापति ।
अनेन प्रसविष्यध्व एष वोऽस्त्विष्टकामधुक् ॥ (Gita 3-10)

Because yajna is a constructive process in Nature through which the entire universe is created and sustained, it has become the most sacred duty of the individual (यज्ञो हि श्रेष्ठतम कर्म) The very first cosmic Yajna was performed by Prajapati (purusa) (R V 10 90) in which he created the universe and became one with it According to the 190th sukta of the 10th Mandala of Rgveda, intense heat developed in space resulting in the appearance of the primordial fluid (containing Soma and Agni) which subsequently gave rise to the Sun-Moon-Earth system characterised by 'सवत्सर' (apparent annual motion of the sun in the sky), day and night, seasons etc, as understood by us It is this 'Samvatsara Yajna' that goes on in Nature and is responsible for the birth and maintenance of life on earth

The vedic seers planned their rituals in time with what is taking place in Nature ('प्रकृतिवद्विकृति कर्तव्या, यद्देवा अकुर्वन् तदह करवाणि'), are the guide lines to be followed by the performer In Nature the Samvatsara Yajna is performed by Prajapati who is aided by the Devas who are no other than the forces of Nature like Agni, Vayu, Sun etc Each god has an assigned role in Nature and so also in the Yajna performed by men, rtviks (who represent Devas) are employed and they aid the yajamana in the ritual (अग्निर्होता, वायुरध्वर्यु , आदित्य उद्गाता, चन्द्रमा ब्रह्मा)

It is not difficult to undertsand why the Vedic seers prescribed rituals to be performed by men The principal cause of prosperity on earth is rainfall The heat of the sun influences the earth through various stages The day and night, the seasons, ayanas and samvatsara have different influences on the earth and their cumulative effect is responsible for its prosperity In other words the prana of the 'Saura Prajapati' is established in the earth and therefore she enjoys all the beneficiary effects of all its manifestations on her The Vedic seers believed that man as an individual has an 'atman' and if he adopts the same procedure as earth, he can also be prosperous in life In his individual capacity he can acquire the beneficiary effects of 'Saura Samvatsaragni in parts By performing the rituals in the same way as it takes place in Nature, his atman is linked to the atman of the 'Saura Prajapati' and he functions on the earth as a prosperous individual enjoying all the benefits of Nature After his death he enjoys Svargaloka according to his merits

The Vedic seers sincerely believed that by performing the various yajnas, the different parts of the Samvatsara, viz अहोरात्र, पक्ष, मास, ऋतु and अयन get purified (संस्कृत) so that their beneficial effects on earth and the living beings are strengthened and the adverse effects are subdued In other words the Vedic seers were very much aware of the protection of environment and knew that nothing should be done to disturb it They knew the importance of Earth-Atmosphere-Sun system for rainfall and the entire Srauta karmas are centred round two things viz ensuring that this system functions well and is not affected by asuric forces and then the elevation of the atman of the yajamana to a higher level

In the Agnihotra chapter of Satapatha Brahmana we have an 'आख्यान' which says that Prajapati by his offerings produced Agni-Vayu-Sun group and stressed its importance The Vedas and Brahmanas clearly bring out their importance The offerings of Agnihotra are for Agni, then Surya and then to Vayu They were particular that they could take only the remaining portion of the offerings, after they had offered to Devas In other words they believed that unless the Deva pranas are fed properly there will be no prosperity on earth That is why the Brahmana say that the yajamana can take only the remaining portion after he has offered to the Gods ('हुतोप्छिष्ठस्य ह्येवाग्निहोत्रजुहदशीत') It means that nothing should be done to disturb Nature Man can only use the rainfall and produce his food

It is interesting to note that the yajamana offers only a little for the first some what more in the next and still more he leaves in the ladle The Brahmana says that this denotes that gods are fewer than men and cattle are more numerous than men In other words, cattle should always outnumber men so as to provide ample food for them and nothing should be done to disturb this Men outnumbering cattle will only end up in great hardship to human society

To look at in a different way, the pravargya portion of the yajna performed by 'Samvatsara Prajapati' reaches the atmosphere and then feeds the earth, which means a constant loss of 'Yajna Retas' of Prajapati In order to compensate for this loss, yajnas are performed so that we put back into the atmosphere substances of Soma category so that compensation (क्षतिपूरण) takes place By this give and take process the yajna cycle is maintained with undiminished vigour The following statements of Gita mean the same thing

देवान् भावयतानेन ते देवा भावयन्तु व ।
परस्पर भावयन्त श्रेय परमवाप्स्यथ ॥
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविता ।
तैर्दत्तानप्रदायैभ्य योभुङक्ते स्तेन एव स ॥ (Gita 3-11,12)

In other words, the Vedic seers sincerely believed in the preservation of the Nature and environment which alone in turn can bestow on man all round prosperity

If we go through the various rituals as described in the Brahmanas, we come across several instances to show that the Vedic seers were ardent students of Nature They believed in living in tune with her and were very particular to conserve Nature in all its aspects

* * *

S.S.S - 2

# PAKAYAJNAS

**Dr. INDU DESHPANDE**
Pune

The Kalpa-sutras, a constituent of the Vedangas, comprise three groups of Sutras, the Srauta, Grhya and Sulba Sutras Pakayajna is a subject of the Grhya Sutras (GS) Each Veda has its GS Asvalayana (Asv), Kausitaki, Sankhayana are the GS of the Rgveda The Krsna - Yajurveda has the GS of Baudhayana, Agnivesya, Bharadvaja, Apastamba, Satyasadha, Vaikhanasa, Manava and Varaha Paraskara GS belongs to the Sukla Yajurveda The Samaveda possesses the GS of Gobhila, Khadira and Jaiminiya These Sutras related to rituals are directly connected to the Brahmanas and the Aranyakas Nevertheless, some rites in the GS do not have their origin in this literature Hence, the antiquity of these Sutras has been taken back upto the Indo-European or Indo-Aryan period by some scholars on the basis of similarity in certain rites and customs

The GS are reliable reports on the daily life of the ancient Indian people The Pakayajnas are related to the worldly life of the house-holder-sacrificer They are seven in number viz, Parvana - sthalipaka, Chaitri, Asvayuji, Agrahayani, Pindapitryajna, Masika - Sraddha, Astaka While making offerings to the deities and to the fathers one may divide these into two groups the first four into one and the remaining three into another

**Parvana - sthalipaka**

When a person returns to his house after marriage he asks the newly married bride to prepare sacrificial food cooked in a vessel (sthalipaka) The wife prepares it out of husked rice grains When the rice is cooked she pours ghee (ajya) on it and takes it away from the fire Then he sacrifices it with the utterence of svaha to Agni The second deity is Agni - svistakrt Then he serves meals to the learned Brahmin with the remaining food and presents a bull to him From that time onwards the householder constantly sacrifices on the full-moon days and the new-moon days in the similar manner observing fast on that day It begins on the first full-moon day after marriage and continues throughout the lives of the husband and wife In the sthalipakas performed throughout life on the full moon and the new-moon days there is no daksina of a bull [1]

**Chaitri**

The chaitri rite is performed on the full-moon day in the month of Chaitra[2] The sacrificer cleans and decorates his house on this day The husband and wife wear new clothes, flowers and ornaments Sthalipaka is prepared for the deities After the two aghara oblations in the fire he makes the offerings of clarified butter with the Mantras grismo hemanta ,

urnam me puryatam sriye jatah, vaisnavam He then makes the offerings of boiled rice mixed with ghee to Madhu, Madhava, Sukra, Suci, Nabhas, Nabhasya, Isa, Urja, Sahas, Sahasya, Tapas, Tapasya, to the deities of seasons, to herbs to the lords of herbs to Sri, to Sripati Having worshipped to the west of the fire with his face turned upwards he announces the havis He serves the Brahmins with cooked chaitra food with the recitation of the hymn to anna He then eats in the company of his sapindas

**Asvayuji[3]**

On the full moon day in the month of Asvin the rite Asvayuji is performed The sacrificer cleans the house and decorates it takes bath and wears new clothes He cooks Sthalipaka for Pasupati Five oblations of caru cooked with milk and mixed with curds, honey and ghee are offered to India, Indrani, Asvins, asvayuji paurnima and sarad with the Mantras, Indraya svaha, Indranyai svaha, Asvibhyam svaha Asvayujyai paurnamasyai svaha, sarade svaha After svistakrt homa prsataka[4] or prsadajya is offered with joined hands to pasupati with the Mantra unam me puryatam purnam me mo' pasadat prsatakaya svaha The relatives of the sacrificer cast glances at (aveksana) the caru The cows and calves are allowed to live together on this day Vaikhanasa prescribes gostha as the place of performance for this rite Brahmin is served meal The rite is performed for increase in cattles

**Agrahayani**

Agrahayani rite is performed on the full-moon day in the Margasirsa [5] The rite consists of worship to the seasons and the serpents After the Sthalipaka two oblations of ghee are offered with the Mantras, apasvetapada, na vai Four more oblations are offered with the formulas beginning with yam janah , samvatsarasya pratima , samvatsaraya , grismo hemanta Then he offers four oblations of caru from the sthalipaka to Soma, Mrgasiras, Margasirsi - paurnima, and Hemanta After the svistakrt offering with caru, dhana and saktu he puts the portion of offering materials in the winnowing basket and gets out of the house He cleans the ground near the entrance of the house, sprinkles water on it and offers bali to the serpents with the materials brought from the house with the Mantras beginning with agneya pandu , sveta , saurya He again sprinkles water near it and offers collyrium, sandelwood paste and flowers He offers saktus and pours water and facing towards the east praises the serpents with the Mantra, namo' stute Then he goes round the house pouring water three times from left to right Then they wash themselves and the sacrificer says utsrsto bali

**Pindapitryajna**

The Srauta - sutras include pindapitryajna in the havis sacrifices and lay down the rule that the house-holder who does not keep srauta fires should perform this rite on the grhya fire The Gs of Vaikhanasa, Kausika, Gobhila and Khadira describe this rite as one of the seven Pakayajnas

Pindapitryajna is observed every month on the new-moon day in the afternoon [6] The afternoon is said to be belonged to the fathers The pindas made out of caru cooked on the Grhya or Aupasana fire are offered to the fathers Prior to that the sacrificer offers two oblations of ghee to the gods into the fire and thereby seeks permission from the gods, Agni and Soma to offer a sacrifice to the fathers Three pindas are offered to the sacrificer s father, grand-father and great-grand-father According to the Kausika GS the offering of pindas is also made to the wives of the fathers The remaining should be disposed of after the sacrificer smells it According to Asvalayana the middle pinda should be given to the wife of the sacrificer if he is desirous of a son The remaining should be thrown in to the water

**Astaka**

There is difference of opinion among the authors of the GS about the Astaka tithis, materials of offering and regarding the deities to whom offerings are made Procedure of the rite is divided into three parts viz, homa, inviting Brahmins to dinner and the rite called Anvastaka The Asv GS [7] mentions Astaka rite on the eighth tithi of the dark fortnight of the four months commencing from the month of Margasirsa On the seventh tithi, i e the earlier day of Astaka rite pindas of cooked rice, rice mixed with sesame (krsara) and payasa are given to the father, grand-father and great-grand-father of the sacrificer On the next day i e the eighth tithi animal sacrifice is performed and omentum of the animal or seven oblations of Sthalipaka are offered to the deities - Visvedevas, Agni, Surya, Prajapati, Ratri, Naksatras, Rtus, Fathers, Cattles, etc The eighth oblation is offered to Svistakrt Agni On the nineth tithi the rite called Anvastaka is performed The flesh of the animal immolated on the previous day is cooked and the other materials of oblation include rice, rice mixed with sesame, Payasa, dadhimantha and madhumantha The procedure of Pindapitryajna is followed The agnaukarana, i e the offering of oblation into the fire is of the material excluding madhumantha Some Sutras [8] include wives of the fathers in the offerings On the two or six lines

drawn to the agneyi (south-eastern) direction the pindas for the fathers are placed in the front and for the wives of the fathers on the back lines Wine and slury of rice are the additional materials for offering in the case of wives [9] Combination of homa and sraddha is a special feature of this rite

**Masika Sraddha**

The time for Masika Sraddha is the dark fortnight of the month Meals to the Brahmins is the principal one and oblations into the fire, and offering of Pindas (rice balls) to the fathers are the secondary in this rite One has to feed an odd number, at least three, of the Brahmins who are pure, and versed in the Mantras The sacrificer makes oblations of food prepared for the Brahmins Then he offers seven oblations of clarified butter (ajya) He touches the whole food with the Mantras When the Brahmins have taken food, he goes after them circumumbulating them from left to right Then he spreads darbha grass in two layers, pointing towards the south, pours water on it with the formulas, places pindas over them, ending in south, with the formulas Then he pours down water on them and offers worship to the ancestors He then again sprinkles water three times from right to left round the pindas with a water pot Then he besprinkles the vessels which are turned upside down without taking breath He arranges them in pairs Then he eats at least one bite of the remaining food The procedure of Sraddha is based on Pindapitryajna with the addition of meals served to Brahmins [10]

From the contents of the pakayajnas we may conclude as under —

1) They are performed to make the Family life happy and contented
2) They amount to understanding and appreciating the respective changes that take place in the nature
3) Some of them are performed in memory of our fore-fathers

Thus, we see that there are constructive as well as destructive powers in nature, and as a mark of recognition, gratitude and fear these rituals were performed in relation to them

**Foot notes :**

1 Apastamba GS 3 7

2 Vaikhanasa GS IV 8 The Chaitri rite is the same as Sulagava or Isanabali cf Haradatta on Gautama GS VIII 19 for Isanabali cf Apastamba GS 7 19 13 ff

3 ASV GS 2 2 1, Paraskara GS 2,16

4 Ghee mixed with milk or curds - payasy ajye nisikte tu tat payah prsatakam

5 Paraskara GS 3 2

agrahayani margasirsi paurnamasi tasyami ya kriya sa pi tad yogad agrahayanity uchyate pratyavarohaniti va cf Matrdatta on Hiranyakesi GS 'Pratyavarohana is a rite performed to signalise the giving up of the use of cots and high couches, recommended from the full moon of sravana for fear of snakes (as in san GS IV 15 22) Some describe two rites separately, one on the full moon day of Margasirsa and another called Pratyavarohana on the first night of Hemanta' (AP GS 19 3-5 and 8-12), cf, KANE History of Dharmasastra Vol II Part II P 829

6 ASV SS2 1

7 ASV GS 1, 2,3

8 ASV GS 2 4

9 Paraskara GS 3 3

10 Apastamba GS 8 21

Vaikhanasa GS 4 7 pitrir pretam coddisya pujanam sarvam sraddham bhavati, also cf, Panini 5,1,110, varttika cudadibhya upasmikhyanam Sraddha prayojanam asya sraddham

* * *

SSS - 3

# हविर्यागसमीक्षणम्


श्री. डी.वी.जि.ए. सोमयाजी
पोडगट्लपल्ली


ज्ञानार्थकाद्विदधातो वेदशब्दो निष्पन्न। प्रत्यक्षानुमान— ज्ञातुमशक्यानपि विषयान् वेदा बोधयन्तीति वेदशब्दार्थ सर्वथा सार्थक। वेदा मानवश्रेयस्साधनहेतुभूतान् बहून् मार्गानुपदिशन्त प्रधानतया कर्ममार्गज्ञानमार्गाभ्या अभ्युदयमोक्षोपायप्रदर्शका भवन्तीति भारतीयविदुषामाशय। तत्र कर्ममार्ग एव प्रथमत अनुसरणीय इति, यज्ञकर्मादीनामाचरणद्वारा जन मनोनैर्मल्य प्राप्य ज्ञानमार्गानुसरणाय योग्यता लब्ध्वा तद्द्वारा मोक्षभाक् भवतीति कर्ममार्गस्य अत्यन्त प्राधान्य वर्तते इति वक्तु शक्यते। वेदो धर्ममूलम्, यागादिरेव धर्म, वेदा यज्ञार्थमभिप्रवृत्ता इत्यादिवचनानि पूर्वोक्तमभिप्राय समर्थयन्ति।

यज्ञशब्द देवपूजासगा तिकरणदानाद्यर्थकात् यज–धातो निष्पन्न। यज्ञा त्रिविधा, पाकयज्ञा, हविर्यज्ञा, सोमयज्ञा इति। अष्टकादय पाकयज्ञा, अग्न्याधेयादय हविर्यज्ञा, अग्निष्टोमादय सोमयज्ञा। अस्मिन्पत्रे हविर्यज्ञानधिकृत्य किंचित् प्रस्तूयते। अग्न्याधेयम्, अग्नि होत्रम्, दर्शपूर्णमासौ, आग्रयणम्, चातुर्मास्यानि, निरूढपशुबन्ध, सौत्रामणी, इति सप्त हविर्यज्ञा गौतमधर्मसूत्रेषु परिगणिता, केचन अग्न्याधेय विहाय पिण्डपितृयज्ञेन साक सप्तहविर्यज्ञा इति मन्वते। पिण्डपितृयज्ञ दर्शाङ्गमिति कात्यायन। स्वतन्त्रमेव कर्मेति बहूना विदुषामाशय। हविश्शब्देन आज्यचरुपुरोडाशमासादीनि गृह्यन्ते। श्रौतकर्माणि सर्वाणि प्रायेण कृतदारेण आहिताग्निनैव कर्तव्यानि। श्रुतिविहित अग्न्याधान य करोति स आहिताग्नि।

आधानानुष्ठानेन अग्निसिद्धिरेव फलम्। गार्हपत्य आहवनीयदक्षिणाग्नीना त्रयाणा वा सभ्यावसथ्याभ्या मिलित्वा पञ्चाना वा अग्नीना सिद्धि आधानेन भवति। प्रायेण बहवो यजमाना गार्हपत्यादीन् त्रीनेव अग्नीनादधति। अग्नीनामाधान तिसृणा पावमानेष्टीना अनुष्ठान च अत्र प्रधान क्रियाकलाप। पावमानेष्टिषु प्रथमाया इष्टे अग्नि पवमानो देवता। द्वितीयस्या अग्नि पावक, तृतीयस्या अग्नि शुचि। एतासा पावमानेष्टय इति याज्ञिको व्यवहार। एता इष्टय आधानदिने समानतन्त्रेण कर्तव्या। अथवा आधानदिनात् द्व्यहे, त्र्यहे, चतुरहे, अर्धमासे, मासे, मासद्वये, सवत्सरे वापि कर्तव्या। पावमानेष्टीना अनुष्ठानानन्तर तस्मिन्नेव दिने सायमग्नि होत्रारम्भ। आधानस्य पावमानेष्टीना च अङ्गाङ्गिभाव केचन वदन्ति। आधानस्यैव पावमानेष्टीनामपि स्वत एव

अग्निसपादकत्वमस्तीति उभयेषा समुच्चयमात्रमेव इत्यन्ये। आधान त्रिविधम्-होमपूर्वाधानम्-इष्टपूर्वाधानम्, सोमपूर्वाधानमिति।

श्रौतकर्मसु आधानानन्तर आचरणीय कर्म अग्नि होत्रम्। त्रैवर्णिका पुरुषा तस्य अधिकारिण। अग्निहोत्र सूत्रकारै नित्यकर्मस्वेव परिगणितम्। अत यावज्जीवमनुष्ठेयम्। अग्निहोत्रहोम पयसा कर्तव्य। प्रात काले आहुतिद्वयम्। एक सूर्यदेवताकम्। अपर प्रजापतिदेवताकम्। सायकालेऽप्याहुतिद्वयम्। एकमग्निदेवताक, अपर प्रजापतिदेवताकम्। इमा चतस्र आहुतय अत्र प्रधानभूता। सायकाले प्रथमाहुते अग्निदेवताकत्वात् सर्वस्यापि कर्मण अग्निहोत्रशब्दव्यवहार। इदमापस्तम्बादि-यजुर्वैदिकमतेन। बह्वृचाना मध्ये पूर्वोक्तै चतुर्भि साक गार्हपत्ये सायप्रातयो चत्वार चत्वार इति आहत्य अष्टौ होमा, एव दक्षिणाग्नो च इति विशतिसख्याका होमा।

प्रात काले सूर्योदयानन्तरमेव होम कर्तव्य इति कठा, तैत्तिरीया, मैत्रायणीयाश्च अभिप्रयन्ति। बह्वृचा, कातीया, छन्दोगाश्च सूर्योदयात्पूर्वमेव होम कर्तव्य इति वदन्ति। सर्वेषामपि मते अग्निहोत्रप्रणयन तु उदयात्प्रागेव। मृतपत्नीकस्यापि अग्निहोत्रदर्शपूर्णमासयोरधिकार अस्तीति रुद्रदत्त। अग्निहोत्राद्यनुष्ठान मृतपत्नीकस्य शिष्टसप्रदाये न दृश्यते। इदमग्निहोत्र सायप्रात कालयो यजमान स्वय जुहुयात्। पुत्रादिभि ऋत्विजा वा कारयेत्। पर्वणि यजमान एव जुहुयात्। पशुकाम स्वर्गकामो वा पयसा, इन्द्रियकामो दध्ना, यवाग्वा ग्रामकाम इति द्रव्यभेदेन फलभेदोऽपि श्रूयते। अधिकारिणि पितरि जीवति सति तेन अकृते आधाने पुत्रादिभि पित्रा आधान कारयित्वा अनन्तरमेव स्वय आधान कार्यम्।

दिनद्वयानुष्ठेय कर्म दर्शपूर्णमासौ। पौर्णमास्या प्रातरारभ्य प्रतिपदि पूर्वाह्णे पौर्णमासीयाग, एव अमावास्याया प्रातरारभ्य तदनन्तरप्रतिपदि पूर्वाह्णे दर्शयागश्च समापनीयौ। पौर्णमास्या अन्वारम्भणीयेष्टि कृत्वा अनन्तर दर्शपूर्णमासौ आरभेत। पौर्णमास्या त्रयो यागा। अग्निदेवताक पुरोडाशद्रव्यक प्रथम। विष्णु- प्रजापति-अग्नीषोमीयान्यदेवताक आज्यद्रव्यक उपाशुयाग द्वितीय। अग्नीषोमीयदेवताक पुरोडाशद्रव्यको याग तृतीय। एवममावास्याया आग्नेय पुरोडाशयाग, ऐन्द्रो दधियाग, ऐन्द्र एव पयोयागश्च इति त्रयो यागा। प्रयाजाद्यङ्गजातमपि अनुष्ठेयमेव। विस्तरभयात् तेषा विवरण नात्र क्रियते। दर्शपूर्णमासौ नित्यौ काम्यौ च, न केवल स्वर्गादिक फलम्, अभिलषित-सर्वाभीष्टसिद्धिश्च भवतीति श्रूयते।

आग्रयणेष्टि कालद्वये शरदृतौ वसन्ततौ च अनुष्ठेया। अस्या नवान्नेष्टिरिति सज्ञा। वर्षासु श्यामाकै शरदि व्रीहिभि वसन्ते यवैश्च कर्तव्या। व्रीह्याग्रयण-श्यामाकाग्रयणयो समानतन्त्रेणाप्यनुष्ठान सूत्रकारैरुक्तम्। तथापि व्रीह्युत्पत्त्यनन्तर शरद्येव अनुष्ठेयेति बोध्यम्। तत्राप्यमाया पूर्णिमाया वा। पुण्यनक्षत्रादयोऽपि सूत्रान्तरेषु उक्ता। नानिष्ट्वाग्रयण नवान्नमशीयादाहिताग्नि इत्यादिवचनै अस्या प्राशस्त्यमवगम्यते।

चातुर्मास्यानि द्विविधानि। स्वतन्त्राणि राजसूयान्तर्गतानि इति। स्वतन्त्रेषु त्रैवर्णिका अधिकारिण। राजसूयान्तर्गताना तु क्षत्रियस्यैव अधिकार। तत्र चत्वारि पर्वाणि। 1) वैश्वदेवपर्व, 2) वरुणप्रघासपर्व, 3) साकमेधपर्व, 4) शुनासीरीयपर्व इति। सर्वेषु हविर्यागेषु चत्वार ऋत्विज। अध्वर्यु, ब्रह्मा, होता, आग्नीध्रश्चेति। वरुणप्रघासपर्वणि प्रतिप्रस्थाता अधिक। पौर्णमासीषु अनुष्ठेयतया अत्र पर्वशब्देन यागा एव उच्यन्ते। चातुर्मास्यानि नित्यानि। अत्र पक्षद्वयमपि श्रूयते। सकृदेव कृत्वा उपरम इति उत्सर्गपक्ष, पञ्चसवत्सर यावत् ततोऽप्यधिक वा प्रथमप्रयोगपरिसमाप्त्यनन्तर पुन पुनरनुष्ठान इति अनुत्सर्गपक्ष। चातुर्मास्यानि विनियोगद्रव्यभेदेन ऐष्टिकानि, पाशुकानि, सौमिकानि चेति त्रिप्रकाराणि भवन्ति। प्रायेण ऐष्टिकानामेव आचरण परिदृश्यते।

निरूढपशुबन्ध पशुयाग। सर्वेषा पशुयागानामयमेव प्रकृति। ऐन्द्राग्न इत्यपि अस्य व्यवहार। अग्नीषोमीयपशुयागोऽपि पशुयागाना प्रकृति। तत्र क्रत्वन्त

पातिना अग्नीषोमीय, अन्येषा ऐन्द्राग्न इति आपस्तम्बश्रौतसूत्रव्याख्याने रुद्रदत्त। निरूढपशुबन्ध आहिताग्निना प्रतिसवत्सर कार्य। सकृत् द्विर्वा षट्कृत्वो वा अनुष्ठाय विरमेत्।

सौत्रामणी नाम पशुयाग। स द्विविध। चरक-सौत्रामणी, कौकिलसौत्रामणी इति। चरकसौत्रामणी स्वतन्त्रा, चयनाङ्गभूता च। प्रायेण चयनाङ्गभूतत्वेनैव सौत्रामणीयागानुष्ठान दृश्यते। अजो धूम्रवर्णोऽश्विदेवताक, मेष सरस्वतीदेवताक, मेष एव इन्द्रदेवताकश्चेति त्रय पशव। निरूढपशुबन्धकल्पेन त्रयाणा सहैव अनुष्ठानम्। सुराग्रहस्य स्थाने पयोग्रहग्रहण विकल्पतया आपस्तम्बादिभिरुक्तम्। कौकिलसोत्रामण्या ऐन्द्र आश्विन, सारस्वत, ऐन्द्र, ऐन्द्रो वायोधसश्चेति पञ्च पशव इति विशेष।

पशुयागेषु कश्चन विचारणीयो विषय दृश्यते। प्रत्यक्षतया पशुविनियोग श्रौतसूत्रेषु विहित। आन्ध्रदेशे बहुषु स्थलेषु एवमेव पशुयागानामाचरण दृश्यते। अन्यत्र केषुचित् स्थलेषु, केषुचित् सम्प्रदायेषु च पिष्टपशुविनियोग दृश्यते। कुण्डे आज्य प्रपूर्य तस्यैव पशो प्रतिनिधित्व प्रकल्प्य पशुयागान् कारयति कश्चन आन्ध्रदेशीय श्रौतसूत्राभिज्ञ। अद्यतनकाले यज्ञे पशुविशसन निवारयितु (जीवहिसेति धिया) प्रभुत्व, जीवकारुण्यसस्था, अनार्य मतसस्थाश्च यतन्ते। आहारार्थं वा, वैज्ञानिकपरिशोधननिमित्त वा क्रियमाणा अपरिमिता जीवहिसा न कोऽपि स्मरति। शोचनीयोऽय विषय। अश्वमेधादीना कलियुगे निषिद्धत्वात् प्रतिनिधित्वस्वीकरण आवश्यकमेव। तथैव सर्वेषु पशुयागेषु पशो स्थाने कस्यचित् वस्तुन प्रतिनिधित्वरूपेण स्वीकरण युक्त वा इति विचारणीयम्। लोकश्रेयस्साधनबुद्ध्या, पारमार्थिकदृक्पथेन वा क्रियमाणे यज्ञे पशुविशसनविषये प्रतिबन्धकल्पन नोचितमिति प्रभुत्व, तास्ता सस्थाश्च उद्दिश्य समुचितरीत्या विज्ञाप्य, तान् तान् प्रतिबन्धान् दूरीकर्तु वा प्रयत्न कर्तव्य।

यागाना अनुष्ठान दक्षिणभारते अधिकतया श्रूयते। आन्ध्रदेशेऽधुना सोमयाजिन हविर्याजिनश्च किञ्चिन्न्यूनाधिकतया पञ्चाशत्सख्याका वर्तन्ते। तत्तद्यज्ञानुष्ठानेन स्वर्गादिरूपफलानि श्रौतसूत्रेषु उपादिष्टानि। यथा– 'अग्निहोत्र जुहुयात् स्वर्गकाम' इत्यादि। हविर्यज्ञा नित्या, काम्याश्च। नित्यानामनुष्ठानेन पापक्षय, काम्यानामनुष्ठानेन तत्तत्फलसिद्धिश्च प्रयोजनम्। नित्यकाम्ययो भेद सकल्पे एव, न त्वनुष्ठाने। कामनयानुष्ठाने नित्यानुष्ठानसिद्धिश्च भवतीति मीमासकानामाशय। हविर्यज्ञा अपि नित्यानामितरेषा कर्मणामिव पापक्षयकारका चित्तनैर्मल्यप्रदायकाश्च भूत्वा मोक्षोपयोगिनो भवन्ति।

SSS - 4

# स्मार्तकर्मणां वैशिष्ट्यम्

**डा. सन्निधान सुदर्शनशर्मा**
तिरुपति

सदसद्विवेकनिधानभूतस्य मनुष्यजन्मन सार्थक्य पुरुषार्थद्वारैव सिद्ध्यति। तत्र धर्म आदो सङ्ख्यायते। स च श्रेयस्साधनीभूतकर्मरूप। उच्चावच कर्म श्रुतिषु प्रत्यपादि, स्मृतयस्ता अन्वसरन्। पुरा कर्म एकविधमेवासीत्। अद्य तु श्रौत स्मार्तमिति द्विधा गण्यते। तत्र कारणमिदमेव कालगतौ नैकवेदशाखा उत्सन्ना बभूवु। तत प्रागेव कृपालवो महर्षय तत्तच्छाखासु प्रपञ्चिताना कर्मणा स्वरूप स्मृत्यादिना सङ्गृह्य जुगुपु, अस्मान् प्रापयामासुश्च। एवञ्च सर्वाण्यपि कर्माणि वैदिकान्येव। तथाऽपि प्रत्यक्षश्रुतिमूलकानि श्रौतानीति, स्मृतिगम्यानि स्मार्तानीति च व्यवह्रियन्ते। अत्र स्मृतिशब्देन न केवल स्मृतय अपितु आश्वलायनापस्तम्बादीना गृह्यधर्मसूत्रादीन्यपि अवश्य ग्राह्याणि। तेषा पौरुषेयत्वेप्यनुमेयश्रुतिमूलकत्वात् प्रामाण्यमक्षत-मेवेति पूर्वमीमासाया प्रथमाध्यायस्य तृतीयपादे न्यरूपि।

अदृष्ट दृष्टमपि फल वितन्वत् स्मार्तकर्मजातम् अनायासानुष्ठेयतया श्रेयस्साधनानीतराण्यतिशेते। महायज्ञा, पाकयज्ञा, सस्काराश्च स्मार्तकर्माणीति व्यपदिश्यन्ते। कासुचित्स्मृतिषु स्मार्तप्रयोगग्रन्थेषु चोपात्ताना प्रत्यवायापकर्षकाना प्रायश्चित्तानामप्यत्र गणने नास्ति व्याघात। अथ क्रमेणैतेषा स्मार्तकर्मणा स्वरूप गरीयस्त्वञ्च गोचरीकुर्म।

धर्मिष्ठोऽपि गृहस्थ अजानन्नेव पञ्चसु स्थानेषु प्राणिनो हिनस्ति, तानि च स्थानानि–चुल्ली, पेषणी, अवस्कर, कुण्डनी, उदकुम्भ इति। तदुक्त मनुस्मृतौ–

**पञ्चसूना गृहस्थस्य चुल्ली पेषण्यवस्कर।**

**कुण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्॥**

इति। अत प्रत्यह चुल्ल्यादीनामुपयोगेन समुत्पद्यमानानामेषा प्राणिहिसादोषाणामपनोदाय क्रमेण महायज्ञा विहिता। पञ्चसूनापनुत्ति एतेषा साधारण फलम्।

तत्र वेदस्य अध्ययनमध्यापनञ्च ब्रह्मयज्ञ, तर्पणादिक पितृयज्ञ, अग्नौ यद्धूयते स देवयज्ञ, भूतेभ्यो बलिदान भूतयज्ञ। यो जन पञ्चैतान् महायज्ञान् अनुदिनमविच्छिन्नमाचरति स सूनादोषैर्न लिप्यते। न तेन पापापनुत्तये तीर्थयात्रादिकमटितव्यम्। गृहे वसन्नेव स पञ्चमहायज्ञै पापानि परिमार्ष्टि। महायज्ञ इति रूढ नाम। नात्रानुष्ठानगौरवम्, फल तु महदेव। कर्मशुद्ध्या चित्तशुद्धि, तच्छुद्ध्या ज्ञानवैराग्यादिक, ततश्च मोक्ष इति पङ्क्तौ महायज्ञ प्रथमसोपानायते।

अथ सप्त पाकयज्ञा। पाक अल्पश्चासा यज्ञश्च पाकयज्ञ, पक्वद्रव्यसाध्य इति वा। यद्यप्योपासने अपक्वास्तण्डुला हूयन्ते तथाऽपि छत्रिन्यायेन तस्यापि तत्सज्ञा।

तत्रादावौपासनम्। विवाहसस्कारद्वारा प्राप्यमिद कर्म गृहस्थस्य नित्यम्। वैवाहिकाग्नाविदमनुष्ठीयते। सोऽग्निरौपासनाग्नि इतरपाकयज्ञाना नैकश्रोतस्मार्त-कर्मणाञ्चायमेवाधारभूत। साय प्रातश्च हामोऽत्र विधीयते। औपासनाग्निपरिचर्या विना भार्याया अपि सङ्गम प्रत्यवायहेतुर्भवति। अशक्त्यादिषु प्रबलेषु कारणेषु सत्सु (अपकृष्य) पक्षहोमसमस्यहोमाद्युपाया अपि सूत्रकारैर्निरदिश्यन्त। केषाञ्चन गृह्यकर्मविदा मते गृहशब्दस्यायमेवौपासनाग्निरर्थ, तद्युक्त गृहस्थ।

मासि द्विवार (पोर्णमास्याममायाञ्च) पर्वणि पर्वण्यनुष्ठीयमानोऽय यज्ञ पार्वणस्थालीपाक, यत्र चरु हूयते। अस्य वैवाहिक स्थालीपाक एव प्रकृति। सम्पत्पशुपुत्राद्यवाप्ति अस्य फलम्।

वैश्वदेवाख्यमिद कर्म पञ्चमहायज्ञात्मकमेवेति हरदत्तादय। सुदर्शनादयस्तु "सज्ञाभेदात्कर्मभेद" इत्यभिप्रयन्ति। अत्र प्रमाण पाराशरस्मृत्यादिकम्। कर्मणाऽनेनानुष्ठितेन पञ्चसूना अपनुद्यन्ते। किञ्चानेन अन्नसस्कार, तत तनुमनस्सस्कार तद्द्वाराऽऽत्मसस्कारश्चोत्पद्यते।

वर्षर्तो सर्पबाधाया आधिक्यमनुभवसिद्धम्। अतस्तदुपशान्तये सर्पबलिरिति यज्ञो विहित। श्रावणपूर्णिमामारभ्य मार्गशीर्षपूर्णिमापर्यन्तमनुष्ठेयेऽस्मिन् आद्यन्तयो स्थालीपाक कर्तव्य। कर्मण्यस्मिन् उशीरादीनि सुगन्धद्रव्याण्युपयुज्यन्ते। सर्पानुद्दिश्य प्रतिरात्रि बलिर्देय। आश्वलायनस्तु श्रावणपूर्णिमाया आरभ्य मार्गशीर्षपूर्णिमापर्यन्त दिनानि गणयित्वा तत्समानसङ्ख्यया मुष्टिभिरवदाय प्रथमदिन एव बलि दातुमङ्गीकरोति।

ईशानबलौ ईश्वर प्रधानदेवता। सर्वे बलयस्तमेवोद्दिश्य दीयन्ते। पशुपुत्रपोत्राभि वृद्ध्यर्थमनुष्ठातव्योऽय यज्ञ सकृदेवेति केचित्, केचित्प्रतिवर्षमिति च कथयन्ति। होमधूमस्य परित गा स्थापनीया। गवा मार्गे क्षेत्रपते कृते बलिराहर्तव्य। सुगन्धिद्रव्यै दर्भाग्रमुष्टिना गवामवोक्षण कार्यम्, अग्रे वृषाणाम्।

स्वल्पभेदा अष्टकानुष्ठानकालविषये वर्तन्ते। तत्राश्वलायनमते मार्गशीर्षादीना चतसृषु कृष्णाष्टमीषु, अष्टका अनुष्ठातव्या। पूर्वेद्युरेव सङ्कल्प। विप्रनिमन्त्रण, अग्निष्वात्तादिपितृणामावाहन विश्वेदेवादीना होम इत्यादयोऽत्र मुख्या अशा। उत्तरोत्तरश्रेयोभिवृद्धि अस्य फलम्।

इदमेव फलमभिलक्ष्य मासिश्राद्धमप्यनुष्ठीयते। मासि अनुष्ठेयत्वादस्येद नाम। सप्तानामेतेषा पाकयज्ञाना परिगणने मतभेदास्सन्ति। आग्रहायणीमाश्वयुजीञ्च केचनैतदन्तर्गता मन्यन्ते। एषा यज्ञानामनुष्ठानेन न केवलमनुष्ठातुरपि तु तद्वशीयाना सर्वेषामपि श्रेयोभिवृद्धिर्भवति, अनुष्ठाता च चित्तशुद्धिमपवर्गरतिञ्चाप्नोति।

अथ सस्कारा विचार्यन्ते। सस्कारो नाम आत्मशरीरान्यतरनिष्ठो विहितक्रियाजन्योऽतिशयविशेष। सस्कारशब्दस्तु सस्क्रियते ज्ञानयोग्यतामापाद्यते पुरुषस्य चित्तमनेनेति व्युत्पाद्यते। केचन सस्कारा दोषमार्जनरूपा, केचन गुणाधानरूपा, केचन उभयात्मका। गोतमादिभिर्महर्षिभि अष्टभिरात्मगुणैस्साक चत्वारिंशत्सस्कारा अभिहिता। तत्र स्मार्ता एवात्र विवक्षिता।

तत्रादो गर्भाधानम्। परमेश्वरप्रीत्यर्थ सङ्कल्पितेनानेन गर्भबीजसस्कार प्रतन्यते। सस्कृतयोर्बीजक्षेत्रयोर्द्वारा जातमपत्य वीर्यवदविकलाङ्ग, बुद्धिमच्चिरायुष्मच्च भवति। एत एव श्वस्तनपौरा राष्ट्रमाभ्युदयिके वर्त्मनि सञ्चालयिष्यन्ति।

गार्भिक - बैजिकदोषपरिहारार्थ पिण्डस्य पुरूपतासिद्ध्यर्थ च पुसवनाख्यस्सस्कारो विहित। धात्रादिदेवताना कृते आज्याहुतीर्हुत्वा यजमान पूर्वमेव न्यग्रोधस्य या प्राच्युदीची वा शाखा ततस्सवृषणा शुङ्गा (फलद्वयसयुत वटाङ्कुर) आनाय्य कुमार्या पेषयित्वा परिप्लाव्यापरेणाग्नि प्राचीमुत्ताना जाया निपात्याङ्गुष्ठेन

दक्षिणे नासिकाछिद्रेऽपि नयति यजुषा, "पुमास जनयति"। पुत्रार्थिनेद कर्मानुष्ठेयम्। वटफलपल्लवरसस्य, उच्चरिताना मन्त्राणा च पिण्डस्य पुस्त्वमानेतु शक्तिरस्तीति वैद्यशास्त्रदृष्ट्याऽद्भुतमेतत्।

प्रथमगर्भस्य चतुर्थे मासीद कर्मानुष्ठीयते सीमन्तोन्नयनाख्य येन गर्भस्थशिशो देहिकमानसिकाभिवृद्धि, भूतराक्षसगणादिभ्यो रक्षा, सम्भावितरोगोपशान्तिश्च साध्यते। कर्मण्यस्मिन् जयादीन् हुत्वा पति पत्नी अपरेणाग्नि प्राचीमुपवेश्य त्रेण्या शलल्या त्रिभिर्दर्भपुञ्जीकैश्शलालुग्लप्सेन च (ऊर्ध्व) सीमन्तमुन्नयति।

गर्भाम्बुपानजनितदोषनिबर्हण आयुर्मेधाभिवृद्धि चाभिलक्ष्य जातमात्रस्य कुमारस्य कृते क्रियमाणमिद जातकर्म। अत्र विनियुज्यमानेषु मन्त्रेषु कुमारे मेधादीनाधातुमिन्द्रादयो देवा प्रार्थ्यन्ते। यजमानोऽत्र कर्मणि सर्षपान्फलीकरणमिश्रानञ्जलिना जुहोति। तेन पिशाचादिभ्य कुमारस्य रक्षा कल्पिता भवति।

जातस्य पुत्रस्य दशमेऽहनि नामकरण विधातव्यम्। कुमारस्य व्यवहारनामसिद्ध्या साक आयुरभिवृद्धिरस्य फलम्। पुरुषाणा समाक्षराणि स्त्रीणाञ्च विषमाक्षराणि नामानि करणीयानि। नदीनक्षत्रादिनामभिस्स्त्रीणा व्यवहारोऽनुचित।

अन्नप्राशनाख्यस्संस्कार (षष्ठे मासि) शिशो मातृगर्भमलप्राशनशुद्ध्यर्थ, अन्नाद्यब्रह्मवर्चसतेज-इन्द्रियायुरभिवृद्ध्यर्थ च क्रियते। पिता दधिमधुघृतमिश्रमोदन समन्त्रक शिशु प्राशयेत्। अत्र केचित् शिशोराजीविकापरीक्षामपि कुर्वन्ति। प्राशनान्ते शिशु भूमावुपवेश्य तदग्रे लेखिनीपुस्तकवस्त्रादीनि वस्तूनि विन्यस्य स्वेच्छया शिशुर्यत्स्पृशेत्सा तस्य जीविकेति विद्यात्। शिशो रुचि ज्ञात्वा बाल्यादेव तस्मिन् कर्मणि यदि स निवेश्यते तदा स विना श्रम नैपुण्यमाप्नोति। इद कर्माधुनिकशिशु-मनोविज्ञानशास्त्रोद्दिष्टेभ्य कर्मभ्य न किञ्चिदपि हीयते।

कुमारस्य जन्मनोऽधि तृतीये वर्षे बलायुर्वर्चोभिवृद्धये चोलाख्यसस्कार उपदिष्ट। त्रेण्या शलल्या त्रिभिर्दर्भपुञ्जीलै शलालुग्लप्सेन च तूष्णी केशान्विनीय यथर्षि यथाकुलधर्म वा क्षुरेण शिखा निदध्यात्।

अनाश्रमिण आश्रमातिशयसम्पादक साङ्गोपाङ्गवेदा-ध्ययनाधिकारप्रद नित्यनैमित्तिककाम्य-कर्मानुष्ठानयोग्यतोपकल्पक अत एव आयुस्तेजोवीर्ययश-श्श्रीपुष्टिकाम्याभिवृद्धिद द्विजातीना क्रमेण अष्टमैकादशद्वादशेषु वर्षेषु विहित सर्वमहान् सस्कारविशेष उपनयनम्। त्रैवर्णिकानामिद द्वितीय जन्म। अनुत्तमस्य सावित्रीमन्त्रस्योपदेश अस्य प्रधानम्। सम्यगुपासितेय सावित्री कल्पलतेव कि कि न साधयति। उपवीती वटुरुपनिन्यते।

"श्रावण्या पौर्णमास्यामध्यायमुपाकृत्य मास प्रदोषेणाधीयीत" इत्यापस्तम्बसूत्रानुसार उपाकर्म विहितम्। प्रजापत्यादीनामावाहन, तर्पण, होम च परिसमाप्य दर्भेष्वासीना दर्भान्धारयमाणा आचार्यप्रमुखा वेदस्यादितश्चतुरोऽवराननुवाकानधीयीरन्। तेन वेदा उपाकृता भवन्ति।

अथ चत्वारि वेदव्रतानि। आदौ प्राजापत्यव्रतम्। अत्र प्राजापत्यादीना षडृषीणामावाहनतर्पणहोमादिक क्रियते। तत सवत्सरे पर्यवेते व्रतस्योत्सर्जनमपि कार्यम्। एवमेव सोमादीनावाह्य सोम्यव्रत, अग्निमावाह्य आग्नेयव्रत, विश्वेदेवानावाह्य वैश्वदेवव्रतञ्चानुष्ठाय एकैकव्रतानुष्ठानादूर्ध्व सवत्सरे पर्यवेते तत्तद्व्रतस्योत्सर्जनमपि कार्यम्। वेदव्रतानुष्ठानेन अधीताना छन्दसा सवीर्यत्व सम्पाद्यते। चतुर्णामेषा तन्त्रेणानुष्ठानमप्यनुज्ञातम्। आयुर्वर्चोबलाभिवृद्धिद्वारा परमेश्वर प्रीणयितु गोदानव्रतमप्यनुष्ठातव्य यत्र केशवाप विहित। वेदाध्ययनानन्तर गृहस्थाश्रम स्वीचिकीर्षु युवा तदाश्रमाधिकारसिद्ध्यर्थ स्नायात्। इद स्नानाङ्ग कर्म समावर्तनमित्यप्याख्यायते।

तदनु पाणिग्रहणाख्यस्संस्कार। योग्यलक्षणलक्षिता कन्या यथाविधि परिणीय गृहस्थाश्रमी भवति। कन्यावरण,

मधुपर्क, कन्यादान, अक्षतारोपण, प्रधानहोम, पाणिग्रहण, वरगृहप्रवेश इत्यादीन्यस्य मुख्याङ्गानि भवन्ति। गृहस्थ श्रौतादिसमस्तकर्मसु लब्धाधिकार, दृष्टप्रज ऋणत्रयविमुक्त सत्यलोके महीयते।

अन्त्येष्टिसस्कार मरणादूर्ध्व अधिकारिणा पुत्रादिना कर्तव्य। अनुष्ठिते चास्मिन्न केवल प्रेतस्य ऊर्ध्वलोकप्रप्तिरपि तु तत्पुत्रादीना ज्ञातीनाञ्च अभ्युदयस्सिध्यति।

ज्ञाताज्ञातधर्मलोपप्रायश्चित्तानि नैमित्तिकप्रायश्चित्तानि च स्मृतिग्रन्थेषु बहुधोक्तानि। तत्र ब्रह्मचर्यव्रतलोपप्रायश्चित्ताख्य कर्म समावर्तनस्यादावनुष्ठीयते। दर्पणदर्शनकामिनी-भाषणादिजनितप्रत्यवायपरिहारायेदमुद्दिष्टम्। उत्पातदर्शनादिष्वपि प्रायश्चित्तानि स्मृतिषु विहितानि। यस्य नक्षत्रे सूर्यचन्द्रोपरागास्सम्भवन्ति तेन प्रतिमादान कर्तव्यमिति स्मृतिसिद्धम्। समुद्रस्नानादे पूर्व विधातव्य कर्मादिक स्मृतिषूपदिष्टम्।

स्मार्तकर्मसु पुण्याहवाचन शिरोरत्नायते। त्रिषु कलशेषु वरुण, वास्तोष्पति, ब्रह्माणञ्चावाह्य सम्पूज्य, दिक्षु मार्जन कृत्वा शान्तिमन्त्रान् वाचयित्वा वेदविद्भ्यो ब्राह्मणेभ्य आशिष ग्राह्या। इद कर्म समस्तानिष्टनिरसनक्षम शुभफलप्रदञ्चेति हेतो आशौचनिवृत्त्यादिषु, शुभकर्मणामादौ चाङ्गत्वेनानुष्ठीयते। कैश्चित् शुभकर्मणामादौ नान्दीमुख (आभ्युदयिकश्राद्ध) अनुष्ठीयते। अस्येतिकर्तव्यताया सन्ति बहवो मतभेदा। जीवत्पितृकेनापि प्रपितामहादीना तृप्तये इदमनुष्ठातव्यमेवेति अभिज्ञा कथयन्ति। विवाहोपनयनादीना-मादौ अङ्कुरारोपण सर्वसम्मतम्। शुचौ स्थण्डिले (पञ्च) पालिकासु "भूमिर्भूम्ने" ति मृत्तिका निक्षिप्य सप्त ग्राम्या आरण्याश्चोषध्य "या जाता" इत्योषधिसूक्तेनाभिमन्त्र्य, उप्त्वा ब्रह्मादिदेवता आवाह्य सम्पूज्य सूत्रेण वेष्टयित्वा यावत्कर्मसमाप्ति गोपायेत्।

आधुनिकविज्ञानशास्त्रसमर्थिता मानवजाते तदितरप्राणिलोकस्यापि हिता बहवोऽशा स्मार्तकर्मसु विद्यन्ते। इहपरसुखसाधनानीमानि कर्माणि। यथाशास्त्र स्मृतिचोदित कर्माचरन् नर पर श्रेय अवाप्नोति। स्मार्तकर्मसु नानुष्ठानश्रमगौरवमपितु फलगौरवमेवास्तीति शम्। ★

SSS -5

# सस्काराणा प्रामुख्यम्

**श्री मरिङ्गण्टि श्रीरङ्गाचार्यः**
हैदराबाद्

सम्मान्यान् जगदाचार्यान् श्रीनिवास जगत्पतिम् ।
वन्दे मान्य सभाध्यक्ष तथान्याश्च सुधीमणीन् ।।

सस्कारशब्द लोके शास्त्रे च विविधेषु अर्थेषु प्रयुज्यमान परिदृश्यते। 'यन्नवे भासने लग्न सस्कारो नान्यथा भवेत्' इत्यत्र सस्कार शब्द नूतनपात्रे आधीयमाने गुणविशेषे प्रयुक्त दृश्यते । 'सस्कारेण यथा हीना वाचमर्थान्तर गताम्' इति रामायणे श्रूयमाण सस्कारशब्द वाचि आधानयोग्य स्वरवर्णमात्राद्युच्चारणादिरूप कञ्चन गुणविशेषमभिधत्ते । 'सस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्चे'ति कालिदास अपि सस्कारशब्देन काञ्चन वाच एव गुणविशेष प्रतिपादयति । सस्कारमात्र जन्य ज्ञान स्मृतिरिति स्मृतिलक्षणे सस्कारशब्देन भावनाख्य कश्चन गुणविशेष विवक्ष्यते । व्रीहीन् प्रोक्षतीति प्रोक्षणादिक्रियाविशेषे सस्कारशब्द मीमासका प्रयुञ्जते ।

मनुगौतमापस्तम्बाश्वलायनबोधायनप्रभृतयस्तु स्मृतिकारा गर्भाधानादीन् सस्कारत्वेन व्यपदिशन्ति । गौतमस्तु पाकयज्ञानपि सस्कारशब्देन व्यवहरति । अतोऽत्र सस्कारशब्देन विवक्षितोऽर्थ क इति विचारे अष्टादश षोडशेति पदसमभिव्याहारात् गृहस्थसूत्रप्रतिपादिता गर्भाधानादय एव सस्कारा ग्राह्या इति निश्चीयते। अन्येषा अष्टादशत्वषोडशत्वादिप्रसिध्देरभावात्। अतश्च गर्भाधानादिसस्कारा तैस्तै गृह्यसूत्रकारै उपदिष्टा एव कीदृशप्रामुख्यशालिन इति अत्र किञ्चिद् विविच्यते। सर्वेषु चैतेषु सस्कारेषु गणेशस्य विष्वक्सेनस्य वा पूजा, पुण्याहवाचन, अभिमन्त्रितजलप्रोक्षण, बान्धवाह्वान ब्राह्मणभोजनम् इत्यादिक च क्रियमाण जनाना वैदिक कर्मश्रद्धा स्पष्टयति। इमे च सस्कारा यैरग्रे वेदविद्या अध्येतव्या तेषा कृते समन्त्रका विधीयन्ते, अन्येषा तु कृते अमन्त्रका एव । समन्त्रकसस्कारसस्कृतो हि पुरुष धर्मस्य अनुष्ठाने वेदस्य अध्ययने च अवश्यकी शक्तिमाप्न तु प्रभवति इति धारणा महर्षीणाम्। 'धर्मो रक्षति रक्षित' इति सूक्ति बहुमन्यमाना भारतीया परमर्षय धर्ममूलस्य सकलस्य वेदस्य सरक्षणे अत्यन्तमेव बद्धश्रद्धा अवलोक्यन्ते। अनुष्ठान द्वारा हि धर्मस्य, अध्ययनद्वारा च वेदस्य सरक्षण कर्तु शक्यते नान्यथा इति तेषा प्रगाढो विश्वास परिलसति। अदृश्यमानफलकस्य धर्मस्य अनुष्ठान न जातमात्रेण जन्तुना सस्कार हीनेन कर्तु शक्यते, नापि

असस्कृत पुरुष अध्ययनेन स्वाध्याय सम्पादयितु शक्न ोति। अतश्च सुदूरदर्शिनस्ते महर्षय पञ्चमाहुतेरेव प्रभृति पुरुष सस्कर्तु प्रयत्नशीला बभूवुरिति सुस्पष्टमवगम्यते। अत एव गोतमादय स्मृतिकारा बहूनेव सस्कारान् ब्राह्मणस्य कर्तव्यत्वेनोपदिशन्ति। न केवल चत्वारिशत्सस्कारविधानेन सन्तुष्टो भवति महर्षि र्गोतम अपि तु आत्मगुणा अपि अष्टा अवश्यमेव सम्पादनीया इति समादिशति। वैखानसगृह्यसूत्रेषु अष्टादश सस्कारा खलु आम्नायन्ते। आश्वलायनबोधायनादयोऽपि गृह्यसूत्रेषु स्वीयेषु सस्काराणामावश्यकता प्रबोधयन्ति। सस्काराणा कर्तव्याना सख्यामात्रभेद एव परिदृश्यते स्मृतिग्रन्थेषु, न तु तेषा कर्तव्यत्वे कस्यापि स्मृतिकारस्य महर्षेर्विप्रतिपत्ति ।

**"वैदिकै कर्मभि पुण्यैर्निषेकादिर्द्विजन्मनाम् ।**
**कार्यश्शरीरसस्कार पावन प्रेत्य चेह च"** ।।

इति उपदिशन् मनुरपि निषेकादिश्मशानान्तसस्कार द्विजस्य अवर्जनीय इति अभिप्रेति। एव नाम प्राग्–जन्मन एव धर्मरक्षण–वेदशिक्षण–नेपुणीसम्पादनाय पुरुष विविधै सस्कारैर्नितरा अनुबध्यते। तदैव च स धर्मानुष्ठानदक्ष वेदरक्षादीक्ष च ब्राह्मणत्वमपि समश्नुते धर्मश्च रक्षितो भवति। "ब्राह्मणत्वस्य हि रक्षणे रक्षित स्यात् वदिको धर्म" इति परमपूज्या शङ्करभगवत्पादा अपि स्वीयगीताभाष्ये उद्घोषयन्ति। एव च सस्कारा ब्राह्मणत्वसम्पादनद्वारा सकललोकश्रेयस्सधायकस्य धर्मस्य तन्मूलवेदस्य च सरक्षणे सुबहु उपकुर्वन्तीति अनन्यसाधारणी महत्ता सस्काराणाम् अभ्युपगन्तव्यताकोटिमाटीकते।

सस्कारो हि नाम विहितक्रियाजन्य कार्यान्तरयोग्यता सम्पादक कश्चन अतिशयविशेष इति वीरमित्रोदयीय निर्वचनम्। प्रोक्षणादिर्हि सस्कार व्रीह्यादीना क्रियमाण तन्निष्पाद्यपुरोडाशादे यागरूपकार्यान्तरयोग्यतामापादयति। एवमेव शास्त्रोपदिष्टा गर्भाधानादि सस्कारा पुरुषस्य अध्ययनादिरूपकार्यान्तरयोग्यतासम्पादका सन्दृश्यन्ते। प्रोक्षणादयो व्रीह्यादिद्रव्यनिष्ठा सस्कारा गर्भाधानादयस्तु शरीरात्मान्यतरनिष्ठा इति विशेष। सस्कारशब्द अतिशयविशेषे तज्जनकक्रियाविशेषे च प्रयुज्यमानो दृश्यत इत्यन्यदेतत् ।

अथ च अत्र गर्भाधानादय प्रसिद्धा कतिचन सस्कारा कथ वा धर्मरक्षाया वेदशिक्षायाश्च उपयुक्ता भवन्तीति किञ्चिदिव समीक्ष्यन्ते। 'पञ्चम्यामाहुतो आप पुरुषवचसो भवन्ति' इति पञ्चाग्नि विद्याप्रस्तोति । योषिदेव तत्र पञ्चमाग्नित्वेन परिगण्यते। तत्र पुरुषेण रेतोद्वारा यद् बीजस्थापन क्रियते तदेतत् गर्भाधानमिति व्यपदिश्यते। यद्यपि सामान्यमेतत् पशुभिर्नराणा तथापि वैदिकमन्त्रसहकारेण क्रियमाणोऽय क्रियाविशेष तत्र जायमान पुरुष जन्तुभ्यो व्यावर्तयति। गर्भाधानस्याकरणात् अस्या जातस्तु दुष्यतीत्यादीनि स्मृतिवचनानि जायमानस्य पुरुषस्याय सस्कार इति ज्ञापयन्ति । "निषेकाद्या श्मशानान्ता तेषा वै मन्त्रत क्रिया" इति याज्ञवल्क्य । "निषेकादि श्मशानान्त मन्त्रैर्यस्योदितो विधि" इति मनुरपि निषेकस्य गर्भ सस्कारत्वमेव अभिप्रैति। "विष्णुर्योनि जपेत् सूक्त योनि स्पृष्ट्वा त्रिभिर्व्रती" इत्यादिना च क्षेत्रस्यैवाय सस्कार इति ज्ञायत इत्यपि केचन बोधयन्ति। 'बैजिक गार्भिक चेन द्विजानामपमृज्यते' इत्यादिमनुवचन अनेन सस्कारेण गर्भसम्बन्धिपापपरिहारमपि प्रतिपादयति। अय च सस्कार प्रथमगर्भधारणसमये एकवारमेवोपदिश्यते। एकवार क्षेत्रस्य सस्कृतत्वात् तत्र जायमाना सर्वेऽपि शुद्धिशालिन एवेति तेषामभिप्राय। सर्वथा च अस्य सस्कारस्य वेदविद्याधारणक्षमस्य उत्पत्तावेव तात्पर्य विभाव्यते ।

सर्वेषामपि सस्काराणा शुभनक्षत्र शुभतिथ्यादिक परीक्ष्य कर्तव्यत्वमुद्घोष्यते। विशिष्याय गर्भाधानाख्य सस्कार रात्रावेव कर्तव्यत्वेनोपदिश्यते। दिवा तु निषिध्यते। "प्राणा वा एते स्कन्दन्ति ये दिवा रात्या सयुज्यन्ते। ब्रह्मचर्यमेव तद् यद्रात्रो रत्या सयुज्यन्ते" इति प्रश्नोपनिषदि श्रूयते। एवमेवाल्पभाग्या अल्पवीर्याश्च दिवा प्रसूयन्ते अल्पायुषश्चेति दिवा रति रत्यन्तामेव निन्द्यते। उपेयान्मध्यरात्रान्ते"

इत्याश्वलायनः रात्रावपि समय निर्देश करोति। एवमेव ऋतुकालाभिगमनमेव अनुमन्यते स्मृतिकारैः। इद ऋतुकालाभिगमनमपि एकपुत्रोत्पत्तिपर्यन्तमेव शास्त्रेण विधीयते। 'दशास्या पुत्रानाधेहीति वचन तु प्रशसार्थ-मिति मुनीना हृदयम्–

**ऋतुकालाभिगामी स्यात् यावत् पुत्रोऽभिजायते ।**
**दशास्या पुत्रानाधेहि प्रशसार्था श्रुतिः स्मृता ।।**

इति । मनुरपि वदति यत्–'ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः। स एव धर्मजः पुत्रः कामजानितरान् विदुः' इति। एवमय सस्कारः सर्वैरपि स्मृतिकारै – रवश्यकर्तव्यतया समुपदिष्टः धर्मप्रजासम्पत्त्यर्थमेवेति सस्कारस्यास्य धर्ममूलवेदसरक्षणमेव पार्यन्तिक प्रयोजनमित्यवगम्यते। अन्यथा सर्वसाधारणत्वेन नियमविधानवैयर्थ्यात्।

अथ पुसवनाख्यस्सस्कारः स्मृतिकारैरुपदिश्यते। गर्भधारणानन्तर क्रियमाणोऽय सस्कारः वेदरक्षणार्थ पुरुषाणामेवाधिकारिणाम् उत्पत्तेरभिमतत्व प्रकटयति। 'पुमान् प्रसूयते येन तत् पुसवनमीरितम्' इति पुसवन निरुच्यते च । स्त्रीणामुत्पत्तिरेतावता अनभिमता सूत्रकाराणामिति न मन्तव्यम्। पुरुषाणामुत्पत्तये धर्माचरणसहयोग॰ ' च तासाम् अत्यावश्यकता परमपूज्यता च स्मर्यते।

**"पुमास पुत्र जनय त पुमाननु जायताम् ।**
**भवासि पुत्राणा माता जाताना जनयाश्च यान्" ।।**

इत्यादिकमथर्ववेदादौ श्रूयते च। अय च सस्कारः "गर्भाधानम् ऋतौ पुसः सवन स्पन्दनात्पुरा" इत्यादिना गर्भपरिस्पन्दनात् प्रागेव कर्तव्य इति याज्ञवल्क्यः प्रतिपादयति। शाङ्खादयस्तु– "सवन स्पन्दिते शिशा"विति बोधयन्ति। वटवृक्षत्वगादिरस गर्भिण्याः स्त्रियो दक्षिणे नासा रन्ध्रे प्रवेशः अस्मिन् सस्कारकर्मणि प्रामुख्यमावहति। मन्त्रोच्चारणपूर्वक प्रवेश्यमानोऽय रसः गर्भकालीन-सकलक्लेशनिवारणायापि प्रभवतीति आयुर्वेदाभिज्ञाना समयोऽपि जागर्ति। "लब्धगर्भायाः सुलक्ष्मणा वटशुङ्गसहदेवी विश्वदेवानामन्यतम क्षीरेणा भिघुष्य त्रीश्चतुरो वा बिन्दून् दद्याद् दक्षिणे नासापुटे पुत्रकामायै न च ता न्निष्ठीवेत्" इति आयुर्वेदीया प्रक्रिया। अनेन च सस्कारेण वीरस्य धार्मिकस्य च पुत्रस्य प्राप्तिराशास्यत इति अयमपि सस्कारः वेदरक्षणकामनाद्रढिमानमस्मत्परमर्षीणा प्रकाशयति।

सीमन्तोन्नयन गर्भस्य तृतीयस्सस्कार आख्यायते । सीमन्त उन्नीयते यस्मिन् कर्मणि तत्कर्म सीमन्तोन्नयन-मिति वीरमित्रोदयः उद्बोधयति। आश्वलायनः आदिशति यत् –

**पत्न्याः प्रथमज गर्भमत्तुकामाः सुदुर्भगाः ।**
**आयान्ति काश्चित् राक्षस्यः रुधिराशनतत्पराः ।।**
**तासा निरसनार्थाय श्रियमावाहयेत्पतिः ।**
**सीमन्तकरणी लक्ष्मीस्तामावहति मन्त्रतः ।।**

इति । षष्ठेऽष्टमे वा सीमन्त इति याज्ञवल्क्यः अस्य सस्कारस्य समय निर्दिशति। केचित् गर्भसस्कारोऽय-मित्येव मन्वाना प्रतिगर्भमेन सस्कार विदधतिः। अन्ये तु क्षेत्रसस्कार एवायमित्याचक्षाणाः सकृत्कर्तव्यतामुपदिशन्ति। सर्वथा गर्भकालीनक्लेशवारणार्थोऽपि सस्कारः अय अवश्यमनुष्ठेयः, स्त्री यद्यकृतसीमन्ता प्रसूयते कदाचन 'गृहीतपुत्रा विधिवत् पुनस्सस्कारमर्हति' इति स्मृतिकारा अस्य अवश्यकर्तव्यतामामनन्ति । केशसवरणाद्यनन्तर मन्त्रोच्चारणपूर्वक औदुम्बरादिशाखिकाः गर्भिण्याः कण्ठे बन्धनीया इति च ज्ञायते। "अयमूर्जस्वितो वृक्षः ऊर्जेव फलिनी भव" इति बहुपुत्रवत्ता कामयन्ते स्म । जीवपत्नीत्व वीरप्रजावत्त्व च अस्मिन् कर्मणि आशास्यमानमस्यापि सस्कारस्य उत्पत्स्यमान पुत्रस्य वेदरक्षा दक्षत्व कामनामेव खलु प्रकाशयति ।

पुत्रजननानन्तर क्रियमाणः प्रथमसस्कारः जातकर्माख्यः। "प्राक् नाभिवर्धनात् पुसः जातकर्म विधीयते" इत्यादिना नाभिवर्धनात्पूर्वमेवाय सस्कारः कर्तव्यत्वेनोपदिश्यते । किन्तु तत्र त्र आशौचानन्तर क्रियमाणः दृश्यते ।

'मन्दत प्राशन चास्य हिरण्यमधुसर्पिषा' मिति स्मृतिवचनमनुसृत्य जातस्य कुमारस्य मुखे सुवर्णादिशलाकाद्वारा मधुघृतादे द्वित्रबिन्दून् प्रक्षिपन्ति स्म। पुत्रमुखा दर्शनेन पुरुष पितृण विमुक्तो भवतीति पितृणा सन्तोषाय तदा नान्दीश्राद्धमपि कर्तव्यत्वेन उपदिश्यते।

**"जात कुमार स्व दृष्ट्वा स्नात्वानीय गुरून् पिता ।**
**नान्दीश्राद्धावसानेतु जातकर्म समाचरेत् ।।"**

इत्यामनन्ति ग्रन्थकारा । अय सस्कार शिशो आयुष्यारोग्यमेधाबलवर्धक इति विज्ञायते, अतोऽयमपि वेदसरक्षणार्थ इत्यङ्गीकर्तव्य एव ।

अथ नामकरणाख्यसस्कार पञ्चम । नामकरण बृहस्पतिना बहु प्रशस्यते इति वीरमित्रोदये अय श्लोक उद्धृत –

**नामाखिलस्य व्यवहारहेतु**
**शुभावह कर्मसु भाग्यहेतु ।**
**नाम्नैव कीर्ति लभते मनुष्य**
**तत प्रशस्त खलु नामकर्म ।।**

**द्वादशाहे दशाहे वा जन्मतोऽपि त्रयोदशे ।**
**षोडशैकोनविंशे वा द्वात्रिंशे वर्णत क्रमात् ।**

इति श्लोकेन विप्रस्य द्वादशेऽहनि नामकरण दशमेऽहनि वा कर्तव्यमिति ज्ञायते। नामापि इष्टदेवताया स्ववशीयाना पूर्वजाना वा धर्मश्रद्धावर्धक कर्तव्यमिति सम्प्रदाय। मासनाम नक्षत्रनामापि व्यवहारनाम वदवश्यमेव क्रियते स्म । अयमपि सस्कार धर्मश्रद्धालुता जातस्य आशस्ते ।

अनन्तर अन्नप्राशनसस्कारमुपदिशन्ति स्मृतिकारा । अन्नप्राशन यद्यपि प्राणिमात्रस्य जीवनानुकूलमिति अविधीयमानमपि अनुष्ठीयते तथापि धर्मश्रद्धालुभि-र्महर्षिभिरन्नप्राशनस्यापि प्रथम क्रियमाणस्य पुरुषे अतिशयविशेषाधायकत्वम् अनुमन्यते। जातस्य शिशो षष्ठे मासे जातेषु दन्तेषु वा कर्तव्यमिति ते अभिप्रयन्ति। केचित्तु –

**"जन्मतो मासि षष्ठे वा सौरेणोत्तममन्नदम् ।**
**तद्भावेऽष्टमे मासे नवमे दशमेऽपि वा ।**
**द्वादशे वापि कुर्वीत प्रथमान्नाशन परम्" ।।**

इत्युपदिशन्ति । अन्नग्रहणपचनादिक्षमता शिशो किल दन्तोद्भेदात्प्रभृति सभाव्यते । अत एव आयुर्वेदविद्वास षण्मास च एतमन्न प्राशयेल्लघु हित च' इति वदन्ति। 'मध्वाज्यकनकोपेत प्राशयेत् पायस तु तम्' इति स्मृतिकारा पायसान्नेन मध्वाज्यादिसम्भृतेन प्राथमिकी प्राशनक्रिया प्रारभेत' इति आदिशन्ति । देवी वाचमजनयन्त देवा इत्यादिमन्त्रा अस्मिन् सस्कारविशेषे विनियुज्यन्ते । यागार्हपवित्रता पायसान्ने यथा स्यात् तथा पाक क्रियते स्म । शिशो सर्वेन्द्रियसतृप्तये सुखमयजीवनाय च सस्कारकर्मणि अस्मिन् देवताप्रार्थनादिकमपि स्मृतिकारै-रुपदिष्टम्। स्तन्यपानविस्मारणद्वारा बालकस्य पुष्टिकरा हारप्रदाने माता प्रवर्तते स्म । एवममुमपि सस्कार शिशोर्धार्मिकत्वमपेक्षमाणा एव कुर्वन्त आसन्निति स्पष्टमवलोक्यते। अतोऽयमपि सस्कार अस्मत्परमर्षीणा धर्ममूलवेदसरक्षणवेयग्री विशदयति ।

अनन्तरश्च शिशोश्चोलाख्यस्सस्कार यस्मिन् तत्तत्कुलधर्मानुसारेण चूडाकरण सम्पद्यते ।

**'तृतीये पञ्चमे वाब्दे चौलकर्म प्रशस्यते ।**
**प्राग्वाऽसमे सप्तमे वा सहोपनयनेन वा ।।'**

आश्वलायनादय स्मृतिकारा अस्य समय निर्दिशन्ति यथाकुलधर्म केशवेशान् धारयेदित्यापस्तम्ब चूडाकरणे कुलधर्मानुसरण विदधाति । 'विशिखो व्युपवीतश्च यत् करोति न तत् कृतम्' इति देवल शिखारहितेन कृतस्य कर्मण निष्फलत्व घोषयति। अत्रिकश्यपवशजा शिखाद्वयशालिन अङ्गीरसा पञ्चशिखा वासिष्ठास्तु एकशिखाशालिन आसन्निति स्मरन्ति ग्रन्थकारा। 'आयुषे अन्नाद्याय प्रजयनाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय' इत्यादिमन्त्रोच्चारणपूर्वक वपन कुर्वन्ति स्म । वाय्वादित्यादि देवताश्च अस्मिन् सस्कारकर्मणि शिशोस्सरक्षणाय प्रार्थ्यन्ते

स्म । अस्मिन् कर्मणि विनियुज्यमानैर्मन्त्रैरिद स्पष्ट भवति यत् इद चूडाकर्म कुमारस्य दीर्घायुष्यसम्पादकम् इति। तदपि वेदरक्षार्थमित्यास्ताम् नाम ।

अथोपनयनसस्कार अद्यापि यावत् सुप्रसिद्ध अनेन सस्कारेण सस्कृतस्यैव स्वाध्यायाध्ययनयोग्यता सम्पद्यते । अयमपि सस्कार वेदानामध्ययनार्थमेव क्रियते । अत अस्य सस्कारस्य वेदसरक्षणाकाङ्क्षा-प्रकाशकत्वमव्याहत विजृम्भते। उप समीपे आचार्यादीना, वटोर्नयन प्रापणम् उपनयनमिति ग्रन्थकारा आमनन्ति । 'उपनयन विद्यार्थस्य श्रुतित सस्कार' इति आपस्ताम्बादय विशदयन्ति।

'उपनीय गुरु शिष्य महाव्याहृतिपूर्वकम् । वेद मध्यापयेदेन शोचाचाराश्च शिक्षये दिति याज्ञवल्क्यादय उपदिशन्ति । विस्तीर्णविषयशाली विख्यातश्चाय सस्कार वेदरक्षैकदीक्षाशालिना अस्मत्परमर्षीणा प्रख्यापयत्ये वेति नात्यन्तम् अत्र प्रपञ्च्यते। एवमेव च वेदव्रतचतुष्टय, गोदान, समावर्तन चेति अद्यापि प्रसिद्धा षट् सस्कारा वेदशास्त्रश्रद्धारक्षादिक प्रकाशयन्ति। विवाहविधिरपि पञ्चदश स्सस्कार स्वाध्यायसरक्षण द्वारा धर्मानुष्ठान च प्रधान प्रयोजन प्रकाशयति । अथ च अन्तिम षोडशोऽपि सस्कार वैदिकमन्त्रविनियोगपूर्वक क्रियमाण धर्मश्रद्धाभिव्यञ्जने नितरा निपुण एव । अत सस्कारेण इम लोकमभिजयति मृतसस्कारेणामु लोकमिति बोधायनादय उपदिशन्ति।

एवमेते षोडश सस्कारा एव न अपि तु निष्क्रमण कर्णवेधाक्षराभ्यासादय तत्र तत्र स्मर्यमाणा क्रियमाणाश्च बहव दूरदर्शिना महर्षीणा वेदसरक्षणदीक्षामेव सम्यक् प्रकाशयन्ति । रक्षिते हि एतादृशसस्कारसम्पाद्यमाने ब्राह्मणत्वे रक्षितो भवति वैदिको धर्म । धर्मश्च यदि रक्षित तर्हि सोऽपि अस्मान् रक्षति। एव विश्वस्य जगत सुप्रतिष्ठा सुखमयस्थितिश्च सम्पद्यते। अत विश्वस्य श्रेय प्रेयस्सन्धाने सस्कारा महदुपकुर्वन्ती ति प्रामुख्य सस्काराणा परिभावनीयम् । ■

SSS - 6

# स्मार्तकर्मणां प्राशस्त्यं–तत्प्रचारोपायाश्च

**डा. कोम्पेल्ल रामसूर्यनारायणः**
राजमहेन्द्रवरम्

श्रौतस्मार्तभेदेन वैदिककर्माणि द्विविधानि भवन्ति। तत्र साक्षाद्वेदविहितानि अग्न्याधानसोमयागादीनि श्रौतानि कर्माणि। गृह्यसूत्रेषु स्मृत्यादिषु च आपस्तम्बाश्वलायन बोधायनप्रभृतिभिरु पनिबद्धानि कर्माणि स्मार्तानीत्युच्यन्ते। यथा– सन्ध्यावन्दनम्, अग्निकार्यम्, षोडशसस्कारा इत्येवमादीनि। तत्र षोडशसस्कारेषु कतिपयान् प्राधान्येनाश्रित्य स्मार्तकर्मणा प्राशस्त्य तत्परिरक्षणप्रचारणमार्गाश्चात्र विशदीक्रियन्ते।

गर्भाधान पुसवन सीमन्तो जातकर्म च।
नामान्नप्राशने चौल मौञ्जी व्रतचतुष्टयम्।
गोदानाख्य स्नातक च विवाह पैतृमेधिकम्।
एते षोडश सस्कारा ।

कर्मभिरेतैरनेकप्रयोजनानि सिध्यन्ति । प्राणिजीविते विविधा दशा आयान्ति यान्ति च। तत्तद्दशासु बहूनि कर्माणि कर्तव्यानि भवन्ति। विशिष्य मानवजीविते आगच्छन्ति च कर्तव्यानि कर्माणि मानवजीवनस्य समाजगमनस्य च साफल्य वैफल्य वा निर्णयन्ति। तानि साधुमार्गेण उचितसमये समग्रतया अनुष्ठितानि चेत् मानवजीवित समाजगमन च सुपरिपुष्ट सम्पदुन्मुख च भविष्यति। पशवोऽपि स्वावयवान् सन्तुष्टीकर्तुमभ्यवहारादिकर्मसु प्रवर्तन्त एव। आवश्यकतैव तानि तानि कर्माणि कारयति खलु । क्षुधैव भोजयति, मनोज एव कान्तया समागमयति। परन्तु पशूना प्रवृत्तित बुद्धिजीविना मानवाना प्रवृत्त्या विलक्षणया समाजश्रेयस्सम्पादिकया परमार्थप्रापिकया च भवितव्यम्।अतस्तादृशी प्रवृत्तिर्महर्षिभि रुपदिष्टा। अवश्यक्रियमाणेष्वेव कर्मसु विशृङ्खलाचरण प्रतिबन्धाय बहुप्रयोजनसाधनाय च महर्षयष्षोडश सस्कारव्यवस्थामकार्षु।

भारतीयाना जीवनविधाने महर्षिभिरुपदिष्टे रहस्यमेतत् यत् न ह्येकमपि तादृश कर्म तैरुपदिष्टमस्ति यत् सर्वतोमुखप्रयोजन न साधयति।तत्र पारमार्थिकप्रयोजन तु न विचारणीयपदवीमधिगच्छति। तस्य अस्ति नास्तीति परीक्षितुम् अशक्यत्वात्। ऋषिवचनान्येव तत्र प्रमाणम्।

व्यक्तिगतभौतिकप्रयोजनेषु परिशीलितेषु सत्सु प्रतिसस्कार तादृशप्रयोजनमस्त्येव यथा गर्भाधानम्। सस्कारोऽय जनिष्यमाणस्य शिशोरेव । सस्कारेणानेन जनिष्यमाणस्य शिशो मातृगर्भे अन्नमयकोश उत्पद्यते।

अपि चानेन कर्मणा मन्त्रपूर्वकम् अनुष्ठीयमानेन दम्पत्योर्मानसिकी स्थितिश्शुद्धा भवति। एतत्कर्मविषये धर्मबुद्धिरुत्पद्यते । धर्मबुद्ध्या शुद्धचित्तेन चास्मिन् कर्मणि प्रवृत्तौ जायमानाया जनिष्यमाण शिशुर्धर्मादिगुणोत्तरो भविष्यति।

यथाकाल यथाशास्त्र चानुष्ठीयमानेन पुसुवनसस्कारेण गर्भस्थ शिशो पुरूपप्राप्तिर्भविष्यति। सीमन्त – सीमन्तोन्नयन प्रथमे गर्भे चतुर्थे मासीत्यापस्तम्ब । एतदारभ्यान्तर्वत्नी सुमानि धृत्वा तत्परिमलमाजिघ्रन्ती मनोहरनादान् शृण्वन्ती, मनोहरारामासीमसु सञ्चरन्ती नित्यसन्तुष्टा भवेत्। भाग्यलक्षणोपेतान् पुत्रान् जनयेयमिति सङ्कल्पेत । कठिनवार्ता नाकर्णयेत्। भारभूता क्रिया न कुर्वीत। भयङ्कररूपाणि न पश्येत्। एतादृशविषयेषु अप्रमत्ततामन्तर्वत्न्या ज्ञापयत्यय सस्कार। सर्वमेतत् मातुरारोग्यादिक रक्षत् गर्भस्थशिशोरारोग्यादिक सम्पादयिष्यति। एव सर्वेष्वपि सस्कारेषु भोतिक प्रयोजन वर्तत एव। उपनयनविषये तु विशष्य किञ्चित्वक्ततव्यमस्ति ।

**उपनयनप्रयोजनानि –**

उपनयन विद्यार्थस्य श्रुतितस्सस्कार इत्याप स्तम्बवचनम्। विद्यार्थस्येत्युक्तत्वात् वेदाध्ययनाधि कारसिद्धिरेव उपनयनस्य प्रमुख प्रयोजनम्। जायमानो वै ब्राह्मण त्रिभिर् ऋणवान् जायते, ब्रह्मचर्येण ऋषिभ्य, यज्ञेन देवेभ्य, प्रजया पितृभ्य इति हि श्रुति। वेदाध्ययनेन पुमान् ऋष्यृणविमुक्तो भवति । अत ऋणविमोचनाय पुस उपनयनमर्हता सम्पादयति । अपि च अग्निकार्य सन्ध्यावन्दनादिकमुपनयने वटोरुपदिष्ट भवति । न गायत्र्या परो मन्त्र इति कीर्तितस्य गायत्रीमहामन्त्रस्य उपदेश अत्रैव भवति । सम्यगनुष्ठीयमानैश्च एतैरग्नि कार्यादिभिरायुर्यशश्श्रीमेधादिप्रभूतप्रयोजनानि सिध्यन्तीति सार्वभौममेतत् ।

अपि च ब्रह्मचर्ये अनेके नियमा पालनीया भवन्ति। अग्नीन्धनभैक्षचरणे, सन्ध्योपासन, गुरुशुश्रूषा च अवश्यकर्तव्यत्वेन उपदिष्टानि। मधुमासगन्धमाल्यादिसेवन च निषिद्धम्। क्षारलवणरहित च भोजन विहितम्। एतेषा पालनेन ग्रहणधारणपाटव, चित्तैकाग्रता, जितेन्द्रियता इत्येवमादीनि अनेकप्रयोजनानि वेयक्तिकानि सिध्यन्ति।

**उपनयनसमय –**

ब्राह्मणस्योपनयनसमय गर्भाष्टमवर्ष इति निर्णीत । "आषोडशात् ब्राह्मणस्य सावित्री नातिवर्तते" इत्युक्ते षोडशवर्ष उपनयनस्य गोण काल इति स्पष्टमवगम्यते। कामनाभेदेन अष्टमवर्षत आरभ्य षोडशवर्षत प्रागपि तत्तद्वत्सरेषु उपनयन विहितम्। इदमत्र तत्त्वम्। अष्टमवर्षत प्राक् उपदेशस्वीकाराय बालो नार्हति बुद्धेरपरिणतत्वात्। षोडशवर्षत अनन्तर च बुद्धे परिणतत्वात् बुद्धिजीविन मनुष्यस्य स्वतन्त्राभिप्राया उत्पत्स्यन्ते । ते च अवश्य- मुदात्ता सस्कारपूर्णा एव भविष्यन्तीति न कोपि वक्तु शक्नोति। आहारविहारादिषु षोडशवर्षत अनन्तर स्वातन्त्र्यमवलम्बते जन । तदानी दुष्पथप्रवृत्तस्य स्वातन्त्र्य दुर्वार भविष्यति। अत उत्तमपोर निर्मातुमवश्यस्वीकरणीया अप्रमत्तता अष्टमवर्षषोडशवर्षयोर्मध्यकाल एव स्वीकरणीया। बालवृक्षावस्थाया यो न नमति स न नस्यति महावृक्षावस्थायाम्। एतत् सर्वम् आलोच्यैव स समय उपनयनसमयतया निर्णीत इति च सार्वलोकिकमेतत् । अपि च वेषभाषाविहारादिषु विहिताना नियमानाम्परिपालनेन क्रमशिक्षणायुत जीवनविधानमभ्यस्त भविष्यति। अतो जीविते आपतत कायमनक्लेशान् सोढु समर्थो भवति जन । एव चाय सस्कार जीविन अनेकभौतिकप्रयोजनानि वैयक्तिकानि साधयतीति निश्चप्रचम् ।

**साङ्घिकप्रयोजनम्–**

अपि चोपनयनसस्कार विनयसम्पन्नान्, शीलसम्पन्नान् कायमनक्लेशादीन् सोढु समर्थान्, विद्यावतश्च मनुष्यान् निर्माय सुसम्पन्नसमाजनिर्माणाय उपकरोतीति न विस्मरणीयम्। समाज यद्येतादृशव्यक्तिभूयिष्ठो भवति तर्हि आतङ्कवादस्य दौर्जन्यवादस्य वा क्वावकाश ?

अपि चेदमत्र रहस्यमाश्चर्यावहम् यदिदानीन्तनै राजनीतिज्ञैरनेकै प्रयत्नै कण्ठघोष घोषयित्वा च साधयितुमिष्यते देशस्यैकसूत्रबद्धत्वम् । रक्षितु चेष्यते यदखण्डत्व त् महर्षिभिरनायासेन साधितपूर्वम् इति। तद्यथा-सर्वोऽपि गर्भाधानप्रभृतिप्रेतशरीरदहनादिपर्यन्त कर्म आचरत्येव । सर्वोऽपि विवाहादिक च करोत्येव। सर्वोऽपि स्वपुत्रमध्यापयत्येव पुत्रादीना विवाहादिक च करोत्येव। परन्तु भिन्नसमयेषु भिन्नप्रकारै । एव स्थिते तत्तत्सस्काराणा मनुष्ठानसमयमाचरणीयविधानमुपयोक्तव्य- मन्त्रान् करणीयक्रियाकलापादिक च निर्दिश्य देशस्येकसूत्रबद्धता साधयामासु । अपि चास्मिन् देशे आसेतुशीतनगपर्यन्त यद्येते सस्कारा ऋष्युपदेशानुसारेण अनुष्ठीयन्ते तदा सर्वेषा पौराणाम्मध्ये भावैक्य साधित सत् देशस्याखण्डता रक्षिता भविष्यति इत्यत्र नास्ति सन्देहलेशस्याप्यवकाश ।

**कर्मणा प्रचारावश्यकता -**

यतोऽनेकविधप्रयाजनवन्त्येतानि कर्माणि तत प्रचारणीयानि। सर्वस्यापि जनस्य स्वीयसस्कृते परिरक्षण मातृरक्षणवत् कर्तव्यम्। वस्तुत एते सस्कारा देशीयसस्कृते दर्पणायन्ते। परन्तु इदानीन्तनसमाजे एते लुप्तप्राया इव दृश्यन्त एव। अस्या स्थिते कारणानि परिशीलनीयानि। एता नि च तत्र कारणतया उह्यन्ते-तानि च 1) प्रयोजनज्ञानाभाव 2) कर्मज्ञानाभाव 3) व्ययभारभीति 4) अध्ययनावकाशाभाव 5) पाश्चात्यनागरकताव्यामोहश्च।

**1 प्रयोजनज्ञानाभाव -**

सर्वोऽपि जन प्रयाजनापेक्षयैव तत्तत्कर्मसु प्रवर्तते। न हि केवलपारमार्थिकप्रयोजन ज्ञात्वा प्रवर्तते। अत कर्मणा भौतिकानि दृष्टप्रयोजनानि च बोधयित्वा लोके कर्मश्रद्धा जननीया । तानि चात्र दिङ्मात्र प्राक् प्रदर्शितान्येव। प्रयोजनाभावभ्रमोऽपि तत्र कारणम् । अनुष्ठितेऽपि कर्मणि तदुपदिष्ट फल नोत्पन्नमत कर्मैतत् निरर्थकमिति केचित् भ्राम्यन्ति। फलानिष्पत्ता कारणानि च बहूनि वर्तन्ते। समग्रतया अननुष्ठानमेव तत्र प्रथम कारणम्। पुसवने न्यग्रोधशुङ्गाया उभयत फलाया नासिकास्रोतस्यासिञ्चन कर्तव्यम्। तस्य अकरणे फल कथमुत्पत्स्यते? अपि च क्रियमाणकर्ममात्रोपयोगिमन्त्रजाताध्ययनपुरस्सर तत्तत्कर्म अनुष्ठेयम्। इदानीन्तनकाले पुरोहिता एव मन्त्रान् पठन्ति। तै पठितैर्मन्त्रैर्यजमानस्य प्रयोजनसिद्धि कथ भविष्यति? इदमतीव खेदकरम्। विवाहे "गृभ्णामि ते सुप्रजास्त्वाय हस्त मया पत्या" इति मन्त्र अस्ति। पुरोहिता एत मन्त्र पठन्ति। तदा अस्मच्छब्दार्थ को वा भविष्यतीति विचारयन्तु सुधिय । अत समग्रतया शास्त्रविहितविधानेन कर्माणि अनुष्ठाय फलानि प्राप्नुवन्तु। कर्माणि निरर्थकानीति तु न भ्रमितव्यम्।

**2 कर्मज्ञानाभाव -**

केचिच्च प्रयोजनान्यपेक्षन्ते। किन्तु तानि साधयितु वैदिककर्माणि सन्तीत्यपि न जानन्ति।

**3 व्ययभारभीति -**

केचिच्च कर्मादिक जानन्तोऽपि अधिकधनव्ययो भविष्यतीति भीत्या तत्र समये न प्रवर्तन्ते । उत्सवप्रधानतया कर्मानुष्ठानस्य आवश्यकता नास्ति। परन्तु मानुषाणा-मुत्सवप्रियत्वात् उत्सवत्वेन निर्वोढुमासक्ता धनाभावेन उपनयनादिसस्कारान् मुख्यसमये न कुर्वन्ति।

**4 अध्ययनावकाशाभाव -**

बालक उपनीत । चतुर्षु दिवसेषु पुरोहित आगत्य सन्ध्यावन्दनाग्निकार्यादिक वटुना अनुष्ठापयति। तदनन्तर वटो सन्ध्यावन्दनादिकमध्येतुमवकाशो न दृश्यते। इदानीन्तनकाले दशाना ग्रामाणा कृते एकोऽपि पुरोहित नास्ति। किमु वक्तव्यमधीतवेदाना विषये। अपि च पुरोहितादीना सन्ध्यावन्दनाद्यध्यापने आत्मान व्यापारयितु-मुदरपोषणप्रयासो नावकाश यच्छति। येषामवकाशोऽस्ति गृहे स्थिताना वृद्धाना तेषा मध्ये बहव-स्सन्ध्यावन्दनादिकमनुष्ठातुमपि न जानन्ति किमनुष्ठापने।

5 **पाश्चात्यनागरकताव्यामोह -**

अय देश दास्यात् पञ्चचत्वारिंशत्वर्षेभ्य पूर्व मेव विमुक्तोऽपि भावदास्यमेतावत्पर्यन्तमनुतिष्ठत्येव। वेषभाषादिविषयेषु तत् स्फुटीभवति। एव च उपनयने शिखा धर्तु लज्जते बालक। उप्तकेश घृतशिख च दृष्ट्वा तत्र तत्र एतावत्पर्यन्तमुपहासात् न व्यरसीत् लोक । समाजे इदानीमेव क्रमश आलोचनाविधाने परिणाम आगच्छतीति सन्तोष्टव्यम्।

एतैरेतादृशैरन्यैश्च कारणैस्समाजे कर्मश्रद्धा लुप्तप्राया भवति। अनेकप्रयोजनवता कर्मणा परिरक्षणमावश्यकम्। तत्र अनुसरणीया मार्गा अत्र सूच्यन्ते ।

**कर्मप्रचारणपरिरक्षणमार्गा -**

कर्मसु श्रद्धा जननीया, तदर्थ कर्मणा प्रयोजनानि प्रचारणीयानि।

1 आधुनिकपरिशोधनसरण्या परिशोधनप्रचालनम् -

कर्मणा यथाशास्त्रानुष्ठानेन साध्यमानानि प्रयोजनानि आधुनिकविज्ञानपरिशोधनपद्धत्या निरूप्य प्रचारणीयानि। यानि चैतत्पूर्वमेव निरूपितानि तानि प्रकाशयितव्यानि।

2 आधुनिकप्रचारसाधनै प्रचारणम् -

दूरवाण्या दूरदर्शिन्या च सस्कारकर्माण्युद्दिश्य चर्चा कार्यक्रमादिक यथासम्भव प्रसारणीयम् ।

3 पण्डितप्रचारकनियोग -

जनसामान्यस्य कर्मणा तत्प्रयोजनाना च विषये ज्ञापयितु पण्डितप्रचारका नियोज्या ।

4 सुलभाध्ययनावकाशकल्पनम् -

ये चाध्येतुमिच्छन्ति तेषा सुलभाध्ययनार्थ मवकाश कल्पनीय। तदर्थ च प्रतिग्राम विद्यमाना देवालया आध्यात्मिकस्फूर्ति कर्मश्रद्धा च जनयितु यथा समर्था भवेयु तथा करणीया।

5 जिज्ञासूनामुचितशिक्षणम्-

ये च जिज्ञासव तेषा कृते उचितशिक्षण दातु प्रतिमण्डल स्मार्तशिक्षणकेन्द्राणि स्थापनीयानि।

6 प्रान्तीयभाषासु प्रचारग्रन्थप्रकाशनम्-

स्मार्तकर्माण्य धिकृत्य क्रियाकलाप मन्त्रतदर्थविवरणयुतान् ग्रन्थान् तत्तत्प्रान्तीयभाषासु मुद्राप्य स्वल्पमूल्येन विक्रीय सर्वेषामपि स्मार्तकर्मपरिज्ञान हस्तप्राप्य कुर्यात् ।

7 सस्कृतभाषाव्याप्ति -

भारतीयसस्कृतिस्सर्वा ओतप्रोततया सस्कृतभाषया ग्रथितास्ति। भारतीयधर्माणा सस्कृतभाषायाश्च अविनाभावसम्बन्धो वर्तते। तेन सस्कृतभाषाव्यप्तिमन्तरा भारतीयधर्मप्रचारस्य समग्रता न सम्पद्यते ।अत सस्कृतभाषा-व्याप्ति करणीया ।

8 वित्तसाहाय्यम् -

श्रद्धालवोऽपि ये धनाभावेन मुख्यकाले कर्माणि कर्तु बिभ्यति तेभ्य वित्तसाहाय्य करणीयम्। वृथा धनव्यय कृत्वा उत्सवत्वेन सस्कारनिर्वहण नावश्यकम् इति सस्कारोऽपि व्युत्पादनीय । गोणकालात् प्राक् सस्काराधानमत्यन्तावश्यकम् इति च ज्ञापनीयम्। मुख्यकाले सामूहिकोपनयनानि कारयित्वा अधिकधनव्ययभीति परिहरणीया । कुटुम्बनियन्त्रणाय यथा प्रभुत्व प्रोत्साहकान् ददाति तथा मुख्यकाले उपनीतानामपि प्रोत्साहकान् दद्यात्।

एव चैतानन्यानप्येतादृशान् मार्गान् अनुसृत्य स्मार्तकर्म परिरक्षणमवश्यकर्तव्यम् । धर्मप्रचारणादिविषयेषु श्रीतिरुमलतिरुपतिदेवस्थान धर्मकेन्द्र श्रद्धाकेन्द्र च सत् अग्रे सरतीति महत् प्रमोदस्थानमेतत्। यतस्तेन सर्वत्र देवालयेषु वेदपण्डिता मासिकवेतनेन वेदपारायण कर्तु नियुक्ता। तेषा च मध्याह्नसमये ये चाध्ययनमिच्छन्ति तेषामध्यापन कार्यमिति सूचनाश्च दत्ता । तस्मात्

श्रीतिरुमलतिरुपतिदेवस्थानस्य कृतज्ञताञ्जलीन् समर्पयति, समर्पयिष्यति चेयं भारतजातिः। इदानीन्तनकालेऽपि कर्मणामियत्तयापि प्रचलने कारणभूतेभ्यः महात्मभ्यः वेदज्ञेभ्यः शास्त्रज्ञेभ्यः ऋण धारयति भारतजातिः। इयमत्र विज्ञापना– यथा सर्वेषामपि वेदप्रयोजन स्मार्तकर्मादिप्रयोजन च हस्तप्राप्य भविष्यति तथा आलोचना कुर्वन्तु सुधियः इति।

**उपसंहारः–**

वेदसंस्कृतिरेव एतद्देशीयसमाज सङ्घटयितु समर्था। यदा श्रौतानि कर्माणि अस्मिन् समाजे भूयिष्ठतया प्राचलन् तदा वेदानां कार्यक्षेत्रेण समाजेन सह सम्बन्धः प्रभूत आसीत्। अधुनातनकाले तु वेदानां समाजेन सह कार्यरूपेण सम्बन्धः स्मार्तकर्मभिरेव सम्पाद्यते। इद न सत्यदूरम् यत् – यावान् सम्बन्धः स्मार्तस्य समाजेन न तावान् वेदाना वा शास्त्राणा वा कार्यरूपेणास्ति। इदमत्र तत्त्वम्। महर्षयः सदा समाज सङ्घटयितु प्रायतन्त। सैव प्रणालिका स्मार्तकर्मव्यवस्था। एतद्रूपेणैव वेदसंस्कृतिरस्मिन् कार्यरूपेण जीवन्ती एतत्समाजसङ्घटना साधयति । एवं च वेदसंस्कृतेः परिरक्षणाय प्रातिपदिकभूतानि स्मार्तकर्माणि परिरक्षणीयानि प्रचारणीयानि च ।

SSS - 7

# वैदिकयज्ञसंस्थाया आध्यात्मिकं स्वरूपम्

डा. युगल किशोर मिश्रः
वाराणसी

वदो हि नाम प्राणिनां कृते साक्षाद् भगवद्विग्रह- एव वर्तते । श्रीमद्भागवते भगवता श्रीकृष्णेन उक्तम् -

**अहँ वै सर्वभूतानि भूतात्मा भूतभावनः ।**
**शाब्दं ब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ।।**

अत्र शब्दब्रह्मात्मकस्य वदस्य भगवद्विग्रहत्वं साक्षादुपदिष्टम् । अत वेदस्याध्ययनमध्यापन यजन वा वर्तते, इत्यत्र नास्ति सन्देहलेशावसर । श्रीमद्भगवद्गीतायामपि ईश्वरतत्त्वस्य वदवद्यत्व स्पष्टतया इत्थमुक्तम् -

**सर्वस्य चाह हृदि सन्निविष्टो**
**मत्त. स्मृतिर्ज्ञानमपोहनञ्च ।**
**वेदैश्च सर्वैरहमेव वेद्यो**
**वेदान्तकृद् वेदविदेव चाहम् ।।**

यदि मानवो वेदशास्त्रविमुखो भवति तर्हि तस्य भगवदनुग्रहपात्रता नश्यति । एवञ्च ससार यत्किमपि कर्म स करोति तत्सर्व. व्यर्थमव भवति । अत एवोक्तमेकस्मिन्मन्त्रवर्णे-

**यस्तित्याज सखिविद सखाय**
**न तस्य वाच्यपि भागोऽस्ति ।**
**यदी श्रृणोत्यलीक श्रृणोति**
**न हि प्रवेद सुकृतस्य पन्थाम् ।।**[2]

इति। अय भाव - य - मनुष्य सखाय - मित्रवन्महदुपकारक पालकञ्च वद तित्याज - तत्याज, तस्य अस्मिन्ससारे कुत्रापि भागो नास्ति । किम्बहुना, वाचि अपि भागो नास्ति एवविधो वेदविरहितो मनुज ससारेऽस्मिन् यत्किमपि श्रृणोति कुरुते वा तत्सर्व अलीक = व्यर्थमेव भवति । यतो हि स कल्याणस्य पन्था = मार्ग न वेद=न जानाति ।

अत साक्षादीश्वरविग्रहभूतस्य शब्दब्रह्मात्मकस्य वेदस्याराधन महते श्रयसे कल्पते । भगवत स्मरण, कीर्तनम्, अर्चन यथा ऐहिकामुष्मिक फल यच्छति, तथैव वेदस्याध्ययन यजनमपि ऐहिकामुष्मिकफलसाधक भवति। अत एव सायणाचार्येण वेदलक्षण विदधता प्रतिपादितम् - "इष्टप्राप्त्यनिष्टपरिहारयोरलाकिकमुपाय यो ग्रन्था वेदयति स वेद" इति । एवञ्च सति वैदिक कर्म न केवलमैहिकफलसाधकमपि तु आमुष्मिक मोक्षादिसाधकञ्च विद्यते ।

श्रेय साधनीभूता भगवत्प्रीतिरूपा बुद्धि यथा ऽनेकजन्मार्जितपुण्येन भवति तथव वैदिकधर्ममार्गपरतापि

1 गीता 15/15    2 ऋ स 9/71/6

1 त स भा भू पृ 2    2 अर्थसग्रह पृ 2

पूर्वजन्मार्जितपुण्यपुञ्जेनैव भवति । श्रीशङ्कराचार्येण विवेकचूडामणिनामके ग्रन्थे समुक्तम् –

**जन्तूना नरजन्म दुर्लभमतो पुस्त्व ततो विप्रता।**
**तस्माद् वैदिकधर्ममार्गपरता विद्वत्त्वमस्मात्परम्॥**

अतो भगवदनुग्रहेण प्राप्तस्य मनुष्यजीवनस्य सार्थक्य वैदिकधर्मानुष्ठानेन सम्पादनीय सर्वे इत्यस्ति आचार्याणा सदुपदेश । कोऽय वेदिको धर्म येन श्रयस्सिध्यतेति जिज्ञासाया पूर्वमीमासाग्रन्थेषु लक्षितम् – "वेदप्रतिपाद्य प्रयोजनवदर्थो धर्म" इति । स च यागादि । अत यागादिरेव धर्म ।[2]

वाधूलस्मृतो वेदिककर्मणामनुष्ठान नितान्तमावश्यकमिति प्रतिपादयता विहितम् –

**श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्त्तते ।**
**आज्ञाच्छेदी मम द्वेषी मद्भक्तोऽपि न वैष्णव ॥**

मानव जीवने प्रतिक्षण मनसा, वाचा, कायेन वा यत्किमपि कर्म कुर्वन्नास्त तत्कर्म यदि शास्त्रानुमोदित भवति तर्हि कल्याणाय कल्पते अन्यथा दु खभाग्भवति। अत एवोक्त श्रुतो – "क्रतुमयोऽय पुरुष । स यत्क्रतुर्भवति तत्कर्म कुरुते, यत्कर्म कुरुते तदभिसम्पद्यते" इति ।

अनेन श्रुतिवाक्येन मानवा शास्त्रानुमोदितयज्ञादि सत्कर्मसम्पादने भृशमवबोधिता ।

## यज्ञस्याध्यात्मिकपक्षयुक्तत्वम्

वेदाना परम प्रयोजनमध्यात्ममेव । अत निखिलऽपि भारतीये वाङ्मये अध्यात्मविद्याया गुणकीर्तन समुपलभ्यते। अध्यात्ममार्गे चित्तस्य शिवसकल्पयुक्तत्व चित्तवृत्तीना निरोधपुरस्सरमेकाग्र्यञ्च नितरा समपेक्षित भवति । ससारेऽस्मिन् नास्ति एतादृक् किमपि व्यावहारिक पारमार्थिक वा कार्य यच्चित्तैकाग्रता विना सिध्यत् । चित्तचाञ्चल्य विकास क्रमस्यावरोधक भवति । चित्रैकाग्र्यतु विनाशमपि विकासपरिणमयति । अस्माकमृषिभि मुनिभिश्च या या उपलब्धय समासादितास्ता सर्वा अपि चित्तवृत्तिनिराधेनैव । साम्प्रतिके युगेऽपि नवनवा वेज्ञानिका आविष्कारा वज्ञानिकाना सर्वात्मभावेन एकाग्रताया एव परिणामभूता सन्ति । अत जीवनस्य प्रत्येकस्मिन्क्षेत्रे सफलतायै एकाग्रताया अध्यात्मयोगस्य शरणत्वमनिवार्यमेव।

प्रत्यभीष्टसिद्ध्यर्थ वेदेषु 'धर्म चर' इति वाक्येन धर्मानुष्ठानस्योपदेश कृतो वर्तते । सोऽयमनुष्ठेयधर्मस्त्रिविध । भगवता श्रीकृष्णेन गीतायाम्–

**"यज्ञो दान तपश्चैव पावनानि मनीषिणाम्"।**[1]

अर्थात् यज्ञ, दानम्, तप इत्येतानि मनीषिणाँ कृते पावयित् णि । अत्र यज्ञ प्रथमत्वेन परिगणित इति यज्ञस्य माहात्म्य सर्वानतिशेते । इदमत्रावधेय भवति यत् अध्यात्मलाभाय चित्तवृत्तिनिरोध परमावश्यको विद्यते। चित्तवृत्तिनिरोधार्थ साधनचतुष्टय मन्त्रयोग–हठयोग–लययोग –राजयागनामभि ऋषिभिर्मुनिभिश्च प्रवर्त्तितम्। इमा चतस्रोऽपि प्रक्रिया यज्ञसस्थायामकत्र समाहिता दृश्यन्त । अत यज्ञविद्या अध्यात्मस्य मूलमिति सिध्यति। तद्यथा–

(i) परिदृश्यमानस्यास्य सृष्टिप्रपञ्चस्य कोऽपि भाग नामरूपाभ्याम् अव्यवच्छिन्नो नास्ति । जीव नामरूपात्मकेनावरणेनोपहित सन् बद्धो भवति । य यस्मिन्नाधारे पतति स तस्यावलम्बनेनेव उत्तिष्ठति, नाकाश गृहीत्वा । अत एव ससारसागरे पतितो जीव विष्णु –रुद्र–इन्द्रादिनामरूपात्मकनावलम्वननेव मुक्तिमार्गमधिगन्तु शक्नुयात्, नान्येन पथा । एवञ्च सति दिव्यनामालम्बाश्रयाणामिन्द्राग्निविष्णुप्रभृतीना दवाना यज्ञमाध्यमेन यजनन मन्त्रोच्चारणपुरस्सर स्मरणश्रवणानुकीर्तनेन च चित्तवृत्तिनिरोधपूर्वक देवतात्मभावन सम्भवति । फलत चित्तवृत्तिनिरोधात्मिका समस्ता क्रिया मन्त्रयोगान्तर्गता सन्ति । मन्त्रयोगोऽय साक्षाद्रूपेण यज्ञभावित एव वर्तते।

(ii) स्थूलशरीरण सम्बद्धाना षट्कर्मादियोग–क्रियाणाम् अभ्यासेन स्थूलशरीरवशीकरणपुरस्सर चित्तवृत्तिनिरोधात्मिका सर्वा अपि क्रिया 'हठयोग' इति नाम्ना व्यपदिश्यन्ते । यज्ञसस्थासु ब्रह्मचर्यम्, इन्द्रियनिग्रह , दीक्षाविधौ शरीरावयवाना सयमनम्, वाग्यम , पयोव्रतम्, सत्यवदनम् इत्याद्या क्रिया बाह्याभ्यन्तरेण स्थूलशरीराधिकरणपूर्वक चित्तवृत्तिनिरोधस्य विशिष्टोपायभूता एव वर्तन्ते । अत 'हठयोगस्य' परिपालन यज्ञसस्थाया स्वाभाविकतया समुपलभ्यते ।

1 गीता 18/5

(iii) समष्टि–व्यष्टिसिद्धान्तानुसार जीवशरीरात्मके पिण्डे समष्टिसृष्टिरूपात्मके ब्रह्माण्डे च साम्यमस्ति। अतः पिण्डेऽपि ब्रह्माण्डगताना तत्त्वाना सूक्ष्मरूपेणा–वस्थितिर्विद्यते । पिण्डे (=जीवशरीरे) स्थित ब्रह्माण्डव्यापिप्रकृतिशक्तिकेन्द्र विराट्पुरुषस्य (=परमात्मनः) ज्योतिस्तत्त्वे लयात्मिकायाः क्रियाशैल्याः तदनुरोधिना क्रियाव्यापाराणाञ्च 'लययोग' इति नाम्ना व्यवहारः शास्त्रचिन्तकैः कृतः । यज्ञविधौ जीवः स्वात्मनि स्थिता चिच्छक्ति यज्ञसस्थामाध्यमेन विराड्ज्योतिःस्वरूप मण्डलपुरुष भावयति । अतः 'लययोगः' यज्ञेषु अन्तर्भुक्त एव । वैदिके पुरुषसूक्ते अन्येषु च मन्त्रेषु 'लययोगस्य' महत्त्व तत्साधनञ्च बहुधा सकेतितमस्ति ।

(iv) शास्त्रेषु मनसो वृत्तयः बन्धस्य कारण बुद्धिवृत्तयश्च मोक्षस्येति प्रतिपादितम् । मोक्षसाधने सहयुक्तायाः बुद्धिक्रियाया एव मूर्तरूपभूताः 'विचाराः' सहायका भवन्ति । सद्विचारपुरस्सरमनुष्ठीयमानाया चित्तवृत्तिनिरोधक्रियाया एव नामान्तर विद्यते 'राजयोग' इति । सोऽय 'राजयोगः' यज्ञसस्थासु सत्यवदन–ऋतससाधन –अपरिग्रह–दानादिभिः पदार्थेषु देवत्वभावनादिविचारपूर्वक–मनुष्ठीयमानचित्तवृत्तिनिरोधात्मकतया सलक्ष्यते स्फीतेन विधिना ।

एवम्प्रकारेण मन्त्रयोग–हठयोग– लययोग–राजयोगरूपाया चतुर्विधप्रक्रियायाः यज्ञविधिषु सातिशयेन सन्निहितत्वात् यज्ञानामाध्यात्मिकत्व निर्विवादमेव ।

किञ्चास्माक सनातने वैदिकधर्मे सृष्टितादात्म्यभावे कश्चन विशिष्टः आग्रहो वर्तते । वैदिकधर्मस्य समेऽपि अनुष्ठानविधयः तादात्म्यसम्पादनसाधनभूताः सन्ति । यज्ञ , उपासनाविधिश्चास्य बाह्याभ्यन्तरपक्षौ स्तः । यज्ञस्य मूलमस्ति ममत्वभावनायास्त्यागः, यः खलु अध्यात्ममार्गस्य प्रमुख साधनमस्ति । यज्ञेषु मन्त्राणा प्रयोगस्यानिवार्यत्व साधित शास्त्रकृद्भिः । एतेनेद सिद्ध भवति यत् यज्ञे मननसाधनात्मिकायाः वाच एवोपयोगो भवति । यतो हि मन्त्रशब्दस्य "मननात् मन्त्र" इति व्युत्पत्त्या मननसाधनभूताः मन्त्रा इत्यर्थः प्राप्यते । मन्त्रमाध्यमेन शुद्धान्तःकरणे यो भावः समुदेति स एव यज्ञियो भावः तस्यैव च परिणतिः अध्यात्मरूपेण भवति । एव हि यज्ञः व्यक्ताव्यक्तयोस्स–योजकः, विद्याऽविद्ययोः, अग्नीषोमयोः, देवमनुष्ययोश्च कश्चनापूर्वसङ्कल्पात्मकः सयोजको विद्यते। यज्ञः भौतिकद्रव्याणामग्नौ प्रक्षेपाङ्गमात्रमेव नास्ति अपि तु यजमानः आत्मन अर्पणमेव तत्र भावयति । एव बाह्याभ्यन्तरसत्तयोस्तादात्म्यभावना यज्ञेषु विधीयते । यज्ञमाध्यमेन मनुष्य विनयस्य, अकिञ्चनतायाः, परार्थतायाश्च अभ्यास समनुतिष्ठति । अय च स्वात्मनि कञ्चनाभिनवमापूरणात्मक विश्वास अहर्निश श्रेयसे सम्पूरयति। भगवता श्रीकृष्णेन गीताया यज्ञस्याध्यात्मिक स्वरूपमुपदिशतोक्तम् –

**ब्रह्मार्पण ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।**
**ब्रह्मैव तेन गन्तव्य ब्रह्मकर्मसमाधिना ॥**

अर्थात् मनुजः देवभावनया ("अगन्म ज्योतिरुत्तमम्" इत्यनया वैदिक्या भावनया) भावितः सन् अर्पयति, यद्धवि अर्पयति तदपि अग्नीषोमात्मकमेव, यत्राग्नौ जुहोति तदपि ब्रह्मव, यस्यै देवतायै च जुहोति सा ब्रह्मरूपिण्येव । एवञ्च अर्पणात्मक यज्ञकर्म ब्रह्मैव वर्तते ।

यज्ञसस्थायाः रहस्यविषये ब्राह्मणाख्यकोपनिषद्ग्रन्थेषु बहुधा चर्चितमस्ति । दर्शपूर्णमासप्रकरणे आधानसिद्धस्या–ग्नेः ब्रह्मरूपता इत्थ निरूपिता –

**"स आर्षेयमत्क्वाऽऽह ब्रह्मण्वदिति ।**
**ब्रह्म ह्यग्निस्तस्मादाह ब्रह्मण्वदिति।"** [2]

एवमेव चातुर्मास्यमधिकृत्य श्रूयते –

"अक्षय्य ह वै सुकृत चातुर्मास्ययाजिनो भवति। सवत्सर हि जयति, तेनास्याक्षय्य भवति, त वै त्रेधा विभज्य यजति, त्रेधा विभज्य प्रजयति । सर्व्वं वै सवत्सर सर्व्वं वा अक्षय्यमेतेन ।[3] स यद्वैश्वदेवेन यजते । अग्निरेव तर्हि भवति, अग्नेरेव सायुज्य सलोकता जयत्यथ यद्वरुणप्रघासैर्यजते वरुण एव तर्हि भवति वरुणस्यैव सायुज्य सलोकता जयत्यथ यत्साकमेधैर्यजत इन्द्र एव तर्हि भवति इन्द्रस्यैव सायुज्य सलोकता जयति । --- स परममेव स्थान परमा गति गच्छति

1 गीता 4/24 2 श ब्र. 1.5.1.7 3 श ब्रा 2.6.3 1 4 श ब्रा 2.6 4 ६

चातुर्मास्ययाजी तदाहुर्न चातुर्मास्ययाजिनमनविन्दन्ति परम ह्येव खलु स स्थान परमा गति गच्छतीति ।" [4]

शतपथब्राह्मणे यज्ञशरीरावयवत्वेन प्रणीतादीनामनुष्ठेय-पदार्थानामधियज्ञमध्यात्मञ्च सम्पत्ति प्रदर्शिता । तद्यथा-आहवनीयस्योत्तरत स्थापिता या प्रणीताख्या आपस्ता यज्ञस्य शिर एव । ताभिर्यज्ञस्य शिर सस्क्रियते । एवमधियज्ञ शिर सम्पत्ति प्रदर्श्याध्यात्ममपि सा प्रदर्श्यते। अर्थात् प्रणीताना प्रणयनेन यजमानो यद् यज्ञस्य शिर सस्करोति तद् यज्ञसम्बन्धिशिरो मदीयमेव शिर इति विजानीयात् ।

अत्र यज्ञे यज्ञसम्बन्धी य पञ्चदशदार्वात्मक इध्म स देहमध्ये सञ्चरन् प्राणवायुरेव । अर्थादिध्मे प्राणबुद्धि कार्या । यतो हि यथा इध्मेन अग्नि समिध्यते तथा प्राणवायुना सर्व शरीरजाल प्रदीप्त भवति । तथाहि, यच्च प्राणभृत् निमीलनव्यापार कुर्वत् पशुपक्षिमनुष्यादिजङ्गमशरीरम्, यच्च एजत् निमषणादि-व्यापारशून्य केवल कम्पमानमेव स्थावरशरीरम्, तच्चान्त - सचरता प्राणवायुनैवेद्धम् । इत्थमधियज्ञमग्न्यादसमिन्धकस्य इध्मस्य अध्यात्म प्राणरूपता विद्याद् यजमान अहमेवेष इध्म इति ।

अस्य यज्ञस्य सामिधेन्याख्यान्याचरता अनूक शिर पक्षपुच्छाद्यवयवसन्धि विद्याद् यजमान । तासा सामिधेनीना विषये यजमान इत्थ यज्ञे ब्रूते- "सन्तन्वन्निव मऽनुब्रूहि" इति । अर्थात् ता सामिधेनी परस्पर सयोजयन्निव मह्यमनुब्रूहि । यतो हि मध्यावयवसन्धिरूपमिद शरीर परस्परसयुक्त दृश्यते, तस्मादनूकरूपाणा सामिधेनीनामपि परस्परससक्तत्व युक्तम् । तदुक्तमाश्वलायनन- "स्वरादिमृगन्तमोङ्कार त्रिमात्र मकारान्त कृत्वोत्तरस्या अर्द्धर्चेऽवस्येत्, तत् सन्ततम्" इति ।

किञ्च यज्ञस्येमावाघारो मनोवाग्रूपो वेदितव्यो । तावव मनोवाग्रूपावाघारौ क्रमेण सरस्वत्- सरस्वत्यात्मको ज्ञेयो । मम मनश्च वाक् च सरस्वत्- सरस्वतीरूपावाघारो इति जानीयात् इत्यर्थ। अस्य यज्ञस्यावयवा पञ्च प्रयाजा एवाध्यात्म पञ्च शीर्षण्या प्राणा । तत्र मुखमेव प्रथम प्रयाज, दक्षिणा नासिका द्वितीय प्रयाज, वामा नासिका तृतीय प्रयाज, दक्षिण कर्णश्चतुर्थ प्रयाज, वामश्च कर्ण पञ्चम प्रयाज। यस्माच्चतुर्थे प्रयाजे उपभृति वर्तमानस्याज्यस्यार्ध जुह्वामानयति, तस्मादिद श्रोत्र मध्ये सच्छिद्रम् । यो च यज्ञे साम्याग्नेयाज्यभागो, एतावध्यात्म मे चक्षुषी इति विद्यात् । पूर्णमासयागे य आग्नेय पुरोडाश अयमेव यज्ञशरीरस्य दक्षिण पार्श्व । सोऽध्यात्म मे शरीरस्य दक्षिण पार्श्वभाग । उपाशुयाजाख्यश्च यागो हृदयमिति विद्यात् । यदुपाशु तेन चरति तदुपाशुयाजात्मक हृदय गुहेव अलक्ष्य भवति । अथ अग्नीषोमीयदेवताको यस्तृतीयो यागोऽस्ति सोऽस्य पुरुषस्य उत्तरार्धभाग । इत्थ पूर्णमासयाग वेदितव्यम ।

दर्शयागे तु इन्द्रदेवताक सान्नाय्य दधिपयोलक्षण हविस्तदेव देहस्योत्तरभाग । असमध्यमेव स्विष्टकृद्याग। शत्रुरेव प्राशित्रम् । यथा प्रजापतिशरीरे आविद्ध शल्य प्राशित्रावदानेन निरगमयन् दवास्तया यज्ञशरीरस्य यजमानस्य वा वेष्टनशील यत्पाप यच्च ग्रन्थिमद्भूत वस्तु, यच्च वरुणसम्बन्धिहिसन तत्प्राशित्रावदानेन निस्सारयति ।

अधियज्ञ या इडा सवाध्यात्ममुदरम् । तस्माद् यथा इडाया पुरोडाशादीनि सान्नाय्यादीनि वा हवीषि सहावद्यन्ति तथेवेद नानारूपमन्न उदरे सहैव धार्यते ।

ये यज्ञशरीरावयवरूपास्त्रयोऽनुयाजास्त एवाध्यात्म नाभिवायुगुह्यरूपास्त्रयाऽवाञ्च प्राणा। यज्ञे "इद द्यावापृथिवीभद्रमभूत्" इत्यादिरूप सूक्तवाक "तच्छयोरावृणीमहे" इति शयुवाकश्च पुरुषेऽध्यात्म बाहुद्वयम् । यज्ञे सोमत्वष्टृदेवपत्न्यग्निगृहपतिदेवता-काश्चत्वार पत्नीसयाजा एव अस्य यज्ञशरीरस्य चतस्र प्रतिष्ठाभूता।। यज्ञे समिष्टयजुराख्यो होम एवाध्यात्म पादद्वयम्। एव शिर प्रभृति पादान्ता अवयवा अधियज्ञमध्यात्म चाहुतिभिरेव परिकल्पिता सन्त सम्भूय एकविशतिसख्याका। ताश्चकविशतिराहुतय द्वावाघारो, पञ्च प्रयाजा, द्वावा ज्यभागा, आग्नेय पुरोडाश, अग्नीषामीय उपाशुयाज, अग्नीषोमीय पुरोडाश। अग्नि स्विष्टकृत् इडा, त्रयोऽनुयाजा, सूक्तवाकश्च शयोर्वाकश्च, सस्रवाहुति, समिष्टयजुश्चेति ।[1]

एवमुपर्युक्ता एकविंशतिराहुतयो यज्ञे भवन्ति, अधिदैवतमपि एवमेव एकविंशतिराहुतयः । ताश्च द्वादशमासाः संवत्सरस्य, वसन्ताद्याः पञ्चर्तवो ("हेमन्तशिशिरयोः समासेन" इति वचनात् हेमन्तशिशिरयोरेककर्तृत्वात्), पृथिव्यादयस्त्रयो लोकाः इति सम्भूय विंशतिराहुतयः । एकविंशश्च दिवि प्रतपन् सूर्यः । एष सूर्य एव गतिः गन्तव्यस्थानञ्च । एष एव च प्रतिष्ठा । एवमेकविंशतिमाहुतीर्जानन् पुरुषः एतां गतिं प्रतिष्ठां च विन्दति । अत एवारुणिराह – "अर्धमासे-अर्धमासे खलु आदित्येन समानलोको भवामि यतोऽहं दर्शपूर्णमासयोः उक्तां सम्पत्तिं वेद्मि ।

यो यज्ञविद्यायाः आध्यात्मिकं रहस्यं जानाति स (आत्मयाजी) देवयाज्यपेक्षया महत्तरं फलं साधयति । स एव खलु आत्मयाजी यो यजमानः "इदं शिरःप्रभृतिकं मदीयमङ्गमनेन यागाङ्गेन संस्क्रियते, इदं मदीयमङ्गमनेन उपस्थाप्यते" – इति जानाति । एतत्फलञ्च सर्वपापक्षयः। यथा सर्पस्त्वचो विनिर्मुच्यात् एवमात्मयाजी अस्मात् मरणधर्मकात् शरीरात्पाप्मनो विनिर्मुक्तो भवति । ततश्च ऋङ्मयो यजुर्मयः साममय आहुतिमयश्च सन् स्वर्गं लोकं प्राप्नोति ।

अथ स देवयाजी भवति यो "देवानेवाहमिदं यजे देवान्वा प्रजयामि" इति जानाति । तत्फलञ्च यथा खलु पापीयान् हीनः पुरुषः श्रेयसे श्रेष्ठाय पुरुषाय शोभनमुपायनमुपहरेत्, यथा वा वैश्यो यज्ञे करं दद्यात्, एवं स देवयाजी हविषा तोषितैर्देवैः सेवानुसारेण दत्तं फलं लभते । किन्तु यावन्तं लोकमात्मयाजी जयति तावन्तं लोकं नायं जयति, न लभते, उपासनाज्ञानहीनत्वात् इति शम् ।

●

1. उपरि विवृतं यज्ञास्याधियज्ञमध्यात्मञ्च रहस्यं शतपथब्राह्मणस्य एकादशकाण्डमनुशील्य प्रस्तुतं वर्तते ।

# GUEST LECTURERS

GL - 1

# पाठपरिशुद्धिः

**ना. श्री. देवनाथाचार्यः**

एस्. नावल्पाक्कम्

## वेदेषु पाठभेदाः–

एकस्यैव मन्त्रस्य भिन्नभिन्नवेदेषु पठ्यमानस्य कचन पाठभेदा अध्ययनसप्रदाये लब्धप्रसरा विलसन्ति। तेषु केचन अवश्यमेव सावधान शोधयितव्या भवन्ति । केचित्तु न तथा ।

(1) पाठभेदेन छन्दोभङ्ग क्वचित् प्रसज्यते। यथा–यजुर्वेद एकाग्निकाण्डे द्वितीयप्रश्ने पञ्चदशे खण्डे, अन्ते मन्त्रचतुष्टय वास्तोष्पतिदेवताकम् । तत्र आद्यौ द्वौ मन्त्रौ कृष्णयजुर्वेदतैत्तिरीयसहिताया तृतीयकाण्डे चतुर्थप्रश्ने दशमानुवाके आदौ पठ्येते । अत तयो प्रतीकग्रहणमात्र कृत सूत्रकारेण, "वास्तोष्पत इति द्वे" इति । उभयोरपि मन्त्रयोः "वास्तोष्पते" इत्येवोपक्रमः। तस्मात् एव प्रतीकग्रहण कृतम् । सूत्रकारस्य स्वय वृतोऽय मन्त्रोपदेशप्रकार. यत्–स्वशाखाया यत्र कुत्रापि प्रत्यक्षपठिताना मन्त्राणा प्रयोगविशेषे विनियुज्यमानाना न पूर्णपाठ क्रियते । अपि तु प्रतीकग्रहणमात्रम् इति । अत्रैव "अन्नपत इत्येषा" इति, 'नमो अस्तु सर्पेभ्य इति तिस्र' इति च प्रतीकग्रहणम् । स्वशाखायामविद्यमानस्य मन्त्रस्य तु पूर्णपाठ एव सूत्रकारेण क्रियते । यथा अत्रैव वास्तोष्पतिदैवत्ययोः तृतीयचतुर्थमन्त्रयोः पूर्णपाठः क्रियते ।

तत्र तृतीयो मन्त्र – वास्तोष्पते प्रतरणो न एधि गोभिरश्वेभिरिन्दो । अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रतिनो जुषस्व ॥ इति पठ्यते सर्वैरेव वैदिकैः। अय मन्त्र त्रिष्टुप्छन्दस्क । त्रिष्टुभ एकैकस्मिन् पादे एकादशैकादशाक्षराणि, चतुर्षु पादेषु मिलित्वा चतुश्चत्वारिंशत् अक्षराणि च भवन्तीति नैतदविदित वैदिकानाम् । एकादशाक्षरा त्रिष्टुप्–चतुश्चत्वारिंशदक्षरा त्रिष्टुप् – इति वेदे असकृत् पठ्यते । एव सति अस्मिन्मन्त्रे द्वितीयपादे सप्तैवाक्षराणि पठ्यन्ते नैकादश । अत छन्दसो वैकल्य जातम् । "अपि माष मष कुर्यात् छन्दोभङ्ग न कारयेत्" इति हि प्रामाणिकाना सिद्धान्तः। वस्तुतत्त्वे एवविधे सति कथमत्र चतुरक्षरन्यूनस्य विकलस्य द्वितीयपादस्य पाठ अध्येतृसप्रदाये निर्विशङ्क वरीवर्ति ? इति प्रश्न समुत्तिष्ठति । अस्य समुचित समाधान प्रामाणिकैः वैदिकैः वक्तव्यम् ।

अत्र अस्माभि कश्चित् परिहार उल्लिखितो वर्तते। स चेत्थम् –

अयमेव वास्तोष्पतिदेवताको मन्त्रः ऋग्वेदेऽपि वर्तते। तत्र सप्तमे मण्डले चतुःपञ्चाशत्तमे सूक्ते द्वितीयोऽय मन्त्रः पठ्यते । तत्रत्यो मन्त्रः तथाभूत एवात्र लिख्यते प्रामाणिकाना वैदिकाना चक्षुरुन्मीलयितुम्।

"सूक्तम् – 54 मैत्रावरुणिर्वसिष्ठ । वास्तोष्पति । त्रिष्टुप् ।

वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो । अजरासस्ते सख्य स्याम पितेव पुत्रान्प्रति नो जुषस्व ।"

इत्येव तेषामध्ययनसप्रदायागत पाठोऽद्यावधि दृश्यते । अस्मिन् सप्रदाये छन्दाभङ्गो नास्ति । द्वितीयपादे "गयस्फान" इति पदमेक अस्मिन् पाठ दृश्यते । चतुरक्षरमिद पदम् । तेन एकादशाक्षराणि सम्पद्यन्ते । छन्दोवैकल्पमपि परिहृत भवति । इमानि चत्वार्यक्षराणि अस्मिन्मन्त्रे याजुर्वैदिकै प्रमादात् परित्यक्तानि । चिरवृत्तत्वादस्य प्रमादस्य, अद्यतना अध्येतार विकलमेव मन्त्र पठन्ति । इदानी समिलित वेदिकै इद पद यजुर्वेदमन्त्रप्रश्नगते वास्तोष्पत्यमन्त्रे सयोजयितव्यम् । एव सति सर्व समञ्जस भवेत् ।

अस्माभिरपि वेदाध्ययनकाल विकल एवाय – चतुरक्षरहीन उपाध्यायमुखात् गृहीत । तस्याप्येव – तस्याप्येव–इति महतीयमधपरपरा चिरायानुवर्तमाना विलसति । अस्मदीय पुण्यतमे भारतदेशे नानाप्रान्तेषु विलसन्तो वेदव्यासतुल्या घनपाठिनो बहवोऽपि सविनयम् अस्माभिरिम विषयमावेद्य पृष्टा एव । सर्वेऽपि वस्तुतत्त्व सम्यगेव विजानन्ति अङ्गीकुर्वन्ति च । पर नूतनस्य पदस्यैकस्य स्वाध्यापकेन अनुपदिष्टस्य समेलन मन्त्रमध्ये कर्तु नोत्सहन्ते । स्वोपाध्यायेन सह स्वस्य–स्वमाणवकानाञ्च अज्ञानमङ्गीकर्तु नेच्छन्ति । तस्मात् जानन्तोऽपि अनुपपन्न विकलमेव मन्त्र निर्दिष्य उच्चघोषेण पठन्ति । महदेवेद विषादस्थानम् ।

एवमेवास्माभि अस्य एकाग्निकाण्डस्य बहूनि मुद्रणान्यपि परिशीलितानि । सर्वत्र विकलस्यैवास्य मन्त्रस्य मुद्रापण कृतमस्ति । सर्वेऽपि मुद्रापका महान्त अस्मिन्विषये भ्रान्ता इति यावत् । एकाग्निकाण्डस्य भाष्ये एतन्मन्त्र–व्याख्यानावसरे "गयस्फान" इति पदनिर्देश विना अर्थानुवाद पर कृतो दृश्यते । इदमेकमाश्वासकारणमस्माकम् । अस्मत्सुहृदा विद्वत्तमेन लिख्यते बहो कालात् प्राक् जर्मनिदेशीयेन विदुषा सपादिते एकाग्निकाण्डपुस्तके "गायस्फान" इति पदसहित एवाय मन्त्रो मुद्रापितो विराजते इति । तेषा महात्मना वेदिकबृन्देन सह वयमपि हार्दकृतज्ञतया सह धन्यवादान् समर्पयाम ।

(2) पाठभेदेन वेदसमाधिसिद्ध स्वर अन्यथा भवति कुत्रचित् । अयमप्यशोऽवश्यमेव वेदिकै अवधातव्य । अनादरो न युज्यते । यथा–याजुर्वेदिके एकाग्निकाण्डे पूर्वोदाहृतस्थल एव समनन्तरामन्त्रा स्वरान्यथाभावन याजुर्वेदिकै पठ्यन्ते ।

"अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् ।
सखा सुशेव एधि न ॥"

इति वेदिका अधीयते – अध्यापयन्ति च । अत्र "वास्तोष्पत" इति द्वितीय पद सबाधनप्रथमकवचनान्तम् । तत् आद्युदात्तस्वरसहित पठ्यते याजुर्वैदिक । इदमनुपपन्नम् । सर्वानुदात्तत्वमस्यावश्यकम् । अयमपि मन्त्र ऋग्वेदे सप्तममण्डले पञ्चपञ्चाशत्तम सूक्त आदा पठ्यते । स यथावत् लिख्यत–

"मैत्रावरुणिर्वसिष्ठ.– गायत्री
अमीवहा वास्तोष्पते विश्वारूपण्याविशन् ।"
सखा सुशेव एधि न ॥

इति ते पठन्ति । अस्मिन् पाठे मन्त्रगत द्वितीय "वास्तोष्पते" इति पद सर्वानुदात्तमेव वर्तते । नाद्युदात्तम् । अयमेव समीचीन पाठ । याजुर्वैदिका अध्येतार अवेषम्येण अत्र प्रमाद्यन्ति । सर्वेऽपि घनपाठिन आद्युदात्तमवद पदमधीयते – अध्यापयन्ति च । इत्थ महती अधपरपरा सजाता निराबाधमनुवर्तते । अत्रापि प्रतिबुद्धै प्रामाणिकै स्वरान्यथाभाव अवश्यमेव कल्पयितव्य । ऋग्वेदिना यथा पठन्ति तथव अस्माभिरपि पठितव्यम् । अस्माकमुपाध्याय सर्वज्ञ इति वय सुदृढमध्यवस्याम । तथापि अस्मिन्विषये तस्यतत्पूर्वतनानाञ्च स्खालित्य प्रत्यक्षतया दृश्यमान नापह्नोतु शक्यम् । "नहि दृष्टेऽनुपपन्न नाम" इति हि मीमासाभाष्यकारो वदति । अत आत्मवञ्चना नास्माभि कर्तव्या । प्रत्यक्षस्य दोषस्य परिहार सुधीर कर्तव्य एव ।

अत्र औचित्य सक्षेपेण विवृणुम – सबोधनरूपाणा स्वर वेदेन स्वयकृतव्यवस्थया तत्र तत्र सम्यगेव व्यवह्रियते।

वाक्यस्य – ऋङ्मन्त्रस्य वा आरभे – वादादौ वा विद्यमान – सबोधनपद आद्युदात्त भवति ।

(i) वाक्यादौ – अग्ने महा असि
ऋगादौ – इन्द्र क्रतु न आभर
ऋक्पादादौ – पुरीषय· पुरुप्रियोऽग्ने त्व तरामृध·।

वाक्यमध्ये विद्यमान सबोधनपद सर्वानुदात्तमेव भवति।

(1) नमस्त आतान

(2) यदग्ने कव्यवाहन

(3) उभा वामिन्द्राग्नी

एवविध वेदव्युत्पन्नाना नापरिचितम् । अतो विरम्यते ।

प्रकृत वास्तोष्पते इति सबोधनपद वाक्यमध्ये वर्तते । न ऋगादौ । अमीवहा इति पदमेवात्रारभे वर्तते । तदनन्तरस्थाने पठ्यमानस्य सबोधनपदस्य सर्वानुदात्तस्वर एव वेदसप्रदायसिद्धः। ऋग्वेदिनोऽपि तथव पठन्ति । अत अत्रापि अस्माक याजुर्वेदिकाना सप्रदाये लब्धप्रसरोऽय स्वरान्यथाभाव· अस्माभिरेव सशोधयितव्यः। नात्रानादरो युज्यते । अस्माभिरपि अनुपपन्न एव पाठ शैशवे गृहीत· । अद्यैव स्वातन्त्र्येण तस्य शोधन कृतमस्माभि·।

अस्मिन्नपि विषये बहूनि मुद्रितपुस्तकानि अन्विष्यान्विष्य परिशीलितान्यस्माभिः बहवश्च वेदव्यासतुल्या घनपाठिन पृष्टाः । सर्व विफलमेव । अत अत्र समिलितान् सदस्यान् सात्र्जलिबन्ध प्रार्थये प्रत्यक्षपरिदृश्यमान वस्तुतत्त्व नापह्नोतव्यम् । समीचीन· पाठ· आदर्तव्य· इति ।

(3) सहस्त्रशीर्ष देव ... इत्यस्मिन्ननुवाके अन्तिम· मन्त्र कैश्चिदनुपपन्नमार्गेण पठ्यते । केचित्तु उपपन्नमार्गेण पठन्ति । अत्रापि पूर्वस्थलद्वयवदेव पाठस्य सशोधन कर्तव्य सर्वैरपि वैदिकैः ऐककण्ठ्येन पठितव्यम् इति अस्माक प्रार्थना ।

अस्मिन्ननुवाके सर्वे मन्त्राः अनुष्टुप्छन्दस्काः। अनुष्टुभः एकैकस्मिन्पादे अष्टावष्टावक्षराणि चत्वार· पादा· समुदिताक्षरसख्या द्वात्रिशत् इति सार्वजनीनमेतत् । "द्वात्रिशदक्षरानुष्टुप्" इति वेदे च तत्र तत्र जोघुष्यते । अस्मिन्ननुवाके अन्त्य वाक्य केचिदेव पठन्ति – "स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षर· परमस्स्वराट्" इति । अस्मिन् सप्रदाये छन्दोभङ्गो न भवति । प्रतिपाद अष्टानामेवाक्षराणा सत्त्वात् । समुदिता – क्षरसख्यायाश्च द्वात्रिशदनतिरेकात् । इममेव भाग अन्ये एव पठन्ति –

"स ब्रह्म स शिवस्स हरिस्सेन्द्रस्सोऽक्षर परमस्स्वराट्" इति । अस्मिन् सप्रदाये छन्दोभङ्गो भवति । "स हरिः" इत्यक्षरत्रयाधिक्येन अस्मिन् पादे एकादशाक्षराणि सपद्यन्तेसमुदिताक्षरसख्या च "पञ्चत्रिशत्" भवति । अनुष्टुप्छन्दस इय स्थितिरनुपपन्ना । तस्मात् "स हरि·" इत्यक्षरत्रय अस्मान्मन्त्रात् अपसारयितव्यम् । कदाचित् केनचित् प्रमादादिहेतुना सयोजितमिदमक्षरत्रय, न मन्त्रस्वरूपेऽन्तर्भूतम् ।

अत्रापि अध्ययनसप्रदाये जातापराध उदारहृदयाः प्रामाणिकाः वस्तुतत्त्वरक्षणैकपरा· परिमार्ष्टुमर्हन्ति । अस्मिन्नपि वय तदा तदा वैदिकान् प्रतिबाधयन्त एव वर्तामहे । पर विफल एवास्माकमारभो न तु साफल्यमश्नुते । अत्र समुदितान् वेदविदुष· सात्र्जलिबध प्रार्थये अय कलङ्कः अपनीयतामिति ।

(4) तैत्तिरीयारण्यके सप्तम· प्रश्न "नमो वाचे" इत्यारभ्यते । इम प्रश्न चतुर्थत्वेनापि केचन गणयन्ति । अस्मिन्नन्तिमोऽनुवाक "शन्नो वात· पवता.. " इत्यारभ्यते । अत्र, "तच्चक्षुर्देवहित पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदश्शत जीवेम शरदश्शत..." इत्यानुपूर्वी अध्ययनसप्रदाये अनुवर्तते । अत्रापि छन्दोभङ्ग जात· । तस्य समीकरणमावश्यकम् । अस्य मन्त्रस्य उष्णिक्छन्दः । तस्या· त्रय· पादा· । विषमा च पादानामक्षरसख्या । एकस्य पादस्य द्वादश अक्षराणि – अन्ययो द्वयो पादयो· प्रत्येक अष्टावष्टावक्षराणि । पादत्रयसमुदिताक्षरसख्या च अष्टाविशति· । अयमपि विषय· वेदसप्रदायविदा सुविज्ञात एव । बहूनि उदाहरणानि च सन्त्येव । विस्तरपरिजिहीर्षया तु नेह विलिख्यन्ते । "गायत्री वा एषा यदुष्णिहा यानि चत्वार्यक्षराणि" इति वेद एवास्या अक्षरसख्या दर्शयति । गायत्रीछन्दस· चतुर्विंशतिरक्षराणि । ततोऽधिकतया चतुर्णामक्षराणा मेलनेन उष्णिक्छन्द सपद्यते– इति यावत्।

अस्य उष्णिक्छन्दस. योऽय द्वादशाक्षरमितः एक पादः स आद्यो वा, मध्यमो वा, अन्तिमो वाभवति। अत्र यथासभव निर्वाह. कार्य.। न निर्बधोऽस्ति–आद्य एवाय स्यात् इत्यादिः। अत्रापि विषये उदाहरणानि सुलभान्येव। अध्ययन सप्रदायविदा नेदमुपपादनीयमित्युपेक्ष्यते। प्रकृतमन्त्रे च आदिमे पादे द्वादशाक्षराणि – अन्त्ययो पादयो अष्टावष्टावक्षराणि इति वस्तुस्थिति.। अध्ययनसप्रदाये तु, आद्ये पादे "पञ्चदश" अक्षराणि पठ्यन्ते। एव सति अस्य मन्त्रस्य समुदिताक्षरसख्या "एकत्रिंशत्" सपद्यते। उष्णिक्छन्दस अननुगुणमेतत्। अत. त्रयाणामक्षराणामपनयनेन छन्दस्स्वरूप परिरक्षितव्यम्। इदमप्यवश्यमेव कर्तव्य वैदिकै।

अत्रापि विषये अस्माभि. चिराय प्रचार क्रियमाणोऽस्त्येव। साफल्यन्तु न भवति। अध्ययनसप्रदाय–रसिकानामेवेद कृत्यम्। ते च सुदृढमभिनिविशन्ते भग्न– छन्दस्क पाठम्। सकुचितदृष्टि परित्यज्य चक्षुरुन्मील्य द्रष्टव्य वस्तुतत्त्वम्। हस्तामलकतुल्यमिद प्रत्यक्षीभवेत्। यदि सर्वे ऐककण्ठ्येन अत्र उष्णिक्छन्दस परिरक्षण कर्तु अभ्युपगम्यते, तदा अपनेतव्यतया उद्दिष्टानि त्रीण्यक्षराणि कानि?

अत्रापि समुचित समाधानमस्माभिः विमर्शपूर्वक कल्पित वर्तते। "पुरस्तात्" इतीमान्येव तानि त्रीण्यक्षराणि। एतेषामपसारणेन अष्टाविशतिरेवाक्षराणि सपन्नानि भवन्ति।

कथमिद ज्ञायते? ऋग्वेदसप्रदायालोचनेन। अय किल मन्त्र. ऋग्वेदेऽपि पठ्यते। तत्पाठे "पुरस्तात्" इति पद नास्ति।

ऋग्वेदे सप्तममण्डले षट्षष्टितमे सूक्ते षोडशो मन्त्र: –

"तच्चक्षुर्देवहित शुक्रमुच्चरत्।

पश्येम शरदश्शत जीवेम शरदश्शतम्"

इत्येव पठ्यते। अस्य मन्त्रस्य छन्दः "पुर उष्णिक्" इति निर्दिष्टमस्ति। द्वादशाक्षरस्य पादस्य आरभे विद्यमानत्व "पुर" इति पद सूचयति। तावदेव। अष्टाविशत्यक्षरत्वन्तु उष्णिक्छन्दसो निर्विवादमेव– एतदवलबनेनैव अत्र पाठशोधन कर्तव्यमिति अस्मदभिप्रायः। न जानीमः कदा वा? केन वा महानुभावेन "पुरस्तात्" इत्यक्षर अत्र सयोजितमिति। "आलर्क विषमिव सर्वत. प्रसृप्त" इति न्यायेन सर्वैरपि वैदिकै. अवैषम्येण अयमनुपपन्नः छन्दोवैरूप्यहेतु· पाठः निर्विशङ्क पठ्यते।

न केवलमृग्वेदे, वाजसनेयसहितायामपि "पुरस्तात्" पदरहित एवाय मन्त्र पठ्यते।

इतोऽन्येऽपि पाठभेदाः वेदे दृश्यन्त एव। तथापि न तत्र शोधनावश्यकता। छन्दोवैरूप्यानापादकत्वादेव। द्वे उदाहरणे दर्शयाम –

(1) 'मित्रस्य चर्षणीधृतश्श्रवोदवस्य सानसिम्। सत्य चित्रश्रवस्तमम्।' इति याजुर्वैदिका इम मन्त्र पठन्ति।

"मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि। द्युम्न चित्रश्रवस्तमम्।" इति बह्वृचाः।

(2) "आसत्येन रजसा वर्तमान" इति याजुषा. पठन्ति। "आ कृष्णेन...." इति बह्वृचा। अत्र छन्दोभङ्गरूप. प्रौढो दोषो नास्ति। तस्मादुपेक्षा।

वेदव्यासापरावतारभूताना महात्मना पुरस्तात् मितज्ञेन मया वेदपरिरक्षणश्रद्धावशात् अय विषयः उपस्थापितः। श्रुत्वा तटस्था महान्त· प्रमाणम्।

नमो वेदविद्भ्यो महद्भ्य।

●

GL - 2

# वेदसम्बद्धानि शास्त्राणि

**श्री सूरि रामकोटिशास्त्री**
**तेनालि**

**अयि भोः सुमनसः।**

श्रीवेङ्कटेशस्य भगवतः कृपया अभूतपूर्वं यावद्भारत—वेदशास्त्रविद्वदधिनिवेशनम् अधुना प्रवर्तते । महदिद प्रमोदस्थानम् ।

भारतीयानामस्माकम् वेदाः परम प्रमाणम् ये परमेश्वरेण अनुगृहीताः भारतावने अभ्युदयश्रेयोऽवाप्तये । इतः पूर्वम् अपौरुषेयाणाम् वेदाना महत्त्वम् बहुभिः विद्वद्वरेण्यैः ख्यापितम् । इदानीम् शास्त्रसभा प्रचलति ।

यद्यपि शासनाधिकार वेदनामेव प्रभुसम्मितानाम् 'प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा, पुसा येनोपदिश्येत तद् शास्त्रमिति कथ्यते' इति लक्षणानुसारेण प्रवर्तक निवर्तक वा शास्त्र भवितुमर्हति तथापि नेद समग्र लक्षणम् अज्ञातसिद्धब्रह्मबोधकानामपि वेदान्तानाम् शास्त्रत्वाभ्युपगमात् 'शास्त्रयोनित्वा' दिति सूत्रे शास्त्रपदेन वेदस्यैव ग्रहणाच्च । अतः नित्यम् उपदेशकम् शास्त्रम् वेदा भवन्ति । अनन्तर पुरुषधौरेयैः लोकहितमतिभिः महर्षिभिः रचितानि षट्शास्त्राणि व्याकरणन्यायसाङ्ख्ययोगपूर्व–मीमासावेदान्तशास्त्राणि पुरुषार्थपराणि शास्त्रत्वेन व्यवह्रियन्ते।

तत्र व्याकरणस्य वेदाङ्गत्वेऽपि शास्त्रत्वेन पृथक् गणनम्। इद पदशास्त्रमित्यपि उच्यते साधुशब्दान्वाख्यानात्। मीमासा तु अपौरुषेयवेदवाक्यार्थविचारात्मिका साक्षात् वेदेन सम्बद्धा, तत्र वेदपूर्वभागस्य कर्मकाण्डस्य विचारात्मिका पूर्वमीमासा सहस्राधिकरणे धर्मनिर्णयतत्परा वेदस्य धर्मप्रतिपादकत्व व्यवस्थापयति । उत्तरभागस्य ज्ञानकाण्डस्य विचारात्मिका उत्तरमीमासा सत्यज्ञानानन्दलक्षणब्रह्मप्रतिपादन–परा तत्त्वजिज्ञासूनाम् जीवितगम्यम् निर्दिशति, यद् वेदान्तशास्त्रमित्युच्यते । वेदरक्षार्थ व्याकरण प्रवृत्तमिति त्रयाणामषा शास्त्राणाम् वेदसम्बद्धत्वम् सुस्थितमेव । यद्यपि न्यायशास्त्रम् प्रमाणशास्त्रत्वे व्यवहृतम् महात्मभिः कणादगोतमादिभि प्रवर्तित स्वतन्त्रमेव तथापि 'काणाद पाणिनीय च सर्वशास्त्रोपकारकम्' इति रीत्या वेदार्थनिर्णयाय नास्तिकवादनिराकरणाय च उपयुज्यत इति शिष्टजनै–रादृतम् न्यायशास्त्रम् यस्य सहकारेण अन्यायेन प्रवृत्ता वादा निराक्रियन्ते । कपिलमहर्षिणा प्रवर्तितम् साङ्ख्यम् परिणामवादमाश्रित्य सत्त्वरजस्तमोभि गुणैः सृष्टेः विकासमभिदधत् कर्मकाण्डस्य बहु उपकरोति । योगशास्त्रम् च महर्षिणा पतञ्जलिना प्रवर्तितम् यमनियमासनप्राणायाम–प्रत्याहारधारणाध्यानसमाधिभिः मैत्री–करुणा–मुदिता–उपेक्षाभिः

च सुख-दु ख-पुण्य-अपुण्य विषयाभि , साधकजनाना कल्पतरु विभाति । एवम् एतानि शास्त्राणि महतो वेदस्य यथाभूतार्थग्रहणे धर्मानुष्ठाने तत्त्वार्थग्रहणे च अत्यन्तमावश्यकानीति प्राचीने कुशाग्रीयधिषणे समादृतानि। एषा धार्मिकी प्रणाली इहपरसुखप्रदायिनी अन्तत तत्त्वज्ञानन मोक्षाय कल्पते । तानि एतानि शास्त्राणि अध्येतॄणामनुत्साहेन पठनपाठनादिभ्य दूर गतानि, अध्येतॄणाम् अध्यापकाना च प्रोत्साहेन सरक्षणीयानि देशकल्याणाय। इदानीम् वेदा मेधाविना धीमता तत्त्वजिज्ञासूना दृष्टिमाकर्षन्ति यत ज्ञानराशि वेद । ते एव विभावयन्ति- पूर्वे वेदव्याख्यातृभि अनुक्तोऽपि अर्थ सग्राह्य एव भवति समाजश्रेयसे । न केवल धर्मदृष्ट्या अपि तु विज्ञानदृष्ट्या च वेदाना स्वरूप यथावत् सरक्षणीयम् । एव विचारधारा लौकिकानाम् प्रवर्तते अद्यत्वे । अनेनाऽपि वेदस्य महत्त्वम् ज्ञाप्यते । एषा आलोचनापद्धति सस्कृतिप्रधाना बुद्धिविकासाय आत्मगुणसम्पदे च प्रभवति । पूर्वेषा महात्मनामनितरसाधारणी प्रज्ञामाविष्करोति भौतिकसम्पद अभिवृद्धये च उपकरोति । वेदेषु गूढार्थाविष्करणाय सस्कृतभाषाज्ञान शास्त्रज्ञान च अतीव उपयुज्यते । ऐहिकदृष्ट्या वेदा कथकार उपकरिष्यन्ति इत्येव तेषाम् अन्वेषणाहेतु । अपि च तत्त्वज्ञानमपि बुद्धिकुशलतया अवाप्स्यते इत्यपि तेषामाशय। एव सति तत्त्वज्ञानधर्मस्य अपेक्षा दूरतो गता ।

शिष्टाना तु धर्ममुखेनव तत्त्वज्ञानमिति दृढ विश्वास । अत दृष्टफलमनपेक्ष्य षडङ्ग वेदाध्ययन-तदर्थज्ञान-वेद विहितकर्मानुष्ठान-देवतोपासनादिभिरेव सस्कृतान्त करणस्य गुरूपदेशत वेदान्तवाक्यै तत्त्वसाक्षात्कार इति साम्प्रदायिका । सस्कृतिप्रधानाया वेदविद्यायाम् धीमता परोक्षमेव ज्ञान जायते धर्मस्य दवताया ईश्वरस्य वा साहाय्याभावात् । अतीन्द्रियार्थद्रष्टार ऋषय साम्प्रतम् नोपलभ्यन्ते । अस्मिन् वैज्ञानिके युगे साधनानि बहूनि मानवानाम् सुखसौकर्यार्थ सृज्यन्ते आद्रियन्ते च । अथापि लिङ्ग शरीरस्य सस्कार परमपुरुषोपयिक अस्माक ऋषीणा शास्त्रानुसारेण ज्ञेय । पूर्वजन्मपुनर्जन्मवृत्तान्ता परलोकादयश्च न चर्मचक्षुषा ग्रहीतु शक्यन्त । अत मुमुक्षुभि तत्त्वजिज्ञासुभि धार्मिकप्रणाल्येव अवश्यम् अनुसरणीया । ऐहिकम् महत्प्रयोजन सस्कृतिप्रधानाया वदविद्याया सम्भाव्यते। अस्तु नाम । यथा यथा वेदा इतरेषामपि उपयोक्ष्यन्ते तथा प्रयत्न क्रियताम् शास्त्राणि वेदाङ्गानि च तथा । परतु प्रचीनपद्धत्या सरक्षिता एव वेदा समषा पुरुषार्थाना सम्पत्तये कल्पन्ते इति यावच्छक्यम् नियमानुसारेण ते उपासितव्या शास्त्राणि च । सस्कृतिप्रधाना वेदविद्या जन्मान्तर आस्तिक्यवर्धनेन धर्माचरणद्वारा मोक्षाय उपयोक्ष्यते । सम्प्रति तु विश्वमानवसमाजे भारतस्य महोन्नति विधास्यति । एव लौकिकदृष्ट्यापि महत्तर प्रयोजनं सम्भाव्यते। । अत सर्वथा वदा वेदाङ्गानि शास्त्राणि च परमश्वरेण महर्षिभिश्च अनुगृहीतानि सरक्षणीयानि देशस्य समुन्नत्यै । यत एतद्देशवासिनाम् आचारसरणि गुणग्राहिता साधननिष्ठा च महर्षिभि दृष्टा समग्रजीवितविकासाय कल्पते। तदिद वेदशास्त्रविद्वत्समेलनम् श्रीवेङ्कटश्वरस्य कृपया तिरुमल तिरुपति देवस्थानेन निर्व्यूढ आदरास्पद नवयुगमाविर्भावयति देशकल्याणमातनोति मानवताविकासाय विश्वश्रेयसे च भवतीति दृढ विश्वसिम । वेदशास्त्रसरक्षणेन 'वर्धतामभिवर्धताम श्री ' इति आशास्महे ।

GL - 3

# न्यायवैशेषिकदर्शनसमीक्षणम्

**श्री राणि नरसिहशास्त्री**
मोडेकुर्रु

न्यायवैशेषिकदर्शनयो काचन समीक्षा क्रियते । प्रथम वैशेषिकदर्शनसमीक्षा । इदमेव कणाददर्शनमिति वैशेषिकदर्शनमिति, औलूक्यदर्शनमिति च व्यपदिश्यते। कणादो ह्यत्र सूत्र चकार । कणादर्षि काकपोतीवृत्ति-मनुतिष्ठन् रथ्यानिपतितान् तण्डुलकणानादाय प्रत्यहमाहार चकार । अतस्स कणाद इति कणभक्ष इति च नाम्र प्रसिद्धिमवाप । अयमेव औलूक्य । उलूकस्य ऋषेरपत्य-मौलूक्यम् कश्यपगोत्रोत्पन्नोऽयमित्याहु । तपस्विने कणादमुनये स्वयमीश्वरो उलूकधारी भूत्वा पदार्थषट्कमुपदिदेशेत्यैतिह्य श्रूयते । ततोऽप्यस्य दर्शनस्योलूक्यदर्शनमिति प्रसिद्धि । गौतमेन हि प्रमाणादिषोडशपदार्थाना तत्त्वज्ञानान्मोक्ष इत्युक्त न्यायशास्त्रे तत्तु कणादस्य सम्मतमेव। पर त्वस्मिन् जगति विद्यमानाना पदार्थाना मध्ये के धर्मिण कतिविधाश्च ते? इत्येव मिथोऽसकीर्णरूपेण यावन्न पदार्थज्ञान तावत्साधर्म्यवैधर्म्यज्ञानाभावेन साहचर्यनियमरूपव्याप्तिज्ञान न सुलभमित्यतो द्रव्यगुणादिभेदेन सप्तैव पदार्था इति निश्चित्य अस्य द्रव्यस्येद स्वरूप, एत एव च तस्य गुणा इत्यादि सर्व सुव्यवस्थित कणाद प्रत्यपादयत्। अस्य च दर्शनस्य वैशेषिकमिति विशेषतो निर्देश विशेष-पदार्थाङ्गीकारेण । विशेषाणामनतत्वात्समवायस्य चैकत्वाद्विभागो न सभवति । अन्योन्याभावविरोधिसामान्यरहित-स्समवेतो विशेष इति विशेषाणा लक्षणम् । अन्योन्याभाव परमाण्वादीना मियो भेद । तद्विरोधिना सामान्येन जात्या रहित समवायसबन्धेन विद्यमानश्च य स विशेष सामान्यरहित इत्युक्त्या सामान्यवता द्रव्यगुणकर्मणा व्यावृत्ति । समवेत इत्युक्त्या समवायस्य व्यावृत्ति । समवायस्य समवायान्तराभावेन तस्य समवेतत्वाभावात् । अन्योन्याभावविरोधीत्यनेन सामान्यव्यावृत्ति । यद्यपि सामान्य स्वत सामान्यरहितमेव, तथापि न तस्य सामान्यराहित्यम् अन्योन्याभावविरोधित्वेन कि त्वनवस्थादोषेण । विशेषेषु तु यदि विशेषत्वरूप सामान्य स्वीक्रियेत तर्हि विशेषत्वमेव न स्यादिति रूपहानिरेव स्यात् । सर्वेषा साम्यापातात्। ततश्च स्वाश्रयेष्वन्योन्याभावप्रतीतिजनकत्व तेषा व्याहन्येत। अतस्तेषा सामान्यराहित्यम् अन्योन्याभावविरोधित्वेनैव ।।

> "द्वित्वे च पाकजोत्पत्तौ विभागे च विभागजे ।
> यस्य न स्खलिता बुद्धिस्त वै वैशेषिक विदु.।।"

द्वित्वसख्याविषये पाकाजोत्पत्तिविषये विभागजविषये च यस्य बुद्धिर्न चाल्यते त वैशेषिक विद्युरित्याभाणक । उक्तस्थलत्रये वैशेषिकाणा विशेषतोऽभिनिवेश इत्यर्थ ।

मीमासकास्त्वित्थमाहु – यदा घटादिद्वयमेकत्र सन्निहित भवति तदानीमेव तत्र द्वित्वसख्योत्पद्यते । पश्चादिन्द्रिय-सन्निकर्षानतरमयमेक अयमेक इत्यपेक्षाबुद्ध्या द्वित्व ज्ञायते। तथा चापेक्षाबुद्धि द्वित्वस्य व्यञ्जिका, न तूत्पादिका ।

यदा तु घटादिद्वय वियुज्यते तदा द्वित्वस्य नाश । एवमेव त्रित्वादिविषयेऽपि बोध्यम् । वैशेषिकास्तु अज्ञाताया द्वित्वादिसख्याया अभ्युपगमो निरर्थक इति मन्वाना अपेक्षाबुद्धिरेव द्वित्वादेरुत्पादिकेति वदन्ति । तन्मते इन्द्रियार्थसन्निकर्षमारभ्य सस्कारपर्यन्तानामष्टसु क्षणेषु क्रमश उत्पत्तिर्भवति । तथाहि – प्रथमे क्षणे इन्द्रियस्य घटद्वयेन सह सबन्ध । द्वितीये एकत्वजातिज्ञान तृतीये अयमेक अयमेक इत्यपेक्षाबुद्धि चतुर्थे द्वित्वसख्योत्पत्ति, पञ्चमे द्वित्वत्वजातिज्ञान, षष्ठे द्वित्वसख्याज्ञान, सप्तमे इमौ द्वौ घटाविति द्वित्वसख्याविशिष्टद्रव्यज्ञानम्, अष्टमे तादृशज्ञानजन्य आत्मनि सस्कारः। अत्र पूर्वपूर्वोत्पन्नस्योत्तरोत्तर प्रति हेतुत्वात् ईदृशक्रमस्यावश्यकत्वम् ।

अत्राहुराचार्या.– अपेक्षाबुद्धि. द्वित्वादेरुत्पादिका भवितुमर्हति । व्यञ्जकत्वानुपपत्तौ तेनानुविधीयमानत्वात्। शब्द प्रति सयोगवदिति । उद्देशो लक्षण परीक्षा चेति त्रिविधाऽस्य शास्त्रस्य प्रवृत्ति । नाममात्रेण वस्तुसकीर्तनमुद्देशः। यथा – द्रव्यगुणकर्मसामान्यविशेषाभावाः पदार्था इति । लक्षण तु तत्तदसाधारणधर्मवचनम् । यथा गुणवत्व द्रव्यत्ववत्त्वमित्यादि । यया लक्षितस्यतल्लक्षणमुपपद्यते वा नवेति विचारः परीक्षा । विभागस्य विशेषोद्देशरूपत्वादुद्देशे एवान्तर्भाव । तथा चोद्देशो द्विविध सामान्योद्देश. विशेषोद्देशश्चेति । द्रव्यगुणादय सप्त पदार्था इति सामान्योद्देशः। पृथिव्यादीनि नव द्रव्याणीति रूपादयश्चतुर्विंशतिर्गुणा इति विशेषोद्देशः। द्रव्यादयस्सप्तपदार्था वैशेषिकनये प्रसिद्धा. नैयायिकानामप्यविरुद्धा. । नैयायिकाभिमताना शक्तिसादृश्यादीनामत्रैवान्तर्भाव इति भाष्ये कथितम् । अत्र भावरूपाः पदार्थाः षडेव अभावस्तु सप्तमः । षडेवेत्येवकारेणान्धकारसादृश्यादीना प्रत्येकत्व नास्तीति प्रतिपद्यते । नियमव्यवच्छेद्य प्रमित न वा, प्रमितत्वे कथ निषेधः । अप्रमितत्वे कथ तरामिति न शङ्क्यम् । सप्तमतया प्रमितान्धकारादौ भावत्वस्य, भावतया प्रमिते शक्तिसादृश्यादौ सप्रमत्वस्य च निषेधात् । न केवलस्य सप्रमस्य निषेध.। नापि केवलस्य भावस्य किन्तु सप्रमत्वविशिष्टभावस्य केवलस्सप्तम अन्धकारादिः प्रतीयते । केवलो भावश्च शक्तिसादृश्यादिः प्रतीयते। एव भागशः प्रतियोगिप्रमितिः । निषेधस्तु विशिष्टेन रूपेण न । ह्यनेनैव रूपेण निषेधः तेनैव रूपेण प्रतियोगिप्रमितिरपेक्ष्यत इति राजाज्ञास्ति ।

अपेक्षाबुद्धिर्नाम विनाशकविनाशनप्रतियोगिनो बुद्धिरिति बोद्धव्यम् । अपेक्षाबुद्धेर्नाशो हि द्वित्वसख्याया विनाशकः । तादृशविनाशप्रतियोगित्वमपेक्षाबुद्धेरिति लक्षणसगति । अत्र विनाशकेति पदानुक्तौ सर्वत्र जीवबुद्धावतिव्याप्तिः । अय घट इति बुद्धेरपि तृतीयक्षणे विनाशेन विनाशप्रतियोगित्वात् विनाशकेत्युक्तौ तु न दोष. । तेन घटज्ञाननाशेन अन्यस्य कस्यचिद्विनाशस्याजननेन तस्य घटज्ञाननाशस्य विनाशकत्वाभावात् । अस्मिन् दर्शने पीलुषु= परमाणुषु पाके प्रक्रिया विस्तरेण प्रतिपादिता । अस्मिन् दर्शने प्रत्यक्षमनुमान च प्रमाणद्वयमेवेति श्रीधरमतानुसारिण. । "शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते, अनुमानगतार्थत्वादिति वैशषिक मतम्" इति न्यायः मुक्तावल्यामुक्तः । शब्दस्यापि अनुमानविधया प्रामाण्यागीकारात् पृथक्प्रामाण्यानगीकारान्नैयायिकदर्शनापेक्षया न्यूनता । प्रत्यक्षम् अनुमान शब्दश्चेति प्रमाणत्रयमिति इतरेषा प्रमाणानामनुमानेऽन्तर्भाव । अनुपलब्धेस्तु प्रत्यक्षेऽन्तर्भाव इति बोध्यम् । अखिलो हि विचारशीलो जन्तुः दुःखहातुमिच्छति । दुःखस्य प्रतिकूलवेदनीयतया सर्वानुभवसिद्धतया हातव्यत्वात् । दुःखहानोपायश्च परमेश्वरसाक्षात्कार एव नान्य । "तमेन विदित्वातमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति श्रुते. । "यदा चर्मवदाकाश वेष्टयिष्यन्ति मानवाः । तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥" इत्यादिवचनप्रामाण्यात् । परमेश्वरसाक्षात्कारश्च श्रवणमननभावनाभिर्भावनीय. । 'आगमेनानुमानेन ध्यानाभ्यासबलेन च । त्रिधा प्रकल्पयन् प्रज्ञा लभते योगमुत्तमम् ।। ' तत्र मननमनुमानाधीनम् । अनुमान च व्यप्तिज्ञानाधीनम् । व्याप्तिज्ञान च पदार्थविवेकसापेक्षम्। अतः पदार्थषट्क 'अथातो धर्म व्याख्यास्याम' इत्यादिकाया दशलक्षण्या कणभक्षेण भगवता व्यवस्थापितम् । द्रव्य तम इति भाट्टा वेदान्तिनश्च भणन्ति आरोपित नीलरूपमिति श्रीधराचार्या. आलोकज्ञानाभाव इति प्राभाकरैकदेशिनः । आलोकाभाव इति नैयायिका.। अभावश्चतुर्विध. । प्राक्प्रध्वसात्यन्तान्योन्याभावभेदात् । स च प्रत्यक्षगम्य। न चास्य पुरुषार्थोपयिकत्व नास्तीत्याशङ्कनीयम् । यतोऽयमभावः परमपुरुषार्थस्वरूपः। दुःखात्यन्तोच्छेदापर–पर्यायनिश्श्रेयसरूपत्वेन परमपुरुषार्थत्वात् । अस्मिन् वैशेषिकदर्शने ईश्वरो नोक्तः । न प्रतिषिद्धश्च । अतस्तस्मिन् विषये औदासीन्यमस्य दर्शनस्येति शम् ।

GL-4

# अक्षपाददर्शनम्

**श्री राणि नरसिहशास्त्री**
**मोडेकुर्रु**

